

© No. A 6071/70.

DELUX

F.C. EX-BOOK

[illegible]
Tenth
[illegible]

No. 6
432 Page

LUCKNOW
PHONE
44739

REGISTERED TRADE MARK
No 247534

(१) ‘‘पूर्वापरौ तोयनिधीवगाह्य स्थित: पृथिव्या इव मानदण्ड:’’ कुमार सम्भव ‘‘कालिदास’’

(२) मोहन जो दडो एण्ड द इन्डस सिविलाइजेशन ।१९३१।। खण्ड-१-१०६, न्यूलाइट ऑन द मोस्ट एंशेन्ट ईस्ट-१९३४-पृ०- २२०।

प्रोफेसर फ्रैंकफर्ट ने लिखा है कि यह निर्विवाद है कि सभ्य संसार को निर्माण करने वाली प्राचीन जटिल संस्कृति मे यूनानियों के उत्थान से पहले भारत का प्रमुख भाग था।

द्रष्टव्य राधाकृष्णन का पूर्व और पश्चिम।

आर्यावर्तस्य परमपावनमये भारतप्रदेशे सर्वदा तएव प्रकृतिनटी इयं रमणीयं स्वाभिनयं परमोल्लासमयवातावरणे विधातुं रङ्गस्थलं निर्ममौ। स्व पाणिसरोरुहैः प्रदेशमिमं समलङ्कृत्य प्रकृतिरियं हिमकणाच्छादितपर्वतमालायाः शोभां चकासितुं सर्वदा विराजमानेव सन्तिष्ठते।

हिमाच्छादितहिमालयस्योत्तुङ्गशिखरश्रेणी समस्तावनीतलं परिचाययितुं नैसर्गिकगत्याऽभिमतमाध्यात्मिकतत्त्वं प्राच्यकालत एव विराजमाना लोचनगोचरायते। आवाच्यायामाशायां नीलाभामयस्य नीलाम्बुधेः चञ्चलतरङ्गाः चरणयुगलं प्रक्षालयन् चकासते।

प्रतीच्यां पारावारप्रवाहचञ्चलतरङ्गश्रेणी हिमाच्छादितहिमालयोत्तुङ्गशिखरश्रेण्याः विजयशंखध्वनिं कुर्वती सदा करतलवदेव पाश्चात्यकलुषितविचारमालाः सदाऽऽलोडयितुं प्रयतमानेव विद्योतते। हिमगिरिकन्दरप्रसूतमन्दाकिनी निजमन्दमधुरसलिलप्रवाहमालया विचरन्ती शस्यश्यामलत्वमाकलयति। ~~अस्य~~ अतएव कविकुलकमलदिवाकरस्य कालिदासस्यनितरामियमुक्तिः संगच्छते। ~~मत्~~(१)

अतएव हिमालयस्य देवभूमित्वं नितरां संगतं भवति। पाश्चात्यदार्शनिकप्रधानः डा॰ राधाकृष्णन् महानुभावः नितान्तमार्यावर्तोद्घोषिताध्यात्मिकतत्त्वप्रभाववैलक्षण्यमाकलय्य पद्यमिदं स्वप्रबन्धे सिद्धान्तकोशे व्याजहार।

इतिहासस्य विभिन्नावस्थामेकस्मिन् सूत्रे समाकलयितुं किमपि तत्त्वं क्षमते चेत्तदा तदेवाऽऽध्यात्मिकतत्त्वम्। इदमेवाऽऽध्यात्मिकतत्त्वं वैदिकसंस्कृतौ प्रभावातिशयं धत्ते। विकासस्य समग्रावस्थायां स्वाभिमतं पक्षं प्रतिपादयितुं वैचारिकसङ्घर्षभूमौ समवतीर्य नाध्यात्मिकपक्षस्य दौर्बल्यमाससाद। अतएव सर जॉन मार्शल महाशयोऽपि पक्षमिमं दृढीकुर्वन् प्रोवाच यत् प्रमाणतर्काभ्यां विज्ञायते वैदिकी संस्कृतिरियं नव इति प्राचीनकालादेव विकसिता परिमार्जिता च। अस्याः वैदिकसंस्कृतेः वैशिष्ट्यं केवलमाध्यात्मिकत्वमेव।(२)

अस्मादेव कारणादार्यावर्तस्य बाह्यरूपं यावत् भव्यं विद्यते तावत् तस्याभ्यान्तरिकरूपस्याऽभिरामत्वाऽऽभामयत्वञ्च लोचनगोचरतां याति। जगतीतलेऽस्मिन् सभ्यतायाः जननीयं नितरामार्यावतस्य मही सन्तिष्ठते। अज्ञानान्धकारस्य प्रगाढप* टलैः समाच्छन्ना पाश्चात्यमही पाशविकजीवनमेव जीवनं मन्यते स्म। तस्यां वेलायामार्यावर्तस्य गगनमण्डले प्रथमप्रभातस्य मरीचिमाला नितरामुदिता। ज्ञानप्रभाभास्करस्य किरणानि निरन्त

(१)
एतद्देश प्रसूतस्य सकाशा ~~द्~~ दग्र जन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।
“मनुस्मृतिः” (२-२०)

अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्द सेवौपयिकं स्पृहा हि नः॥
“श्रीमद्भागवत” स्कन्ध-५
अ०-१९- श्लो०(२१)

मविद्याघनपटलानि तिमिरमण्डलानि विच्छिद्य जगतीतलेऽध्यात्मवाददीपित सभ्यतायाः सर्वप्रथमं सूर्योदयः स्वकिरणमालया सर्वान् प्रकाशीकृत्य समस्तावनीतले मानवसभ्यतायाः सन्देशमश्रावयत्। अतएवास्याऽऽर्यावर्तस्य मानवसभ्यताप्रदानस्य श्रेयः नितान्तं साधीयः।(१)

समस्तानां मानवानामभ्युदयाय स्मृतिप्रणेतुः त्रिकालज्ञस्य मनोः कथनं नैव कल्पनामात्रमपितु इतिहासस्य निकषपरीक्षोत्तीर्णः सन् नितान्तं सत्यतामाकलयति। अस्मिन् कर्मभूमौ तावदार्यावर्ते जन्मग्रहणाय भोगभूमिं स्वर्गमासादयन्तोऽपि सुधाभुजः सर्वदा वाञ्छन्त्येव। अस्मिन्नेवार्यावर्ते सर्वविद्यासु सर्वश्रेष्ठाऽध्यात्मविद्या वेदादेव प्रादुर्भूतेति नात्र शङ्कावसरः केषामिति निर्विवादसिद्धोऽयं पन्थाः। अतएव भगवान् मनुः — (१)-(२)

दार्शनिकचिन्तनं प्राचीनकालादेव स्वभाव एवेति निश्चीयते। संसारस्य धारायां जीवनसंग्रामे स्वात्मनः विजयं वाञ्छितुं समेषां नैसर्गिकी प्रवृत्तिः दरीदृश्यते। मनुष्याणां विवेकप्राधान्यतया तेषां प्रत्यनुष्ठानसन्दर्भे स्वविचाराः सदा समुपयुज्यन्ते। शान्त-चेतसा सञ्जाते च विचारे वास्तविकीयं प्रतीति दृष्टिगोचरा भवति खलु दृश्यादृश्यजगद्विषयककल्पनायाः समुदायमात्रं मानवसमाजोऽस्ति। कस्यापि मानवसमाजस्य पृष्ठभूमौ कापि संस्कृतिः कापि सभ्यता च तत्समाजस्य स्वरूपं परिचाययितुं प्रयतते। तस्याः संस्कृतेः सभ्यतायाश्च स्थायित्वं प्रदातुं दर्शनस्यावश्यकत्वं समागच्छति।

मानवानां जीवनं दर्शनमन्तरा किमपि नासादयति। विनापि-जीवनं नहि दर्शनस्य किमप्युद्देश्यं जायते। अतएव मानवजीवनस्य सर्वाङ्गीणं विकासं विधातुं दर्शनमेवोपयोगी वस्तु विद्यते। यदि कोऽपि मानवस्तावत् स्वजीवने दर्शनस्य महत्त्वं स्वीकर्तुं नैव वाञ्छति चेत्तदा तस्य कृते पाशविकजीवनमेव शरणं शोभनं वेति।

आहारनिद्राभयमैथुनस्य कस्मिन्नपि जीवने समावश्यकत्वेनापि तस्य मूल्याङ्कनं कर्तुं क्षमता विद्यते कस्यापि चेत् तदेव दर्शनं वास्तविकमिति।

दृश्यते अनेन इति दर्शनम्। अर्थात् वस्तुनः सत्यभूतं तात्त्विकं स्वरूपं येन दृश्यते तदेव दर्शनम्। कोऽहं, कस्त्वं, कुत आयातः? इत्यपि सर्वतो दृश्यमानस्य जगतः किं वास्तविकं स्वरूपं सन्तिष्ठते। अस्य जगतः समुत्पत्तिः कुतः किमर्थं वा जाता। संसारप्रवाहस्यास्य किं कारणम्? चेतनमिदमचेतनं वा? किं कर्तव्यमकर्तव्यं वा? जीवनमिदं सम्यक्प्रकारेण संचालयितुं कास्तावत् प्रेयाः प्रशस्तश्च साधनमार्गाः? इत्यादिस्व~~रूपाः प्रश~~ रूपाः प्रश्नाः समाधातुमेव वास्तविकरूपेण दर्शनस्योद्देश्यं वेविद्यते। अस्मिन्नेव सन्दर्भे दर्शनं तावदुपपद्यते। अस्मादेव का

(१) शासनात् शंसनात् शास्त्रं शास्त्रमित्यभिधीयते।
शासनं द्विविधं प्रोक्तं शास्त्र लक्षण वेदिभिः।
शंशनं भूतवस्त्वेक विषयं न क्रियापरम्॥ "आगम"

यि

(२) "आप्रा द्यावा पृथिवी अन्तरिक्ष सूर्य आत्मा जगतः"
"तस्थुषश्च" "ऋग् वेद"

णात् दर्शनशास्त्रमाचक्षते विद्वांसः। शास्त्र शब्दस्य व्युत्पत्तिरित्थं प्रतिपादिताऽऽगम प्रबन्धे। (१)

एतावता प्रबन्धेन शास्त्र शब्दस्य व्युत्पत्तिः द्वाभ्यां धातुभ्यां निष्पद्यते। शास्त्रस्य द्वे रूपे विद्यते एकं विधिरूपं तदपरं निषेधरूपम्। श्रुतिस्मृति प्रतिपादितं कार्यं तावदनुष्ठानात्मकं विद्यते तदेव विधिशास्त्रं व्याचक्षते। हेयकर्मकलापस्य निषेधात्मकतया शास्त्रशब्दस्य प्रयोगः धर्मशास्त्राय प्रयुंक्ते। शंसक शास्त्रं बोधक शास्त्रं वा तदेवाचक्षते। येन वस्तुनः वास्तविकस्वरूपं वर्ण्यते। शासन शास्त्रस्य क्रियापरत्वं, शंसक शास्त्रस्य ज्ञानपकत्वमाचक्षते। शंसक शास्त्रस्य प्रयोगः दर्शने व्यवह्रियते शंसक शास्त्र प्रतिपाद्यतया, धर्मशास्त्रस्य कर्तव्याकर्तव्ये प्राधान्यतया विधान सम्पादकत्वं तेन तत्पुरुष पारतन्त्र्यमाचक्षते। परन्तु दर्शन शास्त्रस्य वस्तूनां प्रतिपादकत्वेन वस्तुतन्त्रत्वमेव।

सभ्यतायाः विकासे (इतिहासे) वा समीक्षात्मक दर्शनस्य वा दार्शनिक चिन्तनस्य विकासः यस्मिन् कस्मिन्नपि देशे समजायत। तेषु देशेषु प्राचीनयूनान देशः किंचार्यावर्तस्य भारतो वा नेपालो वा प्रामुख्यं भजते। यूनान प्रदेशे दार्शनिक चिन्तनस्योदयो वैज्ञानिक विचिकित्सया प्रादुर्बभूव। यत्खलु दृश्यमानस्यैव जगतः पृष्ठभूमौ किमपि तात्त्विकं रहस्यं निश्चिनुते। तदनन्तरमेव कियतां विचारकाणां प्रतिक्रियया क्रमशः ज्ञानमीमांसा नीति शास्त्रं प्रभृति विषयानाकलय्य तर्कशास्त्रमाचारशास्त्रं राजनीति दर्शनं विवेचितुं प्रारभन्त।

एतस्मिन् सन्दर्भे प्लेटो अरस्तू प्रभृतयो विद्वांसः दार्शनिक समस्यां समाधातुं सफलप्रयासाः बभूवुः। तत् प्रभृति कालक्रम मर्यादया प्रस्तुत दर्शनमधिकृत्य यूरोपीय दर्शनं विकासतां प्रापत्। प्राचीन देशेषु दर्शनस्य महत्त्वपूर्णं केन्द्रं भारतवर्षस्य प्रसिद्ध्यति। ऋग्वेदे यत्र तत्र दार्शनिक प्रश्नाः समाययौ। क्वचिदपि तादृक्षान् प्रश्नान् याथातथ्य रूपेणोत्तरयितुं प्रायतत। किन्तु वास्तविकरूपेण दर्शनस्य व्यवस्थित रूपाङ्कनं कर्तुं तावदुपनिषद् महाप्रबन्धेष्वेव समेषां लोचन पुटेः समागच्छति।

यथा ऋग्वेदस्य सप्तमोऽध्याये सूर्यवर्णन प्रसङ्गे द्विचत्वारिंशत् मन्त्रः यथा यथं प्रमाणयति। “ आ (२)

अत्र मदीयभाष्यम् —

यच्च उदय समनन्तरमेव आ अप्राः (प्रापूरणे) आपूरीतवत् स्वकीयेन प्रकाशेन द्यावा पृथिव्यौ अन्तरिक्षं च। अ

॥ महाभाष्यम् ॥ (७)

(ख) ॥ हि० ठ० ॥ (२)

(३) भारतीय दर्शन सं०क्षि० ॥ देवराज ॥

एतानि विशेषणानि मण्डलाभिप्रायान्नपुंसकलिङ्गान्यनूद्य अथेदानीं पररूपेण स्तौति। सूर्य आत्मा पुरुषाभिप्रायमेतत्। जगतो जङ्गमस्य तस्थुषश्च स्थितिमतः स्थावरस्य। तथाच श्रुतिः यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः प्रजापतिस्तद् ब्रह्म इति। सूर्याद्वै तमनेन मन्त्रेण व्याप्यते स सूर्यात्मत्वेनोपास्यः।(१)

एवं च मित्रादीनां च चक्षुः स सूर्य उद्गतः सन् द्यावापृथिवी दिवं भूमिं चान्तरिक्षं चाप्राः आपूरितवान् आपूरयति वा। स्वतेजसेति शेषः। एवमपररूपेण स्तुत्वा पररूपेण स्तौति। किंभूतः सूर्यः। जगतः जङ्गमस्य तस्थुषः स्थावरस्य च जगत आत्मान्तर्यामी।
“यमेतमादित्ये पुरुषं वेदयन्ते स इन्द्रः स प्रजापतिस्तद् ब्रह्म इति श्रुतेः”

उपनिषद् दर्शन प्रतिपाद्याऽऽध्यात्मिकी जिज्ञासा। अस्याः जिज्ञासायाः चरमतत्त्वविषयकप्रश्नोत्तरमेव। तदेव चरमतत्त्वं नितान्तमुपनिषदां प्रतिपाद्यविषयः। सर्वस्मात् प्राचीनोपनिषत् साहित्ये बृहदारण्यकं छान्दोग्योपनिषदश्च। उपनिषत् साहित्ये परमात्मतत्त्वं तावदमृतत्वं मोक्ष जिज्ञासादयो हि विषयाः प्राधान्येन प्रतिपादिताः। उपनिषत् साहित्ये पराऽपराया विद्यायाः प्रतिपादनं तथा श्रेयःप्रेयसोः निरूपणेन सह ज्ञानस्य निरूपणं विराजते। विशेषतः— आत्मपरमात्मनोः केवल प्रतिपादनं कुरुते। उपनिषद् महाप्रबन्धे परमात्मतत्त्वमात्मतत्त्वञ्च इन्द्रियमनोवाणीभ्यः परैवेत्युदीतम्।(२)

वस्तुतस्तु भारतीय दर्शनं द्वयोः प्रमुख क्षेत्रयोः सम्बन्धित विषयमाकलय्य विचारपक्षं प्रस्तौति। तत्रैका खलु मोक्षविद्या तदपराऽऽध्यात्मिक विद्या। तद् ज्ञानं मीमांसा शास्त्रं तदपरं प्रमाणशास्त्रञ्च। उभयोः क्षेत्रयोः भारतीय दर्शनं नितान्तं सूक्ष्मातिसूक्ष्मतया विविध चिन्तनमचीकरत्। यस्य खलु प्रभावः विश्वसंस्कृतेः पृष्ठभूमौ वैशिष्ट्येन महत्त्वं वैशिष्ट्येन स्थानं सर्वेभ्यः नितामतिशेते।
मय
(३)

पाश्चात्य विचारशास्त्रेषु दर्शनं तावत् फिलासफीतिसामान्य संज्ञां लभते। शब्दोऽयं तावद् ग्रीक ~~यूनान~~ शब्दोसम्मिश्रणमात्रम्। फिलास शब्दस्य स्नेहप्रतिपादकत्वम्। सोफिया शब्दस्य ज्ञानप्रतिपादकत्वञ्च। अतएव ज्ञानानुराग एव फिलासफी पदवाच्यतामभियन्ते। शब्दोऽयं ग्रीसे तत्रत्येन विदुषा व्यवहृतः। विक्रमात् प्राक् पञ्चम शतके हीरोडोटस महोदयेन कृतोऽयं दार्शनिक प्रयोगः दार्शनिक क्षेत्रे सर्वप्रथमः। पेरीक्लीज महोदयस्य प्रसिद्धतमे व्याख्याने एथेन्स निवासि

(१) भारतीय दर्शन // " उपोद्घात // " वलदेव उपाध्याय //

(२) इन्ट्रोडक्सन टू फिलासफी // प्रथम परिच्छेद //

मां विद्यानुरागकामत्व प्रतिपादनाय थ्यूसी डाइस महाशयोऽपि शब्दमिमं प्रयुक्तवान्। एवं सुकरातोऽपि फिलासफर शब्देन स्वालामं प्रयुक्तवान्। अनया कालक्रम मर्यादया तेषां शिष्योपशिष्यः ((अफलातून प्लेटो। अरस्तु अरिस्टटल) प्रभृतयो विद्वांसः सुकरातस्य ज्ञानोपदेश पद्धतिं समासाद्य तत्प्रचारप्रसाराय व्यापकतया प्रामाणिकग्रन्थान् निर्ममुः।

जगज्जीवनेश्वराणां धार्मिक सामाजिक तत्त्वं नितरां निरीक्ष्य समुचितरूपेण तत् स्वरूपं व्याख्यातुं प्रायतन्त। (१)

यद्यप्यधुनास्य पक्षस्य नितान्तं व्यापकत्वेनापि ~~अल्प: [illegible]~~ अल्पप्रातः व्याप्यत्वमेव लभते। फिलासफी शब्दस्य विज्ञानवाचकत्वेऽपि अस्य एवोवा विज्ञान दर्शनयोः स्पष्टमेव पार्थक्यं लोचनगोचरायते।

जगतीतलेऽस्मिन् विभिन्नविषयवस्तूनां वैशिष्ठ्येनाध्ययनं वर्णनं वा विज्ञानपदवाच्यत्वमाकलयति। भौतिकविज्ञान रासायनिकविज्ञान ज्योतिर्विज्ञानेभ्यः समुद्भावित तत्त्वानां वास्तविकत्वं पीक्ष्यैकसूत्रेण तत्प्रतिपादनमेव दर्शनोद्देश्य तया सुतरामेव पार्थक्यमाभाति। ब्रह्माण्डजगज्जीवनेश्वर तत्त्वानां ~~विवेचनम्~~ विवेचनमेवोद्देश्यमाभाति।

अनया विवेचनया स्पष्टमागच्छति विज्ञानदर्शनयोः पार्थक्यं सुतरां संसिद्धमेव। अनेके विद्वांसस्तु स्पष्टमाचक्षते यत् कल्पनाकुशलकोविदानां मड्डीयं कल्पना मनोविनोद्यैव। जगतीतलेऽस्मिन् शावदपूर्वं वाश्चर्यं दीदृश्य तद्रहस्यं विज्ञातुं वा स्व कौतुकं कौतुहलञ्च शमयितुं फिलासफी शब्दः जनिं लेभे। प्रतिवस्तुनामन्वेषणे मनोविनोदाय कृतकल्पनायाः पाश्चात्य दर्शन रंगशालायां पण्यवीथिका सुमुद्दीप्ता सती प्रसिद्धा।

पाश्चात्यतत्त्वविदां विचारसरणिः तथा प्रतिभाति यथा कस्यापि गन्तव्यस्थानस्य निर्द्धारणमन्तरा विचारसागरे प्रक्षिप्तेयं नौर्व्याकुलतामाकलयति। चञ्चलतरङ्ग प्रवाहे पारावारेण व्याकुलतामाकलयन्ती सीमितगन्तव्यमन्तरा विफलप्रयासमेव करतलीकरोति। विफद्देश्यक प्रयाणमिच्छूनां तेषामियं नौः कं तट प्रदेशं प्राप्नोति नास्मै चोविद्यते चेतः। परन्तु पौरस्त्यदर्शने तद्वैपीत्यमेव भजतेतराम्। यद् रात्रिं दिवं तापत्रयाभिभूततया व्यग्रोद्विग्नतामाकलय्योच्छेत्तुं दुःखत्रयान् स्व प्रतिभावैदुष्येण स्वसाधनमार्गं निश्चेतुं सूक्ष्म चिन्तनशक्त्या स्वलक्ष्यं व्याख्यातुं प्रवर्तते। (२)

अतएव पौरस्त्य दार्शनिकानां स्वाभाविकी दृष्टिः पाश्चात्य

(१) स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठ
पुत्राय प्राह" मु० उ० ॥१।१।

(२) "गीता" अध्यात्म विद्या विद्यानां वादः
प्रवदतामहम्" १०-३२, "श्रीकृष्ण"

(३) प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्"
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता"
"कौटिल्य अर्थशास्त्र" (१-२).

दार्शनिकापेक्षया व्यावहारिकी प्रमाणतर्काभ्यां संवलिता।

((दर्शनस्य वैशिष्ट्यं पौरस्त्यानाम्))

प्रकृतिरियं समग्रावश्यक सामग्र्या पौरस्त्यभूमिं समलङ्कृत्य समस्तानां मानवसमूहानां मानस मन्दिरे तावदैहिक चिन्तां निर्मोच्य पारलौकिक चिन्तन प्रवृत्तिं स्वत एव प्रावर्तयत्। अत एवेयं पौरस्त्य भूमिः निसर्गत एव विचार प्रधाना। पाश्चात्य धरायां तु जीवन सङ्ग्रामस्य सुतरां भीषणतया प्रतिदिनं व्यावहारिक जीवनस्य समस्या कालकालकवलिता विद्यते। अत एव काल काल ~~काल~~ कवलितां समस्यां समाधातुं तेषां कालस्तत्रैव याति।

जगतो महत्त्वपूर्ण घटनां नितरामन्वेष्टुं याथार्थ्येण तच्चित्रणं तेषां जीवनलीला आकस्मिकी घटना। परन्त्वार्याणां पौरस्त्य भूमौ नैतादृशी व्याख्या लोचनगोचरायते। अत एव सर्वविद्या प्रतिष्ठामूलकत्वं ब्रह्म विद्यायां नितान्तमिति प्रत्यपीपदत्।(१)

भगवान् श्रीकृष्णोऽपि स्वगीतायां व्यापक विभूति वर्णन प्रसङ्गे सर्वविद्यायामध्यात्म विद्यायाः पर्याप्त रूपेण प्राधान्यमुपदर्शितवान्। (२)

अर्थशास्त्रं प्रणेतुः कौटिल्यस्योक्तिरपि पक्षमिमं दृढीकुरुते। [illegible] आन्वीक्षिकी विद्या सर्वविद्यानां प्रदीप एवाऽस्ति। समस्तानुष्ठानानामाश्रयः साधन मार्गश्च।(३)

सन्दर्भेऽस्मिन् पौरस्त्ये विचारशास्त्रस्य यावती स्वतन्त्रता परिप्राप्ता न तावती स्वतन्त्रता कस्मिन्नपि देशे लोचन गोचरीभूता।

यद्यपि ग्रीस देशः स्व विकासावस्थायां प्लेटो एरिस्टोटल प्रभृति महानुभावानां महत्त्वपूर्णसमये विचार शास्त्र राजनीति शास्त्राचार शास्त्राणां नितान्त मध्ययनाध्यापनयोर्महान् केन्द्र बिन्दुरेवासीत्। माध्यमिक वेलायां क्रिश्चियन धर्मशास्त्रस्यैकोन विंशति शतके राजनीतीतिहास समाजशास्त्राणि नितरामभिविष्टानि।

किन्त्वार्याणां दर्शन शास्त्रं सदा स्व पादयुगलयोरुपरि सन्तिष्ठते। एवं स्वातन्त्र्यमाकलयत् विभिन्न विद्यायाः विकासे प्रगतौ वा स्व महत्त्वपूर्ण भूमिकां धत्ते। अस्मिन् नयपाले भारते वा पौरस्त्यान्तर्गते आर्यावर्ते दर्शन शास्त्रमार्याणां सर्वविद्याभ्यो नितरां भजते महत्त्वम्। पाश्चात्य प्रदेशे विद्वज्जनानां कृते दर्शन शास्त्रं केवलं मनोविनोद साधनतामाकलयति। येन ते कुकल्पना कुशल कोविदाः प्रस्तुत विषयमाकलय्य स्वेच्छया कल्पनां कल्पयन्ति। परन्तु पौरस्त्यान्तर्गते नयपाले भारते वाऽऽर्यावर्ते समस्ते दर्शन धर्मयोस्तत्त्वज्ञानस्य निर्णा-

(१) "फिलासफी बिगिन्स इन वन्डर"

(२) यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति"
सर्वभूतेषु चात्मानं ततो न विचिकित्सति"
यजु० अ०- ४- म०(६)

द्वा सुपर्णा सयुजा ~~सयुजा~~ सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्य नश्नन्न्यो अभिचाकशीति"
((ऋग्० १-१६४-२०))

सम्बन्धोऽस्तीति व्यावहारिकजीवनेन सह सर्वदा श्रेयान्। त्रिविधतापसंतप्तानि जीवनानि शान्त्वयितुं क्लेशमयसंसारस्यात्यन्तिकदुःखानि दूरीकर्तुं दर्शनशास्त्रं प्राप्यते। नहितावद् विचारशास्त्रं सुधीजनानां कमनीयकल्पनायाः विजृम्भणमात्रम्। देशान्तरे विचारशास्त्रदर्शनशास्त्रयोः पारस्परिकसम्बन्धो नैव लोचनगोचरतां याति। किन्त्वार्यावर्ते तयोः सम्बन्धः नितरां गरीयान् वेविद्यते।

सुचिन्तिताऽऽध्यात्मिकतथ्यमाकलय्य समस्तार्यावर्तधर्मस्य दृढप्रतिष्ठामूलं दर्शनशास्त्रमेव। अतएव प्रस्तुतविचारानुसारं सर्वदाऽऽचारोऽपि श्रेयानेव लोचनगोचरतां प्रयाति। धार्मिकाचारमन्तराऽपि दर्शनशास्त्रस्य विचारपरिस्थितिः निष्फलैव। एवं दार्शनिकविचारमन्तराऽपि धर्मस्य सत्तापि विफलैव।

पाश्चात्यविचारशास्त्रे कौतूहलादेव दर्शनशास्त्रं प्राप्यते। अतएव सुकरातप्लेटोप्रभृतिविदुषां यूनानीदार्शनिकानां नितान्तप्रसिद्धेत्युक्तिः संगच्छते।(२)

कौतुककौतूहलाभ्यामेव सदा दर्शनविचारशास्त्रं प्राप्यते पाश्चात्यधारायामेव। किन्त्वत्र त्रिविधतापव्यावहारिकसन्तापाः व्याख्यया एवं तन्निराकर्तुं साधनमार्गस्य विवेचनया समुत्पद्यते दर्शनशास्त्रम्। सर्वविद्याप्रतिष्ठामूलकस्य वेदस्याऽऽध्यात्मिकपक्षचिन्तनमननाभ्यां समुत्पद्यते दर्शनशास्त्रम्। अतएवा ~~आत्य~~ त्रत्यानां सामाजिकपक्षस्यान्तस्तलं सिताप्यायितसलिलवत् दर्शनशास्त्रं नितरां प्राविशत्।

आर्याणां दार्शनिकचिन्तनं ऋग्वेदादेव प्राप्यते। अतएव परमात्मसंसारोत्पत्तिमृत्युपुनर्जन्ममोक्षप्रभृतिविषयवस्तूनां विकासः ऋग्वेदमन्त्राणां चिन्तनमननाभ्यामजायत।(३) आर्याणां सर्वस्मात् प्राचीनं साहित्यं ऋग्वेद एव। अस्मिन् ऋग्वेदे तावदार्याणां प्राचीनतमं चित्रं पूर्णरूपेण चकास्ति। ऋचायामस्यां वैदिकयुगस्य सभ्यता संस्कृतिरपि मूर्तरूपेण निहिताऽऽस्ते। ऋग्वेदे तावदार्याणां धार्मिकराजनैतिकसांस्कृतिकसाहित्यिकसामाजिकवैज्ञानिकविचाराणां वर्णनप्रसङ्गः यत्र तत्र समुपलभ्यते। अतएवार्याणां धर्मो वैदिक इति कथ्यते। आर्यस्तावत् स्वधर्मस्य मूलतत्त्वं वेद एवेति सर्वे भारतीयाः नयपालवासिनश्चेत्तदा प्रभृति समेषां धर्माणां मूलन्तु वेद एवेति मन्यन्ते।

यद्यप्यार्याणां धार्मिकस्वरूपे वैविध्यं स्पष्टमेव, यतोह्यनेके दार्शनिकाः निर्गुणपक्षमेव स्वीकुर्वते। तदपरे सगुणोपासनां कुर्वन्त एव विद्यन्ते। विभिन्नदार्शनिकानां विविधविचारस्योद्गमभूमि

(१) इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्सुपर्णो गरुत्मान॥
एकं सद्विप्राः बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥
ऋग्० - १.१६४.६४॥

(२) यास्क - निरुक्त - महाभाग्याद् देवताया
॥ एकस्वात्मा बहुधा स्तूयते॥

(३) नसदासीन्नो सदासीत्तदानीं नव्योमा परोयत्
किमावरीवः कुहकस्य शमन्नमः किमासीद् गहनं गभीरम्॥
अन्यच्च -
॥ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत॥
॥ ऋग्० वेद॥
॥ तै० त० उ०॥ ॥ कृ० उ०॥
यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै॥
एवं वा अरेऽस्य महतो भूतस्य निश्वसितमेतद् ऋग्वेदो यजुर्वेदः
सामवेदोऽथर्वाङ्गिरसः॥

(४) अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्॥
दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुः सामलक्षणम्॥ म० स्मृ०॥
(१-२३)

त्वं वेदे निहितमेवेति सभे विदाङ्कुर्वन्त्येवेति विद्वांसः। ऋग्वेदस्य वाह्याभ्यन्तरिक तत्त्वं समवलोक्य बहुदेववादस्य प्राधान्यं दृष्टिगोचरतां प्रयाति। वैशिष्ट्येन त्रयास्त्रिंशद् देवतानां स्तुतिपरक मन्त्राः ऋग्वेदे प्राप्यन्ते। अमी देवाः प्राधान्यतया त्रिषु वर्गेषु विभक्ताः विद्यन्ते द्युस्थानीयान्तरिक्षस्थानीय पृथिवीस्थानीय भेदात्।

वेद भाष्यकार विचारानुसारं तावदार्यस्तु सततं यज्ञं कुर्वन्नेवाऽसीत्। एवं तस्मिन् यज्ञे सर्वां वैदिकमन्त्राणां भवतिस्म पाठः। ~~मन्त्र~~ मन्त्राणां निरन्तरं कृत पाठ वेलायामाहूताः जायन्ते स्म देवाः। प्रायशः सर्वे मन्त्राः देवपरकत्वमेवावलम्बन्ते। परमेतेषां विनियोगस्तावत् यज्ञ एव जायते स्म।

यद्यपि ऋग्वेदे विभिन्नानां देवानां कृतोपासना लोचनगोचरतां याति। किन्त्वयं मन्त्राणां बाह्यार्थ एव। वेदानामान्तरिक मूल सन्देशः एकस्याः परमशक्तेः स्वरूपस्योद्घाटन मात्रम्। तेन विभिन्नाः खलु वैदिक ऋषयः- एकां चेतन शक्तिं समुपासन्ते स्म। (१)

भगवान् यास्कोऽपि देवानां विभिन्नत्वेऽपि तदात्मैकत्वं सुनिश्चितमेव। (२) ऋग्वेदस्य दशम मण्डलीय पुरुष सूक्त वर्णन प्रसङ्गे एकेश्वरवादस्य प्रतिष्ठां चकार। नासदीय सूक्त वर्णन प्रसङ्गे संसारोत्पत्ति प्रक्रियां व्याख्यातवान्। अस्मिन् नासदीय सूक्त वर्णनप्रसङ्गे परमात्म तत्त्वं संसारोत्पत्ति रहस्यञ्च सुन्दरप्राञ्जल भाषया व्यञ्जीक्लपत्।

लोकमान्य तिलकोऽपि सूक्तमिदं मानवसमाजाय सर्वश्रेष्ठं चिन्तनं प्रतिपादयामास। अनेनैव सूक्तेनैव वदिक दर्शनं चरम विकासतां प्रापत्। (३)

वास्तविकन्यार्यणा कृते सत्यमिदं ऋग्वेद साहित्यं साहित्यसंस्कृतीनां सर्वस्वमेव। सत्यमिदं यद्यं ज्ञानराशिर्वेदः समस्ते संसारे समेषां साहित्यानामपेक्षया नितान्तं प्राचीनत्वं वैशिष्ट्यञ्चाधत्ते। यस्यां वेलायां समस्तेभूमण्डले संस्कृतिसाहित्ययोः न कापि प्रभा नितरामुदीयमानाऽऽसीत्। तस्यामेव वेलायां तावदार्यचरणाः समस्ते खल्वार्यावर्ते समाजानां विविधान् समाकलय्य परमपितुः परमेश्वरस्य कृपाकटाक्ष लवलेशं वैलक्षण्येन मन्त्रात्मकोपदेशं सम्प्राप्य वेदपुरुषमीश्वरमद्राक्षुः। अतएव श्वेताश्वतरोपनिषदि वचनमिदमाचचक्षे। (३)

सायणाचार्योऽपि तैत्तीयारण्यकभाष्ये प्रसङ्गमिमं लिलेख यत् सत्यपि वेदे तावदपौरुषेये यद्यपि कर्तारो न सन्ति तथापि कल्पादावीश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्रकृत इत्युच्यन्ते। भगवान् मनुरपि-४

अनया पर्यालोचनया स्पष्टमागच्छति यद् वेदस्य रचना नितरामीश्वरीयावीष्कृतीति। सृष्टिप्रथमचरणे परमेश्वरः स्वयमेव ज्ञानमिदं सर्वप्राथम्येनाग्निवाय्वादित्याङ्गिरोभ्यः प्रादात् नितरामुपदेशम्। इमे परमर्षयस्तु प्रदत्तोपदेशान् लोके प्रकाशयितुं प्रायतन्त। वैदिकमन्त्रोपदेशमासाद्य ते ऋषयस्तु—

(१) ऋषयो मन्त्रद्रष्टारः" "यास्क"

(२) न्यायविस्तार" "माधवाचार्य"

"सत्यार्थ प्रकाश" दयानन्द

मन्त्रद्रष्टार: समभवन्। अतएव यास्काः ऋषिशब्दार्थमव्याहार्षुः।

(१) यद्यपि जिमसैन वेवर मैक्स मूलर प्रभृतयो पाश्चात्य विचारकाः वेदानामनित्यत्वं स्वीकृत्य तेषु ऋग्वेदस्य प्राचीनत्वमवलम्ब्य याथातथ्य रूपेण वेदानां समयं निर्धारयितुं प्रायतन्त। तथापि दयानन्द लोकमान्यतिलक बालकृष्ण दीक्षित विनाश चन्द्र प्रभृतयो विद्वांसः तेषां विचारप्रकारं समालोच्य ऋग्वेदस्य रचना काल सन्दर्भमाकलय्य दर्शितवन्तः स्वविचारचातुरीम्।

विदन्ति ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादि पुरुषार्थाः" इति वेदाः।

स्वामी दयानन्दस्तु विदन्ति जानन्ति विद्यन्ते भवन्ति सर्वा विद्या यैर्येषु वा स वेदः।(२) सोऽयं गद्य पद्य गानलक्षणतया त्रयी संज्ञितो वेदः ऋग् यजुः सामार्थवेति चतुःसंहितासु विभक्तो विषयभेदात्। अतएव गद्यपद्यगानात्मकतया वेदमन्त्राः त्रिषु विभक्ताः सन्तिष्ठन्ते।

आर्याणां विचारानुसारं नित्यो वेदः तावदपौरुषेयत्वमवलम्बते। केचन विद्वांसस्तु - ऐतिहासिक पद्धत्या वेदानां महत्त्वं सर्वोपरी विद्यते। तदपरो विद्वांसस्तु पक्षमिमं नाङ्गीकुर्वते। वैदिक साहित्ये वसिष्ठ विश्वामित्र कण्व दुष्यन्त भरत प्रभृति ऋषि समाजानां वर्णनं याथातथ्य रूपेण लोचन गोचरायते। प्रस्तुत वर्णनक्रम मर्यादां समीक्ष्यावगच्छन्तो विद्वांसः मानवानां विविध सामाजिक प्रकारं समासाद्य तन्निरूप्य च संसारेऽस्मिन्ननुपम ज्ञान राशित्वमाकलयन्ति।

तेन स्कन्दस्वामी पक्षमिममाकृष्य वचनमिदमुवाच यदौपचारिकोऽयं मन्त्रेष्वाख्यान समयः। परमार्थेन तु नित्य पक्ष एव। परन्तु दयानन्दाय नायं पक्षः रोचते।(३)

प्राचीन शास्त्रावलोकनेन विदाङ्कुर्वन्ति विद्वांसः प्रतिवेदमनेकाः शाखाः विद्यन्ते। चतुर्णां वेदानां त्रिंशत्संख्योत्तरैकादश शतकाः शाखाः विद्यन्ते। प्रति शाखं ब्राह्मणारण्यकोपनिषत्कल्पभेदात् पारावार प्रवाह इव वेदानामनन्तत्वं संसिद्धमेव।

परं साम्प्रतं दौर्भाग्यवशादेव बह्व्यः शाखाः नोपलभ्यन्ते। उपलभ्यन्ते च कियत्यः। एतावता स्पष्टं सिद्ध्यति यदनन्तालोकस्य वेदस्य सूक्तावलोकनं तच्चिन्तनमननेभ्यश्च दर्शनशास्त्रं प्रादुर्बभूव।

अतएव वेद चिन्तनमनन मूलकतया समुत्पन्नस्य दर्शनशास्त्रस्य महत्त्वं नापोह्यं प्रेक्षावताम्। एतदेव वैशिष्ट्यं पौरस्त्य दर्शनस्य। भारतीयदर्शनस्य प्रवाहः सुदूर वैदिककालादारभ्य साम्प्रतं पर्यन्तं निर्विच्छिन्नरूपतया समागच्छन्नेवास्ति। नान्यस्मिन् देशे दार्शनिक विचारधारा प्राचीन

(१) "भारतीय दर्शन" "बलदेव उपाध्याय"
भारतीयदर्शन न० कि० "देवराज"

(२) रीलीजन ऐण्ड फिलासफी आफ वेद" "कीथ"
पृ०- ६३४- ३८"

कालादित्र्यं प्रवाहिता विद्यते। आधुनिक समयेतु महत्त्वमाकलयत् पाश्चात्य दर्शनं स्वजीवने विपुल विकासं प्राप्तुं निर्विच्छिन्नतया नैव शशाक। पाश्चात्य दर्शनोत्पत्तिः विक्रम पूर्व सप्तम शतके प्राचीन यूनान प्रदेशे सञ्जाता। परन्त्वधुना काल कालकवलिता एवं निरुद्ध प्रवाहा समभवत्। अतएव पाश्चात्य दर्शन प्रवाहः क्षुद्रनद्याः प्रवाह इव कदाचित् प्रवहति कदाप्यवरुद्धतां प्रयाति।

पौरस्त्य दर्शनस्य धारा प्रवाहस्तु पुण्यसलिलायाः मन्दाकिन्याः प्रवाह इव निराबाध गत्या नितरां निरन्तरं प्रवहति। यस्तावत् परमपावन सलिलायाः मन्दाकिन्याः प्रवाहः नद नदी सलिल चपल तरङ्गैः परिपुष्टत्वमाकलयन् सरसत्वं समुद्भावयन् शस्य श्यामलतया स्वनिश्चित गन्तव्य स्थानमाकलयितुं समर्थत्वेन सर्वदा प्रवहन् विराजते। दीर्घकाल जीवनान्तराले विभिन्न सभ्यता सम्पन्न महानुभावानां सम्पर्केण विचारान्तर प्रभावः नैस्मिन् पौरस्त्य दर्शने परिलक्षितो भवति। अपितु स्व विचारोदात्ततया एवं विचार वैपुल्येन च दर्शनान्तरे प्रकृष्ट प्रभावं सम्पादयितुमवश्यमेव क्षमते।(१)

प्राचीन यूनानस्य विचार मूर्धन्य पाइथागोरस महानुभावस्य धर्मदर्शन सिद्धान्ते विशिष्याहिंसा पुनर्जन्म सिद्धान्तेष्वपि सञ्जात पौरस्त्य दर्शन प्रभाव घटना ऐतिहासिक साक्ष्येण प्रमाणितैव वरीवर्तीति। सूफीसम्प्रदाय विदां विचारे वेदान्त तन्त्र सिद्धान्तस्य प्रभावः वैशिष्ट्येनावलोक्यते। एवं दाराशिकोह महोदयोऽपि फारसी भाषाया मुपनिषदमनूद्य तत्सिद्धान्तं स्वधर्मावलम्बिनां समाजेऽवबोधयितुं महान्तं स्तुत्यप्रयासं सम्पादितवान्। फारसी भाषायां कृतोपनिषत् साहित्यं लैटिन भाषायामनूद्य भारतीय विचार सौष्ठवस्य प्रथम परिचयस्तु योरोप दार्शनिकानां समभवत्।

नितान्तमधीत्योपनिषत् साहित्यं जर्मन देशस्य प्रसिद्ध दार्शनिकः शोपेन हावर महोदयोहि तदुपनिषत् सिद्धान्तमधीत्य तद्विचारेण प्रभावितः सन् कियतः सिद्धान्त ग्रन्थान् तमनुसृत्याऽरचयत्। तत्सिद्धान्तमास्वाद्य तद्विचारोदारेण महता परितुष्य स्वहृदयोद्गारं व्याजहार यदुपनिषत् साहित्यमेव मम जीवनम्। अथच मानव जीवने नितरामभ्युदयाय शान्त्यै वा किमपि दर्शनं वाञ्छति तदोपनिषद् दर्शनमेव।

अद्यः प्रायः पौरस्त्य दर्शन महत्त्वपूर्ण ग्रन्थानुवादः संसारस्य समस्त सभ्य भाषायां सञ्जायते। अनयानुवाद परम्परया भारतीय विचार शास्त्रस्य प्रभावः प्रत्यक्षाप्रत्यक्षतया संसारस्य प्रतिदर्शने प्रतिधर्मे स्पष्टमेव विद्यते। अनया विकास क्रम मर्यादया दर्शनान्तर विचार प्रभावमन्तरैव पाश्चात्य दर्शनेषु भारतीय दर्शनस्य नितान्तं वैशिष्ट्यं परिलक्ष्यते।(२)

(१) ईश्वासिद्धेः ॥ "सांख्य सूत्र" कपिल ॥

(२) "क्लेश कर्म विपाकाशयैपरामृष्टः पुरुष विशेषः ॥
"योगसूत्रम्" पातञ्जल- १-(२४)

॥ दर्शनस्योद्देश्यम् ॥

भारतीय तत्त्वज्ञानमिव भारतीयधर्मज्ञानं व्यापकं विशालं विवेचनात्मकञ्च। अतएवेयं जनश्रुति र्नैव समुन्नति मार्गं व्याघातिका विद्यते। ऐहिक पारलौकिकतत्त्वानि विश्लिष्य स्व तार्किक प्रतिभानां समुपयोगमाकलयितुं पौरस्त्यदर्शनस्य दर्शनत्वं तावदेव संगच्छते। यावत् धार्मिकपरम्परेयं नैसर्गिक कार्येभिर् व्याघाताय न प्रवर्तते। प्रवर्तते चेत्तदा दार्शनिक ~~[illegible]~~ विचाराणां नैसर्गिक विकासः कदाचिदेव जायते।

यूरोपस्य माध्यमिकवेलायां ईसाई धर्मसम्प्रदायस्तावद् दर्शनं चिच्छेद। तर्कविपरीत धार्मिक सिद्धान्तं परिपोषयितुं स्व चातुर्यं प्रकटयामास। फलतः माध्यमिकवेलायां यूरोपीय तत्त्वज्ञानस्य प्रवाहो नितान्तमवरोध। केवलं सलिल विहीन जलाशय इव यूरोपीय तत्त्वज्ञानं निःसारत्वमेवाऽऽससाद।

परन्तु परमपुण्यमये भारतक्षेत्रे विषमेयं परिस्थितिः न कदापि समुपस्थापिता। प्रारम्भकालत एव भारतीय तत्त्वज्ञानं समीक्षात्मकत्वमाकलयत्। तार्किकप्रतिभायाः परमनिकषे धार्मिक मानवीय सिद्धान्तं परीक्षितुं न कदापि वैमुख्यं भजते। परमात्मतत्त्व विषय निरूपण सन्दर्भेऽपि स्वतन्त्रविचारं प्रकटयितुं नैव कदापि सङ्कोचमञ्चति। यद्यपि सांख्य शास्त्रं परमात्मनः सत्त्वविषये मौनावलम्बनमेवाऽऽकलयामास।

किन्तु ते दृढप्रतिज्ञामासाद्य प्रतिपादयन्ति यन्नहि कोऽपि दार्शनिकः तार्किकयुक्त्या परमात्मतत्त्वं संसेद्धुं प्रगल्भतामाकलयति।(१) योगदर्शनं तु निरतिशय ज्ञान सम्पन्न परमपुरुषस्य कल्पनां स्वीकुरुते।(२)

~~परन्तु केवलमेक एव~~ परन्तु केवलमेक एव नैयायिकः जगत्कर्तृत्वेनेश्वरसत्तामुपकल्पयति। मीमांसा दर्शनं नैयायिकाभिमतमीश्वरं खण्डयितुं पूर्वपक्षे पर्याप्तरूपेण तत्प्रतिपादनं कुरुते। ~~जगतानि स~~ जगतीसमस्तानि वृत्तानि नितान्तमपूर्वाख्य कर्मणा संचोदितान्येव सन्तिष्ठन्ते।

बौद्ध जैन दार्शनिकानां संसारस्य कार्यकलापं व्याख्यातुं परमेश्वरं प्रति नास्ति कोऽपि पक्षपातलवलेशः। भौतिकवादिनश्चार्वाकाः परमकर्कशवचसा परमेश्वरं निराचक्रुः। वैदिक विधि विधानस्य नितान्तमस्वाभाविकतया तर्कविरुद्धतया च हास्यमचीकरन्। ब्राह्मणाय पुरोहिताय वा नितान्तमपशब्दं प्रयुक्तवन्तः।

परन्तु भारतीय दर्शनस्येतिहासे वेदवाह्य चार्वाकस्य तावदेव महत्त्वं लोचनगोचरायते यावदेव महत्त्वं वेदानुयायिनः नैयायिकस्य। निरीश्वरवादिनः सांख्यस्य तावदेव महत्त्वं सन्तिष्ठते यावद् महत्त्वं ब्रह्मप्रतिपादक वेदान्तस्य। अनेन प्रकारेण भारतीय तत्त्वज्ञाने या व्यापकता, विवेचनाशक्तिश्चालोकनीया चेतोहारि नितरामेव मुदा दृश्यते

(१) "आत्मा वा अरे द्रष्टव्यः" ((बृ० उ०))

(२) "आत्मनः स्वरूपेणावस्थिति मोक्षः"

ह्लादयन्ति ।

संसारस्य वास्तविकत्वं परिचाययितुं स्वकुशाग्रधियाऽऽर्यावर्तप्राचीन तपोनिष्ठपरमर्षिकृत प्रयत्नः विचारशास्त्रस्येतिहासे नितान्तं वैशिष्ट्यं धत्ते। प्रतिपलं परिवर्तित वस्तूनामन्तस्तले विद्यमानैकत्वं नितरां सदान्वेष्टुं वैदिकपरमर्षिणा विहित प्रयासः पौरस्त्य दर्शने श्लाघ्यः।

यथा परिवर्तनशील ब्रह्माण्डे नितान्तमपरिवर्तनशीलस्य तत्त्वस्य सत्ता विद्यमाना विद्यते। तथा ब्रह्माण्डस्य निखिलस्याभ्यन्तरे नितान्तमपरिवर्तनात्मकं वस्तु सर्वदैव जागर्ति। अस्यैव ब्रह्माण्डनियामकस्य सत्तायाः नाम ब्रह्म विद्यते। तथा पिण्डाण्ड नियामक सत्तायाः संज्ञा तावदात्मेति। प्राच्य दार्शनिकास्तु ब्रह्माण्ड पिण्डाण्डयोः सर्वतोभावेनैक्यं स्वीचक्रुः। ब्रह्मात्मनोरैक्यमपि प्रतिपादितवन्तः।

नहि ब्रह्म किमप्यलौकिकं वस्तु विद्यते किन्तु सर्वे प्राणिनः स्वाभ्यन्तरे तन्नियामकस्याऽऽत्मनः सत्तामनुभवन्त एव तद्ब्रह्म स्वीकुर्वते। अतएव ब्रह्म साक्षात्कर्तुं नितान्तमात्मावगमनमेव श्रेयः। आत्मतत्त्वस्य साक्षात्कार प्रयासः नितरां प्रयतितव्यः। समस्तेषु प्रियपदार्थेषु सर्वतः तावदात्मैव प्रेयान्।

किं तावदात्मनः श्रेष्ठत्वं प्रमाणयितुमपेक्षते ? जीवनस्य समस्तेषु कार्येषु आत्मनः नैसर्गिकी शक्तिः कार्यं कुर्वती लोचन गोचरायते। सर्वेषां वस्तूनां पर्यवसानं आत्मन्येव। शिक्षालये विद्याध्ययनं कुर्वतां छात्राणां प्रयोजनमन्ततो गत्वाऽऽत्मनः सुखमेव विद्यते नान्यत् किमपि प्रयोजनम्। अतएवायमात्मा सर्वेषां वस्तूनामपेक्षया प्रेयान्। विशाल संसारकेन्द्रे तावदयमात्मा प्रेयान् विद्यत इत्येव दृष्टिपथं प्रयाति। अतएव भगवतीश्रुतिस्तावदुपदिशति।(१)

मोक्षकल्पनायां पर्याप्त मतभेदतयाऽपि विभिन्नाः खलु दार्शनिकाः विषयेऽस्मिन् वैषम्यं नैव भजन्ते। अतएवेदं कथनमपि संगच्छत एव।(२) आत्मैव तावदवगन्तव्यः। प्रत्येक दर्शनस्य तदेव लक्ष्यं विद्यते। भवतु नाम तावत् ब्रह्मणः भिन्नत्वमभिन्नत्वं वेत्यन्यत्।

बृहदारण्यकोपनिषदः प्रसिद्धतमैषा कथा सर्वजनवेद्यैव। यत् समागतायां वृद्धावस्थायां दार्शनिकशिरोमणि याज्ञवल्क्यः स्वकीयां सम्पत्तिं विभक्तुमिच्छामि युवयोः। दार्शनिकशिरोमणेः याज्ञवल्क्यस्य वचनमाकलय्य प्रस्तुत विचार सन्दर्भमसहमाना मैत्रेयी सकरुणया वचनमिदमुवाच यत् किं वित्तेन परिपूर्णा मही सर्वा कथमप्यमृतत्वमुपपादयितुं शक्नोति। किम्। समस्त भूमण्डलस्यैश्वर्यमपि नितान्तमासादयन्तोऽपि महानुभावाः नामरत्वमुपेतुं शक्नुवन्ति। अपितु जीवनेऽस्मिन् समस्तानन्द

(१) आत्मा द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः
आत्मनो दर्शनेन श्रवणेन मत्या विज्ञानेन सर्वं विज्ञातं
भवति॥
बृ० उ० २-४-८

(२) आत्मा तावात् द्रष्टव्यः श्रुतिवाक्येन मन्तव्यः योगेन निदिध्यासितव्यः॥(बृ० उ० भा० ॥

(३) श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः॥
मत्वा तु सततं ध्येय एते दर्शन हेतवः॥

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः॥
("मनुस्मृति" ॥२-१३")

सामग्र्यां सञ्जातायामपि नामत्व विषयिणी जिज्ञासा शान्ता। अनन्त धन भोग विलास साधनानि नामत्वं दातुं शक्ष्यन्तीति चेत् नावश्यकता तेषां केवलमहं वाञ्छामि तावदमत्वम्। दार्शनिक शिरोमणिर्याज्ञवल्क्यः ध्यानावस्थित चेतसाऽऽध्यात्मिकत्वमुपदिदेश। यस्तावदुपदेशः भारतीय धर्म दर्शनस्येति हासे सदाऽमत्वं प्राप्नोत्येवेति निश्चितम्। नवा अरे पत्युः कामाय पतिः प्रियो भवति किन्त्वात्मने। नवा अरे जायायै कामाय जाया प्रिया भवति किन्त्वात्मने। नवा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति किन्त्वात्मनः कामाय प्रिया भवन्ति। नवा अरे सर्वस्य कामाय सर्वं प्रियं भवति किन्त्वात्मनस्तु कामाय। नवा ब्रह्मणः कामाय ब्रह्मप्रियं भवति किन्त्वात्मने।(१)

महर्षि याज्ञवल्क्योपदेशः भारतीय धर्मदर्शनयोः मूलभित्तिरेवेति निर्विवादसत्यम्। मानव जीवनस्य चामलक्ष्यमात्मनः साक्षात्कार एव। आत्मानं द्रष्टुं तावदुपनिषत् साहित्यं त्रीणि साधनानि नितरामुपदिशति।(२)

आत्मनः वास्तविकस्वरूपस्य ज्ञानं नितरामुपनिषद् वाक्येनावगन्तव्यम्। आत्मनिष्ठ ब्रह्म विद्या वर्णनं नितान्तमनुभव द्वारा कृतमस्ति। भारतीय साहित्ये नितरामनुपमोऽयं ग्रन्थरत्न वेदः समेषां ऋषियन्ये पत्रिकायते। अतएव भारतीय दर्शने वेदस्य महत्त्वमतिशेते। नानुभव मन्तरा किमपि वस्तु प्रतिपादयितुं शक्नोति।

महर्षिकृतानुभूति प्रतिपादन निरताश्रुतिः भगवतिः तावदात्मतत्वस्य वास्तविक स्वरूप प्रतिपादनाय प्रमाणम्। अस्मादेव कारणादात्मतत्त्व विचाराय परमावश्यकं तच्छ्रवणमिति भगवत्याः श्रुतेः।(३) आत्मानुभवस्य द्वितीयं साधनं मननमेव। प्रमाणादिभिरेवात्मानं मन्तुं शक्नोति। वेदे प्रतिपादित सिद्धान्तः निसन्दिग्ध एव। अतएव नात्र शङ्कावतारः। तथाप्यात्मा मन्तव्यः। तर्काणामुपयोगमन्तरा वास्तविकं स्वरूपं नितरामवगन्तुं नैव शक्नुयात्। निसन्दिग्धं ज्ञानमुपयोक्तुं मननमेवापेक्षते। मनन साधनस्य परमोपयोगित्वेन दर्शनस्य महत्त्वं सर्वानतिशेते।

आत्मनः साक्षात्काराय तृतीय साधनमपेक्षते निदिध्यासनमिति। योगदर्शने साधनमिदं प्रधानतया वर्णितं विवेचितञ्चास्ति। अष्टाङ्गं योग एव निदिध्यासनस्य प्रथम सोपानः। यावत् ध्यानेनात्मानुभवो न भवेत तावत् काल पर्यन्तं श्रवण मननयोः नास्ति कश्चनोपायः। अ अतएव स्वात्मानुभवः प्रमाणं दिक्कालाद्यनवच्छिन्नात्मनः। अतएव भर्तृहरिः स्वानुभूत्यैक मानस्तावदा

दिक्कालाद्यनवच्छिन्नान्त चिन्मात्रमूर्तये।
स्वानुभूत्यैक मानाय नमः शान्ताय तेजसे॥
॥भर्तृहरि॥

त्मा।(व) तावदेव [illegible] संशयं निराकर्तुं शक्नोति यावत् मनन प्रतिष्ठित चिन्तनं नैव चिन्तयेत्। तेनात्मतत्त्व साक्षात्काराय ध्यानमेव प्रधान साधनम्। निदिध्यासनमेवात्मतत्त्व साक्षात्काराय चरमोपायः।

भारतीय दर्शन साहाय्येनैव त्रिविधानि साधनानि धार्यितुं शक्यन्ते ऽऽत्मतत्त्व साक्षात्काराय। तेन धर्मदर्शनयोर्नितरां घनिष्ठः सम्बन्धोऽस्ति। धर्मस्य साहाय्य मनुप्राप्य भारतीय विचारशास्त्रं व्यापक दृष्ट्या ऽऽध्यात्मिकत्वेनैवानुप्राणित मस्ति। तथापि दर्शनस्याधारशिलायां प्रतिष्ठितत्वेनाऽध्यात्मिक धर्मः तर्कसिद्धान्तं प्रतिपादयितुं क्षमते।

अनेनैव प्रकारेणैव परम पुण्यमये भारत क्षेत्रे गंगायमुनयोः सम्मिलनमिवास्यां वैदिक संस्कृतौ धर्मदर्शनयोः परम सामञ्जस्यं संसूचयति। भारतीय दर्शने ऽऽत्मतत्त्वस्य परिकल्पना सूक्ष्मा मनोहरा च। यद्यपि पाश्चात्यदर्शनानि परमेश्वरस्तावदात्मानं निर्मातीति पक्षमाचक्षते। परमात्मैवात्मानं विनश्यति।

किन्तु पौरस्त्ये अयमात्मा नित्यः। अज्ञान परवशेन मानवः स्वशरीरे ममत्वबुद्धिं कुरुते। वस्तूनां प्रत्यक्षे शरीरमेव तावदावश्यकम्। हिन्दू दर्शने श्रुतेः प्रामाण्यं भजते। वेदान्त दर्शनस्य सैद्धान्तिकाऽऽधारः श्रुतिरेव। किन्तु मोक्षविषये तावदाध्यात्मिक तत्त्वस्य निकषोऽनुभव एव। योगवासिष्ठमपि विज्ञानमात्रत्वमेवात्मनः सदोद्गिरते।

यद्यपि पौरस्त्यदर्शनस्याऽऽध्यात्मिक शिक्षामाकलय्य पाश्चात्य विचारकौ अलबर्ट श्वाइजर महोदयौ वैदिक संस्कृतिमधिक्षिपतः यत् वैदिक दर्शनं वैदिकी संस्कृतिरपि पलायनवाद सिद्धान्तमधिकरोति। यतोहि दर्शनमिदं मिथ्यात्वमाकलयत् जगतः वैराग्यमेव शिक्षयति। मानवानां व्यावहारिक जीवने मानवानां सक्षमत्वं प्रतिपादयितुं नैव शिक्षयति। तथापि वास्तविक रीत्या पक्षप्रतिपक्षतया वस्तुतत्त्वं विविच्य सांसारिक विषय वस्तूनां मिथ्यात्वमूलकतया मानवानां सामाजिक पक्षमुपेक्षते। अतएव तेषामयमाक्षेपः निराधार एव।

अस्मादेव कारणात् भारतीय दर्शने कर्मफलमेव कर्मबन्धने हेतुः। सर्वकर्मफलक्षयमन्तरा नैव मुक्तिः सम्भवति। तेनाद्वैतवाद प्रतिष्ठापकस्य प्रवर तार्किक शङ्कराचार्यस्य ज्ञानान्मुक्तिः साधु संगच्छते। भारतीय प्रमाणशास्त्रे द्विप्रकारके प्रत्यक्षे स्वीकुरुते। एकं निर्विकल्पकं तदपरं

सविकल्पकञ्च। वस्तूनां प्रत्यक्षे बुद्धिमनसोः क्रियातः प्रागेव यज्ज्ञानं जायते तदेव निर्विकल्पकम्। बौद्ध दार्शनिक दिङ्नाग विचारानुसारं तदेव ज्ञानं निर्विकल्पकम्, यत्र नास्ति कल्पनायाः समावेशः। बौद्ध ज्ञान मीमांसानुसारं निर्विकल्पक प्रत्यक्षमेव प्रामाणिकप्रत्यक्षमुच्यते।

वैयाकरण विचारानुसारं नैव सञ्जायते निर्विकल्पक प्रत्यक्षम्। समस्तानि ज्ञानानि शब्दानुविद्धान्येव विद्यन्ते। रामानुजाचार्योऽपि शब्दहीन निर्विकल्पक प्रत्यक्षज्ञानमेव स्वीकरोति। परन्तु नैयायिक मीमांसकाभ्यां द्वे प्रकारके ज्ञाने स्वीक्रीयेते निर्विकल्पक सविकल्पक भेदात्।

विभिन्न दार्शनिकानां ज्ञानप्रक्रिया सन्दर्भे विभिन्न विचाराः दृश्यन्ते। तत्र न्याय दर्शन विचारानुसारं लौकिकालौकिक सन्निकर्ष भेदात् प्रत्यक्षाणां नानात्वमेव। आत्मापि तावन्नास्ति प्रत्यक्षगम्योऽपितु अनुमेयमात्रम्। अतएवात्मा ज्ञातामात्रं नास्ति किन्तु ज्ञान विषयत्वमाकलयति।

सन्दर्भेऽस्मिन् भारतीय दार्शनिकेषु नितरां मतभेदोऽस्ति। प्रभाकराणां विचारानुसारं प्रतिज्ञानं तावदात्मनः ज्ञातृत्वेनैव बोभवीति। उद्योतकराचार्यस्तु मानस प्रत्यक्ष विषयत्वमात्मनः स्वीकुरुते। जयन्त भट्टास्तु अनुमेयत्वमात्मनः स्वीकुरुते। परन्त्वुदयनस्तु उद्योतकराचार्य पक्षं कक्षीकरोति।

आत्मनः ज्ञान सन्दर्भे बृहदारण्यकोपनिषदो सिद्धान्तः दार्शनिक सिद्धान्तस्य चूडान्त निदर्शनमेव। चित्सुखाचार्यस्तु स्वप्रकाशत्वमेवात्मनः स्वीचकार। कुमारिलभट्टोऽपि अद्वैत पक्षस्य सामीप्यमेव गन्तुं कामयते। नहि तयोः वैषम्यं स्वीकरोति। पार्थसारथिमिश्रास्तु सदोदयन पक्षमेवावलम्बते।

दार्शनिक सिद्धान्तस्य चूडान्त निदर्शनमेवोपनिषत् साहित्यमात्मनः सन्दर्भे स्वविचारमित्थं प्रतिपादयति यदिमे लोका, इमे देवा, इमानि भूतानि सर्वमिदमयमात्मा। यथा दुन्दुभेर्हन्यमानस्य नहि तन्निर्गत शब्दान् आकलयितुं शक्नुयात् कोऽपि किन्तु दुन्दुभ्याघातेन तं गृहीतुं शक्नोति। ध्मायमानस्य शंखस्य तन्निर्गत शब्दान् गृहीतुं कोऽपि शक्नुयात्। आर्द्रैन्धमानेः पृथग्भूत धूम इवास्य महतो भूतस्य निश्वसितमृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि सर्वाणि नि

श्वसितानि।

सलिलप्रक्षिप्तं सैन्धवं सलिलात् दूरीकर्तुं किं कोऽपि क्षमते किन्तु सलिलोद्ग्रहणेन सैन्धवमप्यवगन्तुं शक्नोति। एवमिदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविशति। नहि देहपातानन्तरं कापि संज्ञा सन्तिष्ठते।

यदेवाविद्याजन्यद्वैतावस्थायां मानवानां व्यावहारिकपक्षे द्वैतत्त्वमाकलयन्नपि तत्सर्वमात्मैव। यस्तावत् आत्मा सर्वं विजानाति तं केन विजानीयात् विज्ञातारम्। समस्तेषु भौतिक ~~विज्ञानेषु~~ पदार्थेषु चिन्मात्रप्रकाशस्वरूपामृततत्त्वस्य प्रतीतिर्जायते स एवात्मा।

सर्वेषां भूतानां तावदयमात्मा मधु, आत्मनि सर्वाणि भूतानि मध्वेव। यश्चात्मनि तेजोमयोऽमृतमयो पुरुषः स एवात्मा, अतएवात्मा तेजोमयोऽमृतमयश्च। अयमेवात्मा सर्वेषां भूतानां तावदधिपतिः सर्वेषां भूतानां राजा च। अस्मादेव कारणात् सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाश्च सर्वे प्राणिनः आत्मिन्नेवात्मनि समर्पिताः।

इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश इत्ययं वै हरयोऽयं वै दश सहस्राणि बहूनि चानन्तानि तदेतद् ब्रह्म, स एवात्मा। कार्यकारणसंघाताभ्यन्तरे यस्तावदात्मा प्रतीयते स एवान्तर्यामी। एतदेव ब्रह्म। मुखनासिकाभ्यां सञ्चरणशीलः प्राणेन प्राणिति स एवात्मा। यस्तावदन्तर्यामी अपानेनापानिति स एवात्मा। यस्तावत् व्यानेन व्यानक्रियां सम्पादयति स एवात्मा। यस्तावदुदानेनोदानक्रियां विधत्ते स एवात्मा। अयमेव तावदात्मा साक्षादपरोक्षं ब्रह्म। नयं दृष्टिः द्रष्टारं द्रष्टुं शक्नुयात्। नयं श्रुतिः श्रोतारं शृणुयात्। नयं मतिः मन्तारं मन्तुं शक्नुयात्। अयमेव सर्वान्तरस्तावदात्मा। इदमेवात्मतत्त्वं विदित्वा क्षुधा पिपासा शोक मोह जरा प्रभृतीर् अतीत्य पुत्रैषणां वित्तैषणां परित्यज्य भिक्षाचर्यमुपयुज्यते।

यानि सर्वाणि भूतानि यत्रान्तर्भवति लोकोऽयं परलोकश्च यत्र विलीयते, संसारस्य प्रतिवस्तूनि सूत्रितानि विद्यन्ते स एव तावदात्मेति।

दार्शनिकशिरोमणि याज्ञवल्क्यः शाकल्यमुद्दिश्य प्रोवाच यदयमात्मा प्राणवृत्तौ प्रतिष्ठितः। प्राणास्तावत् व्याने प्रतिष्ठितोऽस्ति। उदाने प्रतिष्ठितोऽयं व्यानः। उदानस्तु समाने प्रतिष्ठितः। इमाः चतस्रः वृत्तयः प्राणे सन्निहिताः वे विद्यन्ते।

अत एवामुमात्मानं न कोपि विहन्तुं शक्नोतीत्यतः अविनाशी। न कोऽप्येनमात्मानं प्रतिबद्धुं शक्नोत्यतः नितामब-

(१)

अथात आदेशो नेतिनेति ॥ बृ०उ० · २ · ३ · ११ ॥

॥ बृ० आ० उ० ॥ ९ ब्रा० ३ — अ० ॥ (३)

(२) ॥ मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ॥
॥ अमरकोश ॥

(३) ॥ गीता ॥ ९ - १ -
॥ गीता - ६ ॥

द्धोऽस्ति। आत्मानमिमं न कोपि शोषयितुं शक्नोत्यतः नितामशोष्यः। न कोप्येनमुच्छेत्तुं शक्नोतीत्यतोऽच्छेद्यः। अतएवानिर्वचनीयोयमात्मा नेति नेति प्रतिपादयन्नेवोपदिदेश।(७)

अयमेव तावदुपदेशो भारतीय दर्शन शास्त्रे नितान्तमहत्त्वं भते। यदनुसृत्य जगतीतलेऽस्मिन् दर्शनस्य महती ख्यातिः प्रसिद्धिश्चाभवदिति। संसारे कुत्रापि किमपि दर्शनमधिकृत्य विचाराय प्रवर्तते तदा भारतीय दर्शने प्रतिपादितात्म तत्त्वविषयक सिद्धान्तमनुसृत्यैव। तावदिदं वैलक्षण्यं पौरस्त्य दर्शनस्य।

यद्यपि ब्रह्मणो भिन्नत्वमभिन्नत्वमित्यत्र पर्याप्तरूपेण मतभेदो लोचनगोचरायते, तथापि विद्यते भिन्नत्वमभिन्नत्वं स्वस्थाने तत्र नास्माकं विप्रतिपत्तिर्विचिकित्सा वेति। केचन गुणगुणिनोरभिन्नत्वं स्वीकुर्वन्ति तद्रूपे न क्षमन्ते भेदवादिनः। तेन केचन गुणाश्रयत्वं तद्रूपे तत्स्वरूपत्वमेव। तथाप्यविनाशी वाऽरेऽयमात्मा नात्र केषां विरोध लवलेश इति निश्चयं प्रतीमः।
(१)

((ज्ञान विज्ञान निरूपणम्))

संस्कृत वाङ्मये ज्ञानविज्ञान शब्दौ विभिन्नप्रकारेष्वर्थेषु पार्थक्येनैव प्रयुज्जाते। परन्त्वद्य प्रातः प्रचलित भाषायां सामान्यतया ज्ञान शब्दस्य प्रयोगं नितान्तमवगमनार्थ एव कुरुते किन्तु निश्चित सिद्धान्त एव विज्ञान शब्दं प्रयुङ्क्ते। आङ्गल भाषायां साइन्स शब्दस्यानुवादः विज्ञानं जायते। यथा भौतिक विज्ञानं रासायनिक विज्ञानं मनोविज्ञानमित्यादि।

अमरकोशकार विचारानुसारं ज्ञान शब्दस्य प्रयोगो मोक्षार्थे प्रसिद्धोऽस्ति। विज्ञान शब्दश्च शिल्पशास्त्रयोरेव।(२) परं दार्शनिक भाषायां ज्ञान विज्ञानयोः प्रयोगस्तु अर्थस्वातन्त्र्यं भजते। यतोहि भगवान् श्रीकृष्णः गीतायामर्जुनोपदेशव्याजेन निरवोचत्।(३)

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते।।

अन्यच्च —

इदं ते गुप्ततमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।

अनेन वाक्यप्रबन्धेन ज्ञान विज्ञानयोः प्रयोगः [illegible] नितान्तमुपदेश विषयत्वमाकलयति। नात्र शिल्प विद्यायाः एवं साइन्स वि

(१) "गीताभाष्य" "शङ्कराचार्य"

(२) "गीता – मधुसूदनी"

(३) नवैकादश पञ्चत्रीन् भावान् भूतेषु येन वै।
ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम्॥ ११।१९।१४
एतदेव हि विज्ञानं न तथैकेन येन यत्
स्थित्युत्पत्तिलयान् पश्येद् भावानां त्रिगुणात्मनाम्॥
"श्रीमद्भागवत" ११।१९।१५

षयस्यापि चर्चा दृश्यते। किन्त्वात्र पमोल सन्दर्भे ज्ञानविज्ञानयोः प्रयोगो परम कारुणिकेन भगवता श्रीकृष्णेनाऽकारि। अतएवैतद् मूलकाभिप्राय मनुसृत्यैव ज्ञानविज्ञानयोर्भेदः भगवता प्रयुक्तः।

भगवच्छङ्कराचार्य व्याख्यामाकलय्य शब्दमात्रमाकर्ण्य या बुद्धिः समुत्पद्यते तै ज्ञान मनमैकाग्रताभिः चेतः संयोज्य यद्स्पष्टमनुभवति तदेव विज्ञान पदवाच्यत्वमाकलयति। अतएव दार्शनिक भाषायां प्रचलित भाषायां वा प्रस्तुतशब्दानां विभिन्नार्थमवलोकयामः।(१)

संस्कृत व्याकरण विचारदृष्ट्योपसर्ग माहात्म्येन विविधेष्वर्थेषु विभिन्नेषु स्थानेषु विज्ञान शब्दं प्रयुङ्क्ते। अनया व्याख्यया प्रचलित भाषायां दार्शनिक भाषायां वा विज्ञान शब्दस्य प्रयोगः विशिष्टार्थं द्योतयति। साहित्य भाषायां तु विज्ञान शब्दस्य प्रयोगः शिल्पशास्त्रे दीदृश्यते।

श्रीमद् भगवद् गीतायाः विज्ञान भाष्ये सम्पादित वैदिक साहित्य समालोचनायां विद्यावाचस्पति महानुभावैः कृता विज्ञान व्याख्या त्रिषु भाषासु नितरां संगच्छते। तेषामयमन्तव्योऽस्ति यद् विभिन्न प्रकारकानन्त पदार्थेषु अनुगत तत्त्वमेकमेव ज्ञान पदवाच्यत्वमित्यभिधत्ते।(२)

एवमेकेनैव सर्वे पदार्थाः प्रादुरभूवन्। इयमेव तावत् प्रक्रिया विज्ञान पदवाच्यत्वमाकलयति। अनेकत्वेषु एकत्व दर्शनमेव तावत् ज्ञानम्। अनेकत्वात्मकेषु एकत्वज्ञानं विज्ञानमभिधत्ते। अतएव भगवद्गीतायां भगवान् श्रीकृष्णः स्पष्टमुद्घोषयति —

सर्वभूतेषु येनैकं भावमव्य मीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धिसात्त्विकम् ॥

एतावता श्रीकृष्ण वाक्येन स्पष्टमाकलयति विभिन्नप्रकारकेषु विभक्तेषु भूतेषु यस्यां प्रक्रियायां एकमेव नित्यं तत्त्वं दृश्यते तज्ज्ञानं सात्त्विकम्। इदमेव ज्ञानं मोक्षे समुपयुज्यते। अस्मादेव कारणात् मोक्षे धीर्ज्ञानमित्यमरकोषोऽपि नितरां संगच्छते।

श्रीमद्भागवतस्यैकादशस्कन्धे विज्ञान शब्दस्य प्रयोगः प्रस्तुत सन्दर्भं प्रमाणयति।(३) अनेन महर्षिवाक्येन स्पष्टं जायते खलु जगतामनन्तपदार्थस्य नवैकादशपञ्चषुत्रिषु रूपेषु विभक्त पृथक्त्वेनैव विज्ञानं विवेचयामास।

न्याय वैशेषिक दर्शनेषु नवद्रव्याणि विद्यन्ते। बौद्धदर्शने पञ्चस्कन्धाः, जैनदर्शने पञ्चास्तिकायः प्रत्यभिज्ञा दर्शने प्रकृतिपुरुषं परिकल्प्यैकादश तत्त्वानि स्वीकृत्य इति स्वसिद्धान्तानुसारं सर्वे मन्यन्ते। किन्त्वनया पद्धत्या समेषां महानुभावानां कृतेयं प्रक्रिया

(१) तीक्ष्णानि तरणीव कुण्ठी भवति शेमुखी।
पराकृत्तपदो दूराद् विचारश्चोप सर्पति ॥
तर्कोऽपि नैवोत्सहते यत्र तज्ज्ञान मर्जुन ।
प्रपञ्चो ~~[illegible]~~ यत्तु विज्ञान मज्ञानं तत्र साध्यधीः ॥
((श्रीमद्भगवत्त गीता))((ज्ञानेश्वरी))

(२) गीता – (अ० ७,

ज्ञानमेव व्यपदिशति। एकस्मादेव समेषां समुत्पत्तिः स्थितिश्च पर्यवसानमपि जायते। प्रक्रियेयं खलु विज्ञानस्य विद्यते। कूर्मपुराणस्योत्तरखण्डस्थित पञ्चदशाध्याये शब्दतत्त्वानां विवरणमेतादृशमेव लोचनपथे पथिकायते। तदनुसारं सर्वव्यापकोऽयं महेश्वर एव विद्यते। तस्यैव सर्वव्यापक महेश्वरस्य विभिन्नावस्था विशेषवैशिष्ट्येनायं संसारः प्रवर्तते। तावदियं ज्ञानप्रक्रिया कूर्मपुराणानुसारिणी वीवर्ति। महेश्वरज्ञान परिणाम वैलक्षण्येन चतुर्दश विद्यायाः विभिन्नानि तत्त्वानि जायन्ते। तत्त्वमिदमेव विज्ञान पदवाच्यत्वमाकलयति।

अएव श्रीमद्भगवद्गीतायाः ज्ञानेश्वरी टीकायां श्रीज्ञानदेवः व्याख्यामिमां स्वीचकार। (१) अतएव विज्ञानप्रपञ्चयोः सत्यमाकलनमेवाज्ञानम्। मोक्षशास्त्रातिरिक्तत्वेनातिरिक्तायां विद्यायां विज्ञानशब्दस्य व्यवहारः प्रचलति। एवमनेनैव कारणेन भौतिकशास्त्र रसायनशास्त्रयोः विज्ञान शब्द व्यवहारः। मोक्षप्रतिपादक विद्यायां ज्ञानत्व व्यवहारः।

अनेक तत्त्वेषु एकतत्त्वावलोकनं नितान्तं दुष्करमेव। तत्र बुद्धिः कुण्ठिता भवति। शब्दप्रामाण्य मङ्गीकुर्वतां जनानां तत्त्वात्मकं ज्ञानं सुस्पष्टमेव। योगसमाधि पर्यन्तं गम्यमानानां तत्त्वविदां कृते योगज धर्मसाहाय्येनैव दिव्यचक्षुषा तत्त्वमिदं प्रत्यक्षी कर्तुं शक्नोति। एकस्मात् तत्त्वतः विभिन्नपदार्थ निर्मितिमाकलय्य विज्ञानस्याधारभित्तिं स्वीकृत्य विभिन्नेषु तत्त्वेषु एकत्व दर्शनमेव ज्ञानस्य दार्ढ्यं प्रमाणयति। विज्ञानस्य साहाय्येनैव ज्ञानं विस्पष्टत्वमायाति। तेन गीताभाष्यकारस्यापि विज्ञान शब्दवाच्य विस्पष्ट ज्ञानावलम्बने सम्मतिरपि संभवति।

परन्तु दृष्टव्योऽयं तावत् वीवर्ति खलु ज्ञान विज्ञान व्याख्या प्रतिज्ञावचनमाकलयन् भगवान् हरीश्वरस्तु ज्ञान विज्ञान प्रकरणे अर्जुन व्याजोपदेशेन किमुपदिदेश। उपदेशेऽस्मिन् एकेऽनेकत्वस्याऽनेके एकत्वस्य च ज्ञान विज्ञान प्रतिपादनमपि संगच्छते। परमकारुणिकेन वासुदेवेन गीतायां मदीयैव प्रकृतिरष्टधेति प्रत्यपादि। (२) विज्ञानं प्रतिपाद्याऽस्मत् ~~परतरं~~ नान्यं परतरं किञ्चिद् विद्यत इत्येव पद्ये व्याजहार भगवान् वासुदेवः। सर्वं खलु ममान्तर्गतमेव। अनेनैव प्रकारेणानेकैकत्वात्मकं ज्ञानमेव।

ज्ञान विज्ञान प्रतिज्ञानन्तरमेव पद्धतिरियं व्याख्याता परमकारुणिकेन भगवता वासुदेवेन। तेन मननमारभ्य समाधिपर्यन्तं सर्वे विषयाः ज्ञान पदवाच्यत्वमासादयन्ति।

वेदान्त दर्शनानुसारं जगदीश्वरस्य ज्ञानस्वरूपत्वं जीवस्य विज्ञानरूपत्वञ्च प्रमापयत्युपनिषद् गवी। अतएव परमात्मनोरेक एवांशः

(कृ० कु०)

"पाश्चात्यं दर्शन "राधाकृष्णन" (२)

(३) पूर्वपश्चिम दर्शन नन्दकिशोर देवराज"

कथनं संगच्छते।(१)   “फिलासफी शब्द व्याख्या”

पाश्चात्य साहित्ये प्रतिपादित साइन्स: फिलासफी शब्दानामनुवाद: नास्ति तावत् संस्कृत साहित्ये दर्शन विज्ञान शब्द:। परीक्षणेषु दीयते पाश्चात्यविदुषा यत् कृत प्रायोगिक परीक्षणेव सिद्धान्तस्तावत् साइन्सश्रेण्यां समागच्छति।

कस्याप्युच्च विचारकस्योच्च बुद्धि प्रसूत सन्दिग्ध कल्पनैव तावत् फिलासफी पदवाच्यतामाकलयति। यथा यूनान देशस्य सुकरात महोदयस्य विचारसिद्धान्त: फिलासफीति संज्ञां लभते। सुकरातस्य जीवनपद्धति: ज्ञानपक्षमाकलय्य सदा प्रवर्तते। सुकरातस्य दार्शनिकजीवनादर्श: भौतिकेन्द्रियस्य स्वत: स्वत्वाभावात् परसत्वोद्भावनमेव। सकला तायां परिस्थित्यां परिकल्पयत्यात्मानमिति। न त्वात्मनिमन्ता। भौतिकेन्द्रियाणि स्वातन्त्र्यं भजन्ते। अयमेव तावत् सुकरातस्य रहस्यवादोऽस्ति।

यूनान देशस्य सर्वप्रथमोऽयं दार्शनिक: सुकरातो नहि कामपि पद्धतिमीचित् नवा किमपि निबन्ध ग्रन्थं प्रणिनाय। परन्त्वेषां विचारप्रसारस्तु मानस पटल पर्यन्तं निरावाधगत्यैव गत्वा व्यापकत्वमाकलयामास। सा तु सुकरातस्य जीवन पद्धतिरस्ति। नकोपि सुकरातीय सिद्धान्त:। जीवनस्य व्यावहारिक पक्ष~~माद्धार~~मासाद्य मानवचेतनाया: वैचक्षण्यं वैशिष्ट्यञ्चावलोक्य पाश्चात्यमानवाना मात्मन: सन्देशं प्रादात् सुकरात:।(२)

यद्यपि सुकरातात् प्रागेव तस्य रहस्यात्मक तत्त्वस्य तर्कयुक्त व्याख्यां कृतवान्। यया व्याख्ययाऽऽत्मचेतनाया: नितरामभिव्यक्तिरवगन्तव्या। पाइथागोरस महोदयानां रहस्यवाद: नितरां गभीरोऽस्ति। एतेषां विचारस्य प्रभाव: सुकराते जीवनादर्शे समवलोक्यते। सुकरातस्यात्म तत्त्व विषयक विचारास्तु पाइथागोरस महोदयानां रहस्यात्मक पक्ष मनुकृत्य प्रावर्तत।

पाइथागोरस महानुभावानां भौतिकी व्याख्या नहि सर्वांशे समत्वमासादयति परन्तु कतिपयांशे विशिष्ट भौतिक व्याख्यान पद्धतिरेव पाइथागोरस्य भित्ति: सुकरातस्य विद्यते। तथापि पाइथागोरस महोदय सृष्टिप्रक्रियोपनिषदां विचार प्रभाव प्रकाशेन प्रकाशिता।(३)

राहुल सांकृत्यायन विचारे पाइथागोरस महोदय: कदाचित् भारतं प्राप्योपनिषद: विचार सौष्ठव मालक्ष्य पक्षमिमाध्यात्मिकस्य स्वीचकार। अनयोपनिषद् विचार प्रेरणयाऽस्य रहस्यात्मक विचारोऽजायत। अयमपि रहस्य वादी दार्शनिक: पाइथागोरस

((पाश्चात्य दर्शन डा० सूर्यकान्त //

शब्द

महोदयः रहस्यात्मकतत्त्वं व्याख्यातुं ज्ञान शब्दमात्रं प्रयुङ्क्ते। नकदापि विज्ञानमपि। यद्यप्ययं महोदयः पञ्चभूतमधिकृत्य पक्षमिमं व्याख्यातवान्। तथाप्याध्यात्मिकतत्त्व व्याख्यानसन्दर्भे पाइथागोरसः वचन मिदमुवाच महताऽऽदरेण खलु मम जीवनस्याऽऽशाकिरणानि नितान्त मुपनिषद् वाक्यान्येव। पाइथागोरस महोदयस्य जीवनदर्शन मनुकल्पयति सुकरातः। (१)

पाइथागोरस महानुभावात् प्रागपि महादार्शनिकोऽयं थेल्स महोदयः दार्शनिक विचारधरातले समागच्छति। थेल्सोऽयं भौतिकतत्त्वानि व्याख्याय रहस्यात्मक पक्षमपि व्याख्यातवान्। किन्तु रहस्यात्मक पक्षस्य सूत्रमेवाऽऽकलयामास। महानुभावोऽयं सदा जलतत्त्वादेव सृष्टिर्जातेति पक्षमुदाजहार। अतः पञ्चमहाभूतेषु जलतत्त्वमेव ~~प्राय~~ प्रधानम्। कतिपये पुराणे सर्वप्राचीनेयं पद्धतिः वर्ततीति। वायुपुराणे प्रधानस्य जल तत्त्वस्य सृष्टिप्रधानकारणत्वमपेक्षते। वैदिक सिद्धान्तानुसारमयमपि पक्षस्तावत् प्रामाण्यं भजते।

तेन थेल्सस्य भौतिकी व्याख्या एवमाध्यात्मिकी व्याख्या च मानवानां व्यावहारिक जीवनमाधाराय सदा प्रवर्तते। परम्परेयं खलु यूनान दार्शनिकधारायां सुदूर कालपर्यन्तं प्रचलिता। परम्परामिमामधिकृत्याऽनेके दार्शनिकाः प्रादुर्बभूवुः। प्लेटो अरस्तू अफलातून प्रभृतयो दार्शनिकाः प्रस्तुत विचारचिह्न मवलम्ब्य तमेव पक्षं व्याख्यातुं प्रायतन्त।

प्लेटोमहानुभावस्तु भौतिकाध्यात्मिक पक्षयोः समन्वय वाञ्छया सामञ्जस्यं कल्पयितुं महान्तं प्रयासमकार्षीत्। किन्तु सर्वांशे नैव साफल्यमाससाद। वास्तविक पद्धत्या भौतिक तत्त्वस्य तर्कसम्मत व्याख्यां विधाय तस्य मूल्याङ्कनं विधातुं सदा चेष्टते स्म। मानवानां व्यावहारिक जीवने भौतिक तत्त्वं नितरामपेक्षतएव।

यत्त्वाध्यात्मिक पक्ष मन्तरा भौतिक जीवनं तुच्छमेवाऽऽभाति। तेन भौतिक जीवनस्य मूल्याङ्कनं नितरामाध्यात्मिकतत्त्वमेव। यद्यप्ययं प्लेटो महोदयः नितान्त माध्यात्मिक पक्ष मुद्दिश्य ज्ञान शब्दं प्रयुङ्क्ते। ज्ञान शब्दस्तावदाध्यात्मिक चेतनया सह नितरां सम्बद्धोऽस्ति। नहि मस्तिष्कक्रिया सा चेतना। कथंतु मस्तिष्कशक्तिः पञ्चभूतमभिव्याप्य सन्तिष्ठते। पञ्चभूत विनाश समये मस्तिष्कशक्तिरपि विनश्यति तेन नहि चेतना मस्तिष्क शक्ति प्रतिपाद्या। अतस्त्वेयं चेतना गुणात्मिका। सएव खलु नितरामात्म स्वभावः। तेनायं पक्षः पाश्चात्य दार्शनिकानां सधीयान् प्रतिभाति। यस्य सम्बन्धः विद्यते खलु आत्मनासह।

(१) "राहुल साँकृत्यायन" "यूनानी दर्शन"

राहुल साँकृत्यायन" "यूनानी दर्शन"

अनया व्याख्यया प्लेटो महाशयानां विचारानुसारं ज्ञानविज्ञानशब्दयोः शब्दः नितामात्मपरकत्वमासादयति। विज्ञानशब्दस्तु भौतिकविकासपक्षमाकलय्य सन्तिष्ठते।

अरस्तू महोदयोऽपि स्वदार्शनिकविचारपक्षानुसारं ज्ञानविज्ञानशब्दमाकलय्य प्रकारान्तरेणैव तद्व्याख्यां समुपस्थापयति। तदनुसारं ज्ञानपदमात्मवाच्यत्वमभिधत्ते। तद्वैपरीत्यमेव विज्ञानं स्वीकरोति।(१)

डेमोक्रितूनां परमाणुसिद्धान्तः पाश्चात्यदार्शनिकसिद्धान्ते महतीं ख्यातिमधिकरोति। तेषां परमाणुवादसिद्धान्ते सूक्ष्मकणान्येव परमाणुपदवाच्यत्वं स्वीकुर्वते। भौतिकतत्त्वेषु यानि सूक्ष्मकणानि यन्त्रपद्धत्या विज्ञातुं शक्नुवन्ति शक्ष्यन्ति वा स एव परमाणुः। अयमेव परमाणुः सृष्टिविकासं प्रवर्तयति।

ईसातः प्राक् चतुर्थशतके परमाणुवादसिद्धान्तः पाश्चात्यदार्शनिकविचारधारायां सर्वप्राथम्येन डेमोक्रितुः परमाणुमकल्पयत्। ततः परमाणुवादसिद्धान्तं स्वीकृत्य तद्दिनमारभ्य साम्प्रतपर्यन्तमपि परमाणुवादः वैज्ञानिकानुसन्धानस्याकर्षणत्वमुपगच्छति।

परमाणुवादपक्षमवलम्ब्य सञ्जातविकासपरिपाटीमवेक्ष्य परमाणून् निरतां विभज्य कियन्ति तत्त्वानि तत्र प्राप। अतएव विकासवादसिद्धान्तस्य प्रादुर्भावः डेमोक्रितुविचारदर्शनेनैव सञ्जातः।

राहुलसांकृत्यायनविचारे अयमेव डेमोक्रितुमहानुभावानां विचारानुसारप्रभावः न्यायवैशेषिकपरमाणुवादे समागतः। अनेन वाक्येन स्पष्टं जायते किल न्यायवैशेषिककल्पितपरमाणुवादे पाश्चात्यपरमाणोः प्रभावः सुतरां स्पष्टः।(२)

परन्त्वियं कल्पना निर्मूलैव प्रतिभाति। गौतमसूत्रस्य ततोऽपि प्राचीनात्। विक्रमपूर्वचतुर्थशतके पञ्चमशतके वा गौतमसूत्रं दृष्टिगोचरत्वं प्रयाति। अयमेव पक्षः प्रामाणिकः तर्कसम्मतश्च।

यद्यपि ~~वाल्मीकीये~~ तावदादिकाव्ये गौतमस्य चर्चा बहुचर्चिताऽस्ति। वाल्मीकेरादिकाव्ये तथागतजन्मकालात् प्रागेव पञ्चमशतके विद्यमानत्वं सिद्धमेव।

(ग) "आदिकाव्य" रामजाबालि प्रसङ्गः"

नात्र केषां समालोचकानां प्रतिभाति विवादावसरः। वाल्मीकिकाव्य समागत ~~जाबालिप्रश्न~~ रामजाबालि प्रश्नोत्तर पक्षं समीक्ष्य विज्ञायते विदुषा खलु भगवतः तथागतस्य जन्मकालतः पूर्ववर्तित्वमवश्यमेव। तार्किकयुक्त्या च समुचितोऽयं पक्षः प्रतिभाति। (१)

एतावता गौतम सूत्रस्य प्राचीनत्वं तथागतापेक्षया तात्कालिक समाजपरिवेशानुसारं प्रमाण तर्काभ्यां संवलितम्। अतएव गौतम सूत्रस्य तथागत सम्मत क्षणभङ्ग प्रक्रिया प्रक्षिप्तैव कतिपयानां विमर्शः। बौद्ध क्षणभङ्ग पक्षमवेक्ष्य तथागत परवर्तित्व कल्पना नैव प्रसीदयति विद्वज्जनचेतांसि। सर्वथा प्राचीनत्वमवलम्बते गौतम सूत्रं तथागतात्। अतएव देमोक्रितु महानुभावानां गौतम सूत्रे परमाणुवाद प्रभाव इति प्रलाप एव। बौद्ध प्रभाव प्रभावित ~~क्षणभङ्ग~~ क्षणभङ्गवादोऽपि प्रक्षिप्त एवेति युक्तिसम्मतम्। देमोक्रितु परमाणुवाद क्षणभङ्गवादाभ्यां नितान्तं प्राचीनत्वमवलम्बते भगवतः गौतमस्य सूत्रमिति निर्विवाद सत्यमाभाति।

अक्षपाद प्रणीत सूत्र क्षणभङ्ग प्रक्रियया परिचितोऽयं तथागत क्षणभङ्गवाद इत्यपि केचित्।

॥दर्शन विभागः॥

वेद संहितायामङ्कुरितस्य दर्शनकल्पद्रुमस्य शाखाभेदेन पौरस्त्य दर्शनं विभागद्वये देशकाल परिस्थित्यनुसारं विभज्यते। तत्रैकमास्तिक दर्शनं तदपरं नास्तिक दर्शनम्। साधारण भाषायां तदेवास्तिक दर्शनं व्यवहरति यस्मिन् दर्शने परमात्मनः सत्तां स्वीकृत्य विचाराय प्रवर्तते। परमात्मनः सत्तामपहाय विचाराय प्रवर्तमानं दर्शनं नास्तिक संज्ञां लभते।

परन्त्वयं दर्शन विभागः नितान्तमवैज्ञानिकः। कथंतु वैदिक दर्शनेऽपि ~~[illegible]~~ कर्ममीमांसायां कर्मणः महत्त्वं स्वीकृत्य फलायाऽपूर्वं परिकल्प्येश्वर सत्तां नैव मनुते। सांख्य दर्शनेऽपि प्रकृति पुरुषयोः संयोगेनैव सृष्टिः ~~[illegible]~~ प्रवर्त्यते। नैव तेनेश्वर सत्ता स्वीकृता।

बौद्धजैनचार्वाक दर्शनानि परमात्म सत्ताप्रतिषेध मूलकतया नास्तिकत्वं भजन्तां परन्तु मीमांसा सांख्ययोर्नायं शब्दः समुपयुज्यते। पाणिनिस्तु शब्दशास्त्रीय व्याख्यानमालक्ष्य नास्तिकास्तिक शब्दौ तद्विपरीतमेवाऽऽचचक्षे। अस्ति परलोक × इति मतिर्यस्यासौ

(९) “नास्तिको + वेद निन्दकः” मनुः ”

आस्तिकः। नास्ति पलोक इति मति र्यस्याऽसौ नास्तिकः। व्युत्पत्त्यानया जैन बौद्ध दर्शने नैव नास्तिक कोटौ समागच्छतः। पलोके विश्वास प्रतिपादनात्। न्याय सांख्य वेदान्त दर्शनमिव जैन बौद्ध दर्शने कर्मसिद्धान्तं ब्रुवाते। अतएव पलोक पुनर्जन्म व्यवस्था तत्सिद्धान्त सम्मतैव प्रतिभाति। ~~केवलमित्थं~~ केवलमित्थं पद्धतिः चार्वाक दर्शनस्य नास्तिकत्वं व्यञ्जयत्। अतः नास्तिकास्तिक व्याख्या नैव तर्कतन्त्र सम्मता। तेन भगवान् मनुः नास्तिकास्तिकौ निगमागम सम्मततयैवाबीभणत्। वेदप्रामाण मूलकतयाऽऽस्तिकत्वं तन्निषेध मूलकतया नास्तिकत्वम्। (व) तेन वेद निन्दाकर्तृत्व मेव नास्तिकत्वम्। अनेन मनुवाक्येन न्याय योग वैशेषिक मीमांसा वेदान्तेषु प्राधान्येनास्तिकत्वं संगतमेव। चार्वाक जैन बौद्ध दर्शनेषु नास्तिक व्यवहारः सदा निगम सम्मतैव।

परन्तु पौरस्त्य दर्शनस्यायं श्रेणीविभागः नैव साधीयान् इत्येवं वृणुते। पञ्चरात्र संहिता शैव संहिता शाक्त संहिता प्रभृति दर्शनेषु ब्रा वेदबाह्य सिद्धान्तस्य प्रतिपादनात् किमत्रापि नास्तिकत्वं भाषते। ब्रह्मसूत्रस्य तर्कपादे भगवान् बादरायणः पञ्चरात्र शैव सिद्धान्तयोः वेदप्रतिकूलत्व पक्षं कक्षीकृत्य सप्रमाणं तन्मतं चिच्छेद।

भगवान् शङ्कराचार्योऽपि पञ्चरात्र सिद्धान्तं खण्डनात्मकदृष्ट्या सदा ददर्श।

रामानुजाचार्यस्तु स्व मन्तव्य दिशा पञ्चरात्र सिद्धान्तं मण्डयामास। यद् भवतु परन्त्विदं वचः सत्यमभाति। पाशुपत सिद्धान्तं पञ्चरात्र सिद्धान्तमपि वेदसम्मततया स्वीचक्रे रामानुजाचार्यः। ((त्रयी सांख्यं योगः पशुपति मतं वैष्णमिति)) पद्यांशं दृष्ट्वा सुविचार्यच पशुपत वैष्णव मतानि वेदसम्मतान्येव प्रतिभान्ति।

तन्त्रमूलक दर्शनस्य पूर्वोक्त विभाजनेन ~~सम्य~~ नैव प्रामाण्यं सम्भवति। पाशुपत वैष्णव सिद्धान्तयोः वेदानुकूलत्वाऽनङ्गीकारोऽपि कर्म पुन जन्म दुःखात्यन्त निवृत्ति सिद्धान्तानां वेदानुकूलत्वं स्पष्टमेव। अतएवागम ग्रन्थाधार निर्मित पाशुपत वैष्णव सिद्धान्त माकलय्य तन्मूलक दर्शनोत्पत्तिः आस्तिक नास्तिक दर्शन विभागश्रेण्याः नैवोपयुक्तत्वं लभते। तस्मात् पूर्वोक्त विभाजनस्य-नौचित्यं नैक तर्क सम्मतमिति।

भक्ति सुन्दर कल्पनायाः महत्त्वमाकलयन् आगममूलमित्यवलम्बित सिद्धान्तः पञ्चरात्र शैव शाक्तानां पौरस्त्य दर्शने वैशिष्ट्येन महत्त्वं धत्ते। साधारण तया बौद्ध दर्शनस्य चतुर्णां सम्प्रदायानां (वैभाषिक सौत्रान्तिक योगाचार माध्यमिकानां) नास्तिक दर्शने विवेच

विपरीत-

विवेचनमिवास्तिक दर्शनेऽपि षण्णां दर्शनानां (न्याय वैशेषिक सांख्य योग वेदान्त मीमांसानां) सम्यक् विवेचनं दृष्टिगोचरतां प्रयाति। आस्तिकदर्शनेऽऽआगममूलक दर्शनस्य विवेचनाभाव: त्रुटिमाकलयति प्रतिक्षणम्। पौरस्त्यानां धर्मदर्शन सभ्यताद्वय: निगमागममूलकत्वमेव सदावलम्बन्ते। समेषां धर्म दर्शन सभ्यतानां तावदेका धारा सदा निगममूला, तदपराऽऽगममूला च। आभ्यां निगमागममूलक द्विविध विचार धाराभ्यां प्रभावित दर्शनस्य निरूपणमेव ~~आपकत्व~~ व्यापक दृष्ट्या सर्वौचित्यं प्रतिभाति।

अतएवागम निगम मूलक समस्तानि दर्शनानि हृदये येनाभ्युपगम्य नास्तिकास्तिकश्रेण्या: विभाग: तर्कतन्त्राभ्यां प्रमाणित:। ~~पौरस्त्य दर्शनस्येतिहासं चतुर्षु विभागेषु विभक्तुं शक्नुम~~:।

((दर्शनस्य कालविभाग:))

पौरस्त्यदर्शनस्येतिहासं चतुर्षु विभागेषु विभक्तुं शक्नुम:। वैदिककालोत्तरवैदिककाल सूत्रकाल वृत्तिकाल भेदात्। अस्मिन् पौरस्त्य दर्शनस्येतिहासे सर्वप्राधान्यतया वैशिष्ट्यं धत्ते वैदिककाल:। कालेऽस्मिन् ~~ऋग्वेदीयाथ~~ ऋग्वेदीयान्थर्ववेदीय संहितायां संकेतित तत्त्वविकास: ब्राह्मणारण्यकपथाभ्यां भवन् उपनिषद् महाप्रबन्धे पूर्णत्वमाकलयति।

एतेषां विवेचनं प्रातिभज्ञानबलादेव यथा सुन्दर पद्धत्याविहितं तदपि च समेषां चेतांसि नितामनुरञ्जयति। उपनिषत्कालीन दार्शनिक विचारं ~~पर्यालो~~ पर्यालोच्य स्पष्टं विज्ञायते यत् तत्कृत चास्य तत्त्वसाक्षात्कार: नितान्त मनुभव साहाय्येनैव सम्पादित:।

आत्मानुभव कृत साक्षात्कार: विद्वज्जन चेतांसि नितामह्लादयितुं सदा क्षमते। अयमेव तावदुत्तरवैदिककाल: महत: वैदिक ~~काल~~ धर्मस्य विरोधात्मक युगोऽस्ति। उपनिषत् काले विभिन्न वेदवाणी सुषुप्तापि जागर्ति। परन्तु प्रस्तुत वेदविपरीत भयाकुलावाणी ~~कर्ण~~ कर्णपथे पथिकायमानापि नह्युपनिषद्दार्शनिकानां चेतांस्याकुलयति।

उपनिषदां महत्त्वपूर्णयुगे व्यतीते वेदविरुद्धतर्का: वेदोपनिषद्दार्शनिक पक्षं छेत्तुं नितान्तमभ्युत्थाय धीरा: समुद्यतो बभूव। वेद विरुद्धप्रचारप्रसार निरता: सदा वैदिक पक्षमुपेक्ष

(१) १३-४-२८ ,, "ब्रह्मस्वरूप"
(२) (३-२) "न्यायस्वरूप"

न्ते स्म। तावदियंवेद विरुद्धवाणी नितान्त गुरुत्वं व्ययात्। वेद विरुद्ध पक्षेऽस्मिन् चार्वाकाणां प्रभावस्तु नितरां व्यापक आसीत्। किन्तु जैन बौद्ध दार्शनिकाः स्व प्रभावस्य विपुलतयाऽऽवान्तरकाले स्व सिद्धान्तं व्याख्याय सर्वान् लुलुभुः।

एवं मानवानां व्यावहारिक पक्षे मानव समुदायं स्वस्नेह वचसा समाकृष्य सिद्धान्त जालान् वर्द्धयामास। विफल प्रयासोऽपि स्व पक्षान् चकासर्तुं साफल्यमाससाद।

प्रस्तुत दर्शन कालं तावदावान्तर भागद्वये विभज्य वृत्तिकालोऽपि विभक्तः। तत्रैकः खलु सूत्रकालः तदपरः वृत्तिकालश्च। अस्मिन्नेव सूत्रकाले न्याय वेदान्त मीमांसा सांख्य योग वैशेषिक सूत्राणि निर्ममौ। तदाक्षेपपरिहारव्याजेन मुनयस्त्रिकालज्ञाः सूत्राणि व्याख्याय तमाक्षेपं परिहर्तुं प्रायतन्त।

~~[illegible]~~

उपनिषत् साहित्ये सूचित तथ्यान्याकलय्याऽनेके दार्शनिकाः स्वविचार पक्षमाश्रित्य स्व सिद्धान्तं सूत्ररूपेणाचीचकासत्। अत्र या सूत्ररचनया नावगन्तव्यमिदं तात्पर्यं खलु यदस्मिन्नेव समये दर्शन शास्त्रं प्रारभते। अपि विभिन्न स्रष्टाब्दानां तावदाध्यात्मिक गवेषणायाः परिनिष्ठितानि फलान्येव सूत्रतयाऽभूवन्। एषु सूत्रेषु पारस्परिक सम्बन्धोऽपि समुपलभ्यते। वेदान्त सूत्रेष्वपि मीमांसा या स्मृत्य एवः तत्सम्बन्ध मेव परिचिनुते। (१)

एवमेव न्याय सूत्रमपि परिचिनोति वैशेषिक सूत्राणि।- विभिन्न दर्शन सिद्धान्तानि निर्दिशति सांख्य सूत्रम्।(२) एतेषां सूत्राणां रचनाकाल सन्दर्भे विभिन्नाः खलु विद्वांसः विभिन्नानि मतानि समुपस्थापयन्ति। परन्तु समालोचकानुसारं विक्रमात् प्राक्-(४००) चतुशतकादारभ्य (२००) द्वितीय शतक पर्यन्तं प्रस्तुत सूत्राणां निर्माणकालः सदा स्वीकर्तव्यः।(३)

सूत्राणां शब्दावली नितरां सूक्ष्मा स्वल्पा निगूढा चेत्यतः वृत्तिसाहाय्यमन्तरा नहि तमर्थमवगन्तुं कोऽपि शशाक। तेन सूत्राणां रहस्यं विज्ञापयितुं भाष्यानि सञ्जातानि। एवं वार्तिकान्यपि बभूवुः। अन्यापि च टीका जाता। अस्मिन्नेव समये शबर कुमारिल वात्स्यायन प्रशस्तपाद शङ्कर रामानुज वाचस्पति उदयन प्रभृतयो दार्शनिकाः समभवन्। या

एतेषां तावदाचार्यप्रवराणां व्याख्याः नितरां मौलिकतया गम्भीरतया वा विद्वन्मण्डलेषु नितान्त मियं प्रामाण्यं यन्ति।

(૧) ૧૩-૪-૨૮ ,, "બ્રહ્મસ્વરૂપ"
(૨) ૧૩-૨ "ન્યાયસ્વરૂપ"

न्ते स्म। तावदियं वेद विरुद्धवाणी नितान्तं गुरुत्वं ययात्। वेद विरुद्धपक्षेऽस्मिन् चार्वाकाणां प्रभावस्तु नितरां व्यापक आसीत्। किन्तु जैन बौद्ध दार्शनिकाः स्व प्रभावस्य विपुलतयाऽऽवान्तरकाले स्व सिद्धान्तं व्याख्याय सर्वान् लुलुभुः।

एवं मानवानां व्यावहारिक पक्षे मानव समुदायं स्वस्नेहवचसा समाकृष्य सिद्धान्त जालान् वर्द्धयामास। विफल प्रयासोऽपि स्व पक्षाय चकासर्तुं साफल्यमाससाद।

प्रस्तुत दर्शन कालं तावदावान्तर भागद्वये विभज्य कृतिकालोऽपि विभक्तः। तत्रैकः खलु सूत्रकालः तदपरः कृतिकालश्च। अस्मिन्नेव सूत्रकाले न्याय वेदान्त मीमांसा सांख्य योग वैशेषिक सूत्राणि निर्ममौ। तदाक्षेपपरीहारव्याजेन मुनयस्त्रिकालज्ञाः सूत्राणि व्याख्याय तमाक्षेपं परीहर्तुं प्रायतन्त।

~~[illegible]~~

उपनिषत् साहित्ये सूचित तथ्यान्यालक्ष्यऽनेके दार्शनिकाः स्वविचार पक्षमाश्रित्य स्व सिद्धान्तं सूत्ररूपेणाचीचकासत्। अत्र या सूत्ररचनया नावगन्तव्यमिदं तात्पर्यं खलु यदस्मिन्नेव समये दर्शन शास्त्रं प्रारभते। अपि विभिन्न शताब्दानां तावदाध्यात्मिक गवेषणायाः परिनिष्ठितानि फलान्येव सूत्रतयाऽभूवन्। एषु सूत्रेषु पारस्परिक सम्बन्धोऽपि समुपलभ्यते। वेदान्त सूत्रेष्वपि मीमांसायाः रूढेः स्वः तत्सम्बन्धमेव परिचिनुते। (१)

एवमेव न्याय सूत्रमपि परिचिनोति वैशेषिक सूत्राणि। विभिन्न दर्शन सिद्धान्तानि निर्दिशति सांख्य सूत्रम्। (२) एतेषां सूत्राणां रचनाकाल सन्दर्भे विभिन्नाः खलु विद्वांसः विभिन्नानि मतानि समुपस्थापयन्ति। परन्तु समालोचकानुसारं विक्रमात् प्राक्-(४००) चतुशतकादारभ्य (२००) द्वितीय शतक पर्यन्तं प्रस्तुत सूत्राणां निर्माणकालः सदा स्वीकर्तव्यः। (३)

सूत्राणां शब्दावली नितरां सूक्ष्मा स्वल्पा निगूढा चेत्यतः वृत्तिसाहाय्यमन्तरा नहि तमर्थमवगन्तुं कोऽपि शशाक। तेन सूत्राणां रहस्यं विज्ञापयितुं भाष्यानि सञ्जातानि। एवं वार्तिकान्यपि बभूवुः। अन्यापि च टीका जाता। अस्मिन्नेव समये शबर कुमारिल वात्स्यायन प्रशस्तपाद शङ्कर रामानुज वाचस्पति उदयन प्रभृतयो दार्शनिकाः समभवन्। या

एतेषां तावदाचार्यप्रवराणां व्याख्याः नितरां मौलिकतया गम्भीरतया वा विद्वन्मण्डलेषु नितान्तं मियं प्रामाण्यं धत्ते।

(१) "भारतीय दर्शन" "उपोद्घात" "बलदेव उपाध्याय"

(२) "प्राच्य दर्शन समीक्षा"

महया चार्यप्रवराणां गभीररहस्यमुद्घाटयितुं व्याख्या साहाय्यमन्तरा कोपि क्षमते। किन्तु स्वतन्त्रसिद्धान्तं संस्थाप्य तत्तद्दर्शन सिद्धान्तानि विचकास। तार्किकयुक्त्या प्रतिपक्षं तावदुच्छेत्तुं बद्धपरिकस्याचार्यप्रवरस्य वैशिष्ट्यमिदम्।(१)

उपनिषत् प्रतिपादित सिद्धान्त तत्त्वानां तर्क साहाय्येनैव संस्थापनमेवाऽस्मै युगाय गौरववस्तु वीक्ष्यतीति। अयं कालः विक्रमात् शतकत्रयमारभ्य (३००) पञ्चदश विक्रमपर्यन्तं (१५००) सर्वैरनुमातव्यः। पौरस्त्य दर्शनस्य काल विभागस्तावदयमेव विज्ञातव्यः सामान्यतया।

यद्यपि समालोचकाय नायं काल विभाजनक्रमः रोचते तथापि प्रस्तुत काल विभाजनस्य नियमितत्त्वेन सुव्यवस्थितत्वेन चायमेव पक्षः स्वीकृतः सर्वैः। षड् दर्शन सिद्धान्तस्य परस्परं वैषम्यवयाऽपि कतिपयांशे तत्र समत्वं प्रतिभाति। किन्तु हिन्दूदार्शनिकस्तु अधिकारिणः भेदात् दर्शनस्य भिन्नत्वं स्वीकुरुते।

वस्तुतस्तु मानवानां नैसर्गिक मानसिक विकासः विभिन्नश्रेण्यात्मकः। कामपि प्रवृत्तिमवलम्ब्य नहि समेषां विचार धारा समाना। दर्शनस्य व्यावहारिक पक्षमासाद्य मानवानां बौद्धिक विकासानुरूपमेव दर्शनस्य प्रणयनम्। दर्शन सिद्धान्तस्य विकासः स्थूलादारभ्य सूक्ष्मपर्यन्तं सदा वर्द्धत एव।

विभिन्नेषु दर्शनेषु जगतामनुभवं व्याख्यातुं प्रवर्तमानौ न्यायवैशेषिकौ सर्वप्रथमौ विद्येते। तदनन्तरमेव सांख्ययोगः वैशिष्ट्यं लभते। यः खलु सांख्ययोगः हार्दिकानुभवं मानसिक प्रक्रियामपि प्रतिपादयितुं वैशिष्ट्येन व्यस्ततामाकलयति। मीमांसा वेदान्त दर्शने पश्चात्तनत्वमेवाकलयतः। धर्मं व्याख्यातुं मीमांसा दर्शनं प्राधान्यं भजते। वेदान्त दर्शनं परमात्मतत्त्वं विवेचयितुं सूक्ष्मातिसूक्ष्मपद्धत्या प्रारभते। अनया प्रणाल्या षड्दर्शनं तिसृषु श्रेणीषु विभक्तुं शक्नुमः। न्याय वैशेषिक दर्शनम्। सांख्य योगः। कर्ममीमांसा ज्ञानमीमांसा च। परस्परं प्रस्तुतेषु दर्शनेषु सत्यपि वैविध्ये नैव सैद्धान्तिक पार्थक्यं संगच्छते। (२)

कस्यापि देशस्य विचारशास्त्रं तद्देशीय सभ्यतायाः संस्कृतेभ्य सर्वेभ्यः मूल्यवान् पदार्थः। तद्देशीय धार्मिक सांस्कृतिक वातावरणस्य वैशिष्ट्येन प्रभावः विचार शास्त्रस्य विभिन्नायां धारायां समापतत्येव। अतः कस्मिन्नपि देशे समुत्पन्न विचारशास्त्रस्य विभिन्न सम्प्रदायैः भवतु नाम कियान् मतभेदः परन्तु सञ्जाते

(१) "प्राच्य दर्शन समीक्षा"

(२) व्यास भाष्य, - २-१५-"
(३) साँख्य प्रवचन भाष्य - विज्ञान भिक्षुः" (६)

(४) दुःखमेव सर्वं विवेकिनः" हेयं दुःखमनागतम्"
"योग सूत्र" "२-१५-१६"

(५) दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ"
"सां० का० का०"(१)

वातावरण वैषम्ये विभिन्न सम्प्रदायस्य विभिन्न विचारधारायां समत्वमेव दृष्टिगोचरत्वं प्रयाति। पौरस्त्य दार्शनिक सम्प्रदायेषु विभिन्न सिद्धान्तेषु चैकत्वमेव दृष्टिपथे समागच्छति।

सर्वस्मादपेक्षया तावदिदमेव वैशिष्ट्यं प्रतिभाति खलु पौरस्त्य दर्शनस्योद्देश्यः व्यावहारिकः। आधिव्याधि समाच्छन्न दैनिक जीवनेभ्यः पार्थक्यं समनुप्राप्य काल्पनिक जगतीतले नैव विहरति। सङ्कटग्रस्त जीवनस्य तापत्रयं दूरीकर्तुं सदा प्रयतमान एव दृश्यते। तदेव तेषां लक्ष्यं प्रतीयते। नहि तावद्दर्शन~~मेव~~ लक्ष्यं मानसिक कौतुहलस्य निराकरणमात्रम्।(१)

रागद्वेषोन्मुक्तमय वातावरणं कल्पयितुं नितान्तमौचित्यपूर्ण भूमिकामवलम्बते पौरस्त्य दर्शनम्। अतः पौरस्त्य दर्शनस्य मूलभूता जिज्ञासा नितरां श्लाघ्या स्पृहणीया च। अस्य खलु व्यावहारिकोद्देश्यस्य कारणमिदं प्रतिभाति पौरस्त्य दर्शन जीवनं सदाध्यात्मिक पक्षमेवावलम्बते।

दुःखपूर्ण घटना नैराश्यमवेक्ष्य वर्तमानासन्तोषः विचारशास्त्रं प्रवर्तयति। दुःखमय वर्तमानाऽसन्तोष मन्ता सुखमय भविष्य कल्पना दुराशामात्रमेव। अतएव पौरस्त्य दर्शनानां सम्प्रदायः मौलिकप्रश्नमिमं स्वीकृत्याग्रे गच्छति। भगवान् तथागतस्तु निरतिशय प्रकर्ष समाधिवलादेवार्यसत्य मन्वेष्टुं तदुपायं प्रवर्तयामास सएवोपायः समग्र सम्प्रदाये नितान्तमादरणीयः। विज्ञान व्यासयोः कथनमिदं नितान्तं समीचीनमाभाति।

यथा चिकित्साशास्त्रं चतुर्व्यूहम् — रोगः, रोगहेतुः, आरोग्य भैषज्यमिति। एवमिदमपि शास्त्रं चतुर्व्यूहम्, तद् यथा संसारः संसारहेतुः, मोक्षः मोक्षोपायश्चेति।(२)(३) अनेन व्यासभाष्येन स्पष्टं जायते ~~किन्तु~~ किल अध्यात्म शास्त्रं चिकित्सा शास्त्रवत् चतुर्व्यूहम्। यथा चिकित्सा शास्त्रं रोग रोग निदानारोग्य भैषज्यानि निरूपयितुं प्रवर्तते तथा दर्शन शास्त्रमपि दुःख दुःख हेतु मोक्ष मोक्षोपायान् निरूपयितुं यथाशक्ति प्रवर्तमानमेव।

जगतः कार्यकलापं समवेक्ष्य विवेकशाली महोदयस्तु पक्षमिमं निश्चिनुते यत् संसारोऽयं दुःखमय एव विद्यते। ~~दुःखानि~~ दुःखानि तावत् संसारस्य सत्यभूततत्त्वानि जायन्ते।(४) तेन पौरस्त्य दर्शनं जगतीतलेऽस्मिन् दुः सत्तां स्वीकृत्य तन्निराकर्तुं सर्वथा प्रवर्तत एव।

(५) अनेनैव प्रकारेण पौरस्त्य दर्शनस्य प्रतिसम्प्रदायः वर्तमानावस्थया सञ्जातमसन्तोषं विज्ञाय तन्निर्वचन प्रणालीं तुल्यया

निरूपयामास। अतएव वैदिकसंस्कृतौ नैराश्यवैपरीत्यं प्रमाणयति वैदिकसाहित्यम्।

संस्कृतनाटकसाहित्ये नैव दुःखान्तं नाटकं लोचनपथे समागच्छति। मानवानां हृदये आशासञ्चारोन्नतभावनया प्रेरणां सम्प्राप्य दुःखविनाशान्तकल्पनां नाटकसाहित्ये कल्पयामास। अभिनयानामन्तस्तले दुःखपूर्णघटनामपि प्रदर्शयन् तदनुकूलव्यवहारमपि प्रदर्शयति।

अतएव सा दुःखमयी घटनाऽऽनन्दस्नेहोर्म्या व्याप्ता जायते। वृत्तान्तोऽयं नाटकसाहित्यस्याऽऽध्यात्मिकविशालभावनामूलक एव।(१)

निसर्गत एव मानवानां स्वभावः नितान्तमाशाप्रधानः समवलोक्यते। नैराश्यकुसुमकुड्मल~~कालिमा~~ कालिमा मानवजीवनस्य वैचारिकनभोमण्डलानि कानिचिदेव क्षणानि श्यामलत्वमाकलयितुं तावदेव प्रभवति यावदाशावादस्य नैसर्गिकी प्रकृतिः नैराश्यकुसुमकुड्मलकालिमानमपहर्तुं यथाशीघ्रं नोदयति। क्रान्तिदर्शिनः कवयस्तु एव विलक्षणरहस्या नितान्तमाध्यात्मिकतत्त्वानि नितामन्वेष्टुं प्रायतन्त येन संसारेऽस्मिन्नावकाशः सुतरामव्यवस्थायाः। अतः कविकुलमण्डले सर्वत्र व्यवस्थायाः साम्राज्यमेव लोचनपथं समागच्छति।

जगदिदं व्यवस्थानर्तक्याः मनोरमरङ्गशालेव प्रतिभाति। यस्य स्वल्पादपि स्वल्पतरं वस्तु यदृच्छया नैव प्रवर्तते। किन्तु व्यापकनियमस्य सार्वभौमस्वायत्ततां स्वीकृत्य स्वजीवनं परिष्कुरुते।

दिवसानन्तरमेव रजन्याः समागमम्। प्रतिदिनं प्रत्यूषकाले सुवर्णपुञ्जरवद्युति मरीचिमालेव भगवतः प्रभाकरस्य मरीचिमालिनः सवितुः प्राच्यामाशायां मङ्गलमयोदयः, रजन्यां रजतरश्मिसुधाकरस्याविर्भावः, वृद्धिह्रासात्मकप्राकृतिकरहस्यस्यावेक्षणमाकलयन्तौ ऋषीणां मानस-मन्दिरे नैसर्गिकगत्यैव विश्वासं प्रावर्तयन्। यज्जगतीतलस्याऽऽध्यात्मिकव्यवस्थायाः पर्यालोचनपृष्ठभूमौ तिरोहितमेव किमपि रहस्यं निचैक्षुः परमर्षयः।(२)

ऋग्वेदस्य मन्त्रद्रष्टारः परमर्षयस्तु नितामपरिवर्तनीयव्यवस्थायाः ऋतसंज्ञामदासिषुः। जगतीतलेऽस्मि-

(१) ऋतञ्च सत्यञ्चा भीद्धात्तपसोऽध्यजायत ॥
॥ ऋ० वे० - १० - १९ - १ ॥

(१) पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ।
बृ० उ० - ॥ ३-२-१३ ॥

(२)
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ॥
स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतम् ॥
॥ क० उ० - २-५-७ ॥

॥ पातञ्जल योग सूत्रम् ॥ अनित्याशुचिदुःखानामात्मसु,
॥ नित्य शुचि सुखात्म ख्याति रविद्या ॥

॥ ऋतेः ज्ञानान्मुक्तिः ॥

सर्वप्राथम्येन समुत्पन्नं ऋतमेव।(१) ऋतमेवाऽजायत सर्वं प्रथमम्। तदनन्तरं सत्यमजायत। अतएव पौरस्त्याः ऋतसिद्धान्तं जीवनस्य विभिन्नावस्थायां सदाऽऽकलयामासुः।

वैदिककार्यकलापानुष्ठानानन्तरमेव झटित्यपूर्वं जनयति। अयमेवाऽपूर्वः फलोत्पत्तेः प्राक् फलानां कारणत्वं भजतेतराम्। मीमांसा दर्शनमपि तावदपूर्वरूपतया ऋतमङ्गीचकार। न्यायवैशेषिक ~~दर्शन~~ दर्शने तावदीश्वरकल्पनायाः मूलाधारस्तु ऋतमेव प्रतिभाति। एवमेव ऋतपदार्थस्य वैज्ञानिककल्पना नितरामौचित्यसम्मता।

‘‘कर्मसिद्धान्तः’’ वा ‘‘नैतिकत्वम्’’

जगति नैतिकसुव्यवस्थायाः मूलाऽऽधारो कर्मसिद्धान्तः। यद् कर्मसिद्धान्तं प्रतिदर्शनं स्वीकुरुते। वयं महता प्रयत्नेन यद्कर्माणि सम्पादयामः। तेन समुत्पद्यन्ते फ~~लान्यवश्यमेव~~लान्यवश्यमेव। नैव क्षीयन्ते तानि फलभोगमन्तरा कथमपि। संसारोऽप्ययं कृतकर्मणः परिणाम एव। नैव जायन्ते फलानि विना कर्म।(१)(२)

तात्पर्यमिदमेव कर्मसिद्धान्तस्य विश्वेऽस्मिन् स्वेच्छया फलानि नैव भुञ्जते मानवाः। स्वोन्नतिकविकासाय कर्मणां सिद्धान्त एव स्वीकार्यः। कर्मसिद्धान्तोऽपि तावदुपनिषदां प्रादुर्भवति। एवं वेदमूलकदर्शनमिव जैनबौद्धादयोऽपि कर्मसिद्धान्तं जगृहुः।

संसारस्य समस्तानि बन्धनानि तावदविद्यामूलकान्येव विद्यन्ते। मृत्युजन्मबन्धनान्यपि स्वीकुर्वते प्राणिनस्तावदविद्ययैव। समे पौरस्त्यदार्शनिकाः प्रस्तुतकर्मसिद्धान्तं मतभेदमन्तरैव स्वीकुर्वते। अविद्यायाः स्वरूपनिरूपणे नास्ति केषां किमपि वा वैमत्यम्।

योगसूत्रानुसारं तावदनित्यमशुचिः दुःखमनात्मनः एवं नित्यं शुचिःसुखमात्मनः विद्यते।(३) इयमेवाविद्या समस्तानि क्लेशानि जनयति। एवेयमविद्यापि रागद्वेषक्लेशानां जननी। वस्तुतः यथार्थस्वरूपाज्ञानमविद्या। ज्ञानमेव मुक्तिमार्गः।
(४) अयमेवोपनिषदां सिद्धान्तः सार्वजनीनः। तत्त्वज्ञानसाधनेन केवलं मानसिककुतूहलस्य निवृत्तिरेव तावदुद्देश्यं नास्ति किन्तु व्यावहारिकस्य जगतः तापत्रयात् मोचयितुं नितरां श्लाघ्यप्रयास एव समेषामुद्देश्यम्। जैनधर्मिणामाचार्याः तीर्थङ्करसंज्ञां लभते।

(("श्रीभाष्य"))"४-१-१३"(१)

(२) यदा सर्वे विमुच्यन्ते कामा ह्यस्य हृदि स्थिता:।
तदा मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।।
((क० उ० - २-३-१४))

(३) दीर्घनिकाय - "हिन्दी अनुवाद" - पृ० - २८ - २९,,
(४) "तत्त्वार्थ सूत्र" ९-३९-४६,

साधन मार्गस्योपदेशकोऽयमाचार्यगणः ~~विविधाधिव्याधि~~ विविधाधि व्याधि प्रपूरिते भवसागरे तत्र तत्त्वज्ञानाय साधनानि सुगमानुपदिशन्ति। मानवमात्रस्य जीवने यमुद्देश्यं प्राप्तुं प्रवर्तते सएव शास्त्रीयभाषायां पुरुषार्थ इति कथ्यते।

वैदिकधर्मानुसारं चत्वारः पुरुषार्थाः जायन्ते धर्मार्थ काममोक्ष भेदात्। एतेषु पुरुषार्थेषु परमपुरुषार्थो नाम मोक्षः। एतवता मोक्षस्य सर्वश्रेष्ठत्वं स्वीकरोति। विचारशास्त्रकल्पतरोः मोक्षएवामृत फलं विद्यते। मोक्ष सन्दर्भे विचित्रा खलु धारणा वर्ततीति। नेदं जीवने मोक्षस्य स्थानं विद्यते परन्तु नेयं वार्ता वास्तविकी।

यद्यपि विभिन्नेषु दर्शनेषु तापसन्तापादात्यन्तिक निवृत्तिरेव परमपुरुषार्थः जीवन्मुक्तिर्वेति कियता प्रतिपादितः। मानव जीवनस्य लक्ष्यं काल्पनिक परलोक दुःख निवृत्तिरेव भवतु नाम पुरुषार्थः। परन्तु जैन बौद्धादयस्तु जीवनस्य लक्ष्यं जीवन्मुक्तिरेव प्रतिपादयन्तीति। विशिष्टाद्वैते तु नास्ति तेषामदर्शः जीवन्मुक्तिः। तत्त्वज्ञान साधनेनात्मा तादृश समुन्नतावस्थां प्राप्नोति यस्मिन् साधारणतया जीवनोद्देश्यं परिवर्त्य महत्त्वपूर्ण वैशिष्ट्यं स्वीकरोति। (१) आदर्शः खलु जीवन्मुक्तेः तावदुपनिषदां सिद्धान्तः। हृदयस्थित समग्र कामनायाः विनाशानन्तरमेवामरत्वं प्राप्नोति। अनेनैव तत्त्वज्ञानोपलब्धि र्जायते। (२)

मोक्षस्य सन्दर्भे दार्शनिकानां सञ्जाते मतैक्येऽपि तत्स्वरूप निर्वचने पर्याप्तमेव वैषम्यमुपजायते। न्याय ~~वैशि~~ वैशेषिकास्तु मोक्षस्य समुन्नतावस्थायां केवलं दुःखनिवृत्तिमात्रं स्वीकुर्वते। परन्तु मीमांसा वेदान्त जैन महायान बौद्ध प्रभृति दार्शनिकानां विचारे तस्यामवस्थायां नित्यानन्दोपलब्धिः जायत एव।

मोक्षप्राप्ति विभिन्नोपाये दर्शन शास्त्रं यद्विचारमाचक्षते तत्र किमपि विलक्षणाभिप्रायमेवावगच्छन्ति विद्वांसः। वस्तुतस्तु अज्ञान प्रगाढान्धकार परिपूरिते संसारे स्वगन्तव्य स्थानं गन्तुं स्वपन्थानं निश्चिनुते। दर्शन शास्त्रं तु समुज्वल प्रकाश किरणानि प्रदर्श्य पन्थानं सूचयत्यस्मभ्यम्। परन्तु न केवलं शुष्क ज्ञानं लक्ष्य स्थानं ~~प्राप्तुं~~ प्रापयितुं क्षमते। सुविचारित चिकित्सा शास्त्रं नैव नाममात्रोच्चारणेन रोगग्रस्तान् जनान् निराकर्तुं क्षमते। अतएव काल्पनिक तत्त्वज्ञानं व्यावहारिक रूपतया परिवर्त्य तदैव तदवगन्तुं शक्नुयात्। · योगदर्शन प्रतिपादित प्रक्रिया पौरस्त्य दार्शनिकैर्मन्तव्या। (३) तथागत धर्मे मोक्षोपयुक्त साधनेषु समाधि विशिष्ट साधनानि स्वीकुर्वन्ति। (४) जैन दर्शनेतु सम्यक् चारित्राय यमनियमध्यानानि स

(१) "न्याय सूत्र" ४- अ०- २- आ० - ३८-४८ ।।

(२) वेदान्त सार - (१४६-५०।।

(३) श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः।।
श्रेयोहि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते।। क० उ०- १।२।२।

द्रा सर्वैः समपेक्ष्यन्ते।

न्यायदर्शने यौगिकप्रक्रिया ऽऽत्मसाक्षात्काराय नितरामावश्यकी।(१) सांख्यदर्शने प्रक्रियेयं स्वतः सिद्धा। वेदान्तदर्शनेपि ज्ञानस्यान्तरिक साधन योगसम्मत यम नियमानां स्वीकृतिः सदा तेषामपि मता।(२)

एतेषां दार्शनिकानां दृढ विश्वासोऽस्ति किल तर्कसम्मत दार्शनिकसिद्धान्तः तावत् पर्यन्तं मानवमानसिकान्धकार प्रगाढपटलं दूरीकर्तुं नैव प्रवर्तेत यावत् प्रायोगिक निकषपरीक्षां नोतरेत्। अस्मै प्रयोजनाय निरन्तरं त्रिविधिक रूपतयाऽऽत्मतत्त्वानां मननाभ्यासो सदाऽपेक्ष्यो।

अस्माकं व्यावहारिक जीवने तावदविद्यारागद्वेषाणां पटलानि मननाभ्यासमन्तरा नहि केनापि च्छेद्यानि। अतएव तमुच्छेत्तुं मननाभ्यास एव सरलोमार्गः। प्रमाणयति तावदुपनिषत्साहित्यम् यत् मानवानां सामाजिकपक्षधातले द्वौ पन्थानौ विद्येते ~~तत्रै~~ तत्रैकः खलु ~~श्रेयो मा~~ श्रेयो मार्गः तदपरः प्रेयो मार्गश्च।(३)

प्रेयोमार्गो रमणीय विषयमाकलय्याऽऽपाततः तेनाऽऽकर्षितः सन् प्रवर्तते मानवस्वभावः। रागद्वेषाभ्यां प्रवर्त्यते प्रवृत्तिः। भौतिकसुखं वाञ्छता पुरुषेण रागानुराग प्रबलस्नेह प्राधान्यात् तदेव सुखमन्वेष्टुं प्रयत्यते।(अन्विष्यते)

सुखमूलक पदार्थं प्रतिपद्य रागानुरागस्नेहाः जायन्ते तथा दुःखमूलकपदार्थं विज्ञाय स्वयमेवोदयते घृणाभावम्। आभ्यां रागद्वेषाभ्यां प्रभावितः सन् इन्द्रियानुभूत्या तिरस्कृत्य श्रेयोमार्गं सदावलम्बते प्रेयोमार्गम्। नैव वस्तुगत्याऽभ्युदयाय प्रेयो मार्गः लोचनपथे पान्थिकायते। तेन परम मङ्गलमूलत्वेन प्रदर्शितः श्रेयोमार्गः। अयमेव श्रेयो मार्गः परम मङ्गलसाधनाय सदा विदुषा स्वीकृतः।

अतएव विषयोन्मुखेन्द्रियाणि बाह्य पदार्थेभ्यः हठात् समाकृष्य स्वान्तमुखत्वं भोग (मा)ऽऽकलयेत् नैव वास्तविकश्रेयः जनानामिति। अतएवास्मिन् सन्दर्भे ~~जना~~ जनानां समावश्यकः खल्वात्म संयमः। अन्तःकरण शुद्धाय योगदर्शन प्रतिपादित योगाङ्गस्य व्याख्यानमेव शरणम्।

अनेन प्रकारेण यम नियमासन प्राणायाम प्रत्याहार धारणाध्यान समाधयः सर्वत्रैवान्तःकरण विशुद्धयाऽपेक्षन्ते। एतेषामुपायानां समीक्ष्य प्रतिदर्शनं तस्यावश्यकत्वं प्रतिपाद्य तद्योग्यत्वं स्वीचकार।

अनेन प्रकारेण पौरस्त्य दर्शनानां विभिन्नसम्प्रदायः मौलिकदृष्ट्या समस्तानि तत्त्वानि विविच्याऽऽत्मतत्त्व साक्षात्कारमेव समेषां कृते श्रेयान् पन्थाः स्यादिति। स्वप्रतिभा वैदुष्यतया नवानि तत्त्वान्यन्विष्य विलक्षणात्म तत्त्व प्रभावादेव विभिन्नेषु सम्प्रदायेषु समत्वमुत्पादयति।

अतः पौरस्त्य दार्शनिक विभिन्न सम्प्रदायेषु सञ्जातेऽपि वैविध्ये नैव वैषम्यं प्रतिभात्यात्म तत्त्वप्रभावादेव। तेन नैव विरोध लवलेशः दार्शनिक विभिन्न सम्प्रदाये। इमे विभिन्न सम्प्रदायाः स्वपद्धत्याऽऽत्मतत्त्वं विविच्य तत्र समापतित विचारभेदः नैव तेषां विरोधमाकलयति। किन्त्वधिकारिणः भेदेन समागत भेदोऽपि स्वाभाविक एव। नहि समेषां दृष्टिः समाना, नहि समेषां प्रतिभाऽपि समाना। अनैव हेतुना समेषां कृतेऽऽत्मनः चिन्तनं मननं निदिध्यासनञ्च प्रस्तौति दर्शनशास्त्रम्।

तेन भारतीय दर्शनं ~~संश्ले~~ संश्लेषण प्रधानम्। तत्र नाना दृष्ट्या विवेचित तत्त्वानां एकस्मिन् सूत्रे ग्रथितुं नितरां श्लाघनीयोय प्रयासः सदोपनिषत् साहित्यात्म विषयक निबन्धस्य। नेदं दर्शनशास्त्रं पाश्चात्य दर्शनवत् विश्लेषण प्रधानम्। आत्मतत्त्वविश्लेषणमन्तरा विभिन्न दर्शन सम्प्रदायस्यैकस्मिन् सूत्रे विभिन्न विचारभाव द्रष्टुं नैव कोऽपि क्षमते।

हृदयस्य विशालता सा मूल मन्त्रः वैदिक दार्शनिकानां सत्यान्वेषणं प्रति स्वाभाविक जिज्ञासाः। भारतीय दार्शनिकानां पारस्परिक दृष्टिकोणे वैषम्येऽपि वादीनां प्रश्नोत्तरमन्तरा स्वविचारस्थापनाय नैव समुद्यतो भवति। सामान्यतया श्रुति सम्मत तर्कैर् समाधातुं समस्तानि दर्शनानि प्रस्थानभेदमपास्य युक्तियुक्त पक्षमाकलय्य सदा प्रयतन्ते। तदनन्तरमेव प्रमाणपुरः सरं स्वमतं प्रस्तौति।

वैदिक तत्त्वज्ञानं व्यापक दृष्ट्या पक्षप्रतिपक्षतया नितान्तं विविच्याऽऽत्मतत्त्वं व्याख्यातुं ~~[illegible]~~ दार्शनिकास्तावदनुभव साध्यमेव समुपस्थापयन्ति। तार्किक बुद्धिमनुसृत्य शरीरादात्मनः पार्थक्य प्रदर्शनमेव समेषां प्रधानोद्देश्यं विद्यते।

तार्किक प्रमाण साहाय्यं कातलीकृत्यात्मनः ज्ञानं सदा प्रत्यक्षमेव जायते। अस्मै प्रयोजनाय वैदिकज्ञानं मानस प्रक्रियायाः यथार्थ पद्धत्या निरूपणमेव विदधाति। येन प्रकारेण दृश्यमान वैविध्यस्यान्तस्तले विद्यमानैकत्वं परीक्षितुं वेदान्त दर्शनं सूक्ष्मातिसूक्ष्म विवेचनस्य चरम सीमां

(१) यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यै रन्यथैवोपपद्यते। वाक्यपदीय-१-३४,

(२) प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते,
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता।
(सायणाचार्य तै० भा०भू०।।

सूचयति। विभिन्न मानसिक तत्त्वानि सर्वाङ्गीणतया निरूप्य योगदर्शनं नितरामात्मतत्त्वस्य व्यावहारिकं शिक्षां प्रयच्छति।

वैदिकसिद्धान्तस्य समालोचनानन्तरं द्वौ सिद्धान्तौ नेत्रपथे समागच्छतः। तत्रैकः नानात्मकप्रपञ्चस्य पारमार्थिकसत्तैकत्वस्य, अयमेव तार्किकसिद्धान्तः वेदान्तसम्मतपक्षः। तदपरसिद्धान्तस्तु ध्यानधारणासमाधिभिः प्रतिपाद्यैकत्वस्य मूलतत्त्वं करतलीकृत्य दर्शनिकानुभवधरातले मूलतत्त्वस्यात्मनः साक्षादनुभवः। अयमेव व्यावहारिकसिद्धान्तः भगवतः पतञ्जलेः।

अयमेव सिद्धान्तः विभिन्नेषु दर्शनेषु विभिन्नेन दार्शनिकेन स्वीकृतः। वैदिकमनोविज्ञानस्याऽऽधारस्तम्भेऽऽत्मतत्त्वस्य विशालदुर्गः सन्तिष्ठते। वैदिकमनोविज्ञानानुसारं विश्वस्ये तिस्रः खल्ववस्थाः जाग्रत् स्वप्न सुषुप्तिभेदात्। अवस्थाविशेषभेदमपास्य चैतन्यानि त्रीणि प्रकाशकाणि जायन्ते। तत्र पाश्चात्यदर्शनं जाग्रत् विशेषावस्थां विज्ञापयितुं व्यस्ततामाकलयति।

जाग्रत विशेषावस्थायाः व्याख्यानेन द्वैतवादात्मकतत्त्वज्ञानोदयः समेषामग्रे समायाति। (प्लूरलीज्म) स्वप्नावस्थायाः व्याख्या विषयीप्रधानदर्शनस्य जननी विद्यते। एवं सुषुप्तिविशेषस्य निरूपणं रहस्यवादं जनयति। (मिस्टीसीज्म) अतएव पाश्चात्यदर्शनं त्रिविधानुभवेषु कमप्येकमंशं परिगृह्य तं व्याख्यातुं व्यस्ततामाकलयति।

परन्तु पाश्चात्यदर्शनं नैव तत्र साफल्यमाससाद। पौरस्त्यदर्शनं तु त्रिविधान्यनुभवानि निरूपयितुं तेषां यथार्थस्वरूपं चित्रयितुं सदा सफलप्रयासं स्वीचकार। अतएवास्य वैदिकदर्शनस्य व्यापकत्वविविधरूपत्वसमन्वयक्षमत्वोदात्तहृदयानि समवेक्ष्य तस्य व्यापकत्वानि प्रमाणतर्काभ्यां प्रतिपन्नान्येव विद्यन्ते।

वैदिकतत्त्वज्ञानं स्वतत्त्वसिद्धान्तानि श्रुतिनिकषपरीक्षायां परीक्ष्य तस्य सत्यत्वं प्रमाणयति। अतएव पाश्चात्यसमालोचकस्तु श्रुतिं प्रति समधिकस्नेहबलादेव भारतीयदर्शनं नितान्तमन्धविश्वासत्वमधिक्षिपति। परन्त्वियं कल्पना नितरां तर्कहीना। तर्केणैव स्वनिश्चितसिद्धान्तानि खण्डयितुं शक्नोति। किन्तु तर्काणां याथार्थ्यं स्वीकृत्य केवलं प्रमाणमन्तरा किमपि तथ्यं निश्चेतुं नैव क्षमते। यदि नाम कोऽपि तं निश्चेतुं यतते चेत् तदपि साहसमात्रम्। (१)

साक्षात्कृतधर्माणां महर्षीणां ज्ञानं चक्षुषा साक्षात्कृततथ्यराशिरेव। तथाच श्रुतिः — (२) लोकोत्तरप्रतिभासम्पन्नोऽपि शङ्करः ज्ञानमात्रका प्रतिबिम्बात्मकं वेदं समालोच्य नतमस्तकत्वं स्वीकुरुते।

७) प्रज्ञा विवेकं लभते भिन्नैरागम दर्शनैः।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥
तत्त्वादुत्प्रेक्षमाणानां पुराणैरागमै विना ॥
अनुपासित वृद्धानां विद्यानाति - ("भर्तृहरि")
प्रसीदति ॥ ("वाक्यपदीय")

॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥
(गीता - श्री कृष्ण ॥

भारतीय तत्त्वज्ञानविदां तावदन्धविश्वासत्वारोपः भ्रममूलक एव। अस्मादेव कारणात् भर्तृहरिः प्रकर्षेणागमवाक्यं प्रशंसयन् विभिन्नागम दर्शन साहाय्येन प्रज्ञाविवेकशक्तिं लभत इति प्रोवाच। (७) पुराणागम साहाय्यमन्तरा उत्प्रेक्षमाणानां वृद्धानां नाति प्रसीदति विद्या। वेदविरुद्ध तर्काणां प्रामाण्यं नैव प्राचां सम्मतम्।

विशुद्ध तर्क प्रणाल्या प्रतिपादित सिद्धान्तस्य प्रामाण्यं परीक्षितुं सदावलम्बन्ते श्रुतिसाहाय्यम्। श्रुतयस्तु योगजधर्मसाहाय्येन सम्पादितानुभवोद्भावित ज्ञानविज्ञानानां रमणीयराशय एव सन्तिष्ठन्ते। अतएव नार्थपक्षपातः दार्शनिकानां वेविद्यते। एवं नितान्तमन्ध विश्वासकत्वाक्षेपः भ्रम एव।

भारतीय दर्शने नास्ति प्रगतिशीलत्वमित्यात्मक मिथ्याक्षेपः पाश्चात्यानां भ्रमपूर्णः। दार्शनिक विचारकस्य मीमांसकस्य जगदात्मनः प्राचीनत्वं भवतु नाम परन्तु विभिन्न दार्शनिक विचार रहस्या तद्विवेचनायां मौलिकत्वं पर्याप्तमेव। जीवजातेः परमगहनत्वेऽपि स्वविलक्षणप्रतिभया सत्यपि प्राचीनत्वे नवीनत्वमेवेति। एतस्य विचार गहनत्वं सदा नवीनत्वमाकलयति।

शबरस्वामिना (कृता) कृता व्याख्या परमस्वतन्त्रा प्रगल्भा च। अपूर्व पदार्थ प्रतिपादन तत्पराणां मीमांसकानां विचारस्वातन्त्र्यं समीक्ष्य दर्शन शास्त्रे परमां ख्यातिं प्राप। अतएव वैदिक दर्शनस्य प्रगतिशीलत्वं सर्वसम्मतमेव। तेन वैदिक दर्शने मिथ्याप्रवादः निराधार एव।

वैदिकदर्शनस्य तत्त्वज्ञानं दुःखबाहुल्य समाच्छन्न जगतः वास्तविकस्वरूपं विज्ञापयितुं एवं दुःखबाहुल्य समाच्छन्न भवसागरादुद्धर्तुं स्व लोकोत्तर प्रतिभा बलात् सदा तत्तत्त्वं निरूपयितुं प्रयतते। येन निराशामये जगतीतले तावदाशायाः सञ्चारः वोभवीति। महतां क्लेशानां राशिः सदानन्दप्रवाहे परिवर्तते। विलक्षणमिदं वैदिक दर्शनं कत्यमपि नैराश्यं नैव स्वीकुर्यात्। दुःखत्रयाभिघातादेव वैदिक दर्शनं प्रारभते। वैदिकदर्शनस्योद्गमभूमिः दुःखत्रयाभिघाताज्जिज्ञासैव।

एतादृश्यां परिस्थित्यां वर्तमान कालिक दुःखं वृत्तं सुखमयभविष्ये परिवर्तयितुं वैदिक दर्शनं निष्काम कर्मयोगस्य सन्देशं संसाराय प्रादात्। भगवता~~न्~~ वासुदेवेनाऽपि वचनमिदं प्रमाणीकृतम्। (८)

तथापि पाश्चात्यानां वैदिक दर्शने ~~प्रत्यु~~ प्रत्याक्षेपः किं मूलक इति समेषां चेतांसि चोविद्यन्ते ~~कौतुहलमुद्भावयन्ति~~। भगवन्त प्रत्यक्षपरियमक्षणा कारणस्य सदाश्चर्यं प्रतिभाति।

पाश्चात्य विदुषां समाजे नितान्तमियं धारणा बद्धमूलेवाऽऽभाति यत् मायावादी शङ्करस्तु जगदिदं मायिकमिन्द्रजालवत् भ्रामकमसत्यञ्चेत्याचक्षते। एतावता शङ्करमधिक्षिपन्ति पाश्चात्याः किल विविधव्यवहारव्यापृतेमहीं समवलोक्य ततः सहसैवोत्थाय पलायनवादमङ्गीकृत्य सर्वव्यवहारपरित्यागेन स्वस्य कार्याक्षमत्वेन चाऽकर्मण्यवादमात्रमुद्भावयति। अयमेव पलायनवादः भगवतः शङ्करस्य चरमोद्देश्यम्। परन्त्वियं धारणा सर्वथैव निराधारा पाश्चात्यानाम्।

"ब्रह्म सत्यं जगन्मिथ्या, जीवो ब्रह्मैव नापरः" ब्रह्मपारसइकृतोपमस्य जगतः नैव सत्यत्वमिति सत्यम्। पारमार्थिकदृष्ट्या जगतः मिथ्यात्वे सत्यपि व्यावहारिकदशायां सत्यत्वे नैव कश्चन विरोधः। यस्मिन् समुत्पद्यन्ते प्राणिनः, स्वभावानुसारी ~~विभि~~ विभिन्नानि कर्माणि जायन्ते, स्वव्यापारानुसारी सुखदुःखानि भुञ्जते, चरमसमये चरमयात्रां प्रकल्पन्ते। अतएव व्यावहारिकदशायां व्यवहारं सम्पादयितुं व्यवहारसिद्धसंसारस्य सत्यत्वं को न वेवेति मानवः।

यद्यपि सर्वमिदं सत्यं प्रतिभाति तथापि पारमार्थिकदृष्ट्या नायं संसारः सत्यम्। मायावादिनः शङ्करस्य जीवनचरितमेव प्रस्तुतारोपं स्वीकर्तुमपाकर्तुं वेति पर्याप्तं साधनम्। द्वात्रिंशत् वर्षावधिकोऽयमल्पवयस्कः अल्पीयस्यामेवावस्थायां परमेधावी दार्शनिकशिरोमणिः भगवान् शङ्करः यद्दुष्करमपि कार्यं सम्पाद्य प्रादर्शयत् नैव तत्कार्यं सम्पादयितुं शतवर्षावधिकानां विदुषां प्रौढशक्तिः प्रगल्भा तत्र।

षोडशवर्षावधिकावस्थायां विचारप्रधानभाष्यस्य सम्पादनम्। तत्सम्पादनसाहाय्येन हिमालयपरिपूतक्रोडस्थिते विशाले भारतक्षेत्रे प्रतिकोणं वैदिकधर्माभ्युत्थानाय मठानां संस्थापनम्, धार्मिकवातावरणाय निवृत्तिप्रधानसन्यासस्य प्रतिष्ठापनम्, वेदवाह्यतथागतपक्षान् ~~भी~~ पराजित्य पवित्रभूभागात् निर्वास्य वैदिकधर्मसंस्थापनञ्च नहि केषांसाहसमात्रेण सम्भवति स्म। अमूनि प्रस्तुतकार्याणि नितान्तं तेषां कर्मपरायणत्वमुद्भावयन्ति।

अतएव श्रीमच्छङ्कराचार्यस्य पूज्यपादस्याऽलौकिककुशलता, लोकोत्तरप्रतिभा च ~~निष्काम कर्म~~ निष्काम कर्मयोगं व्यनक्ति। नात्र कल्पनाकुशलकोविदानां सन्देहावसरः प्रसर्पति। सत्यान्वेषणं प्रति वैदिकविद्वज्जनानां सर्वदाऽऽग्रहः प्राचीनकालादेव समागच्छति। विविधवैदिकविभिन्नविधानानुष्ठानानां सौक्ष्म्यमालकतत्त्वोपलब्धये सर्वाधिकप्रयासः समाययौ। तद्वास्तविकविचारविवेकशीलानां मण्डले विद्वन्मण्डलेन सदाऽऽद्रियते स्म।

(१) "आनीद वातं स्वधया तदेकम्" "ऋग् वेद" (१०-१२९-२)

(२) "संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्"
ऋग् वेद - १०-१९१-२,

"मूलतत्त्व निरूपण"

ऋग्वेदस्य प्राचीन युगादेवाऽऽर्याणां दार्शनिक विचारे द्विविधा प्रवृत्तिः द्विविधं लक्ष्यं लोचनपथे समागच्छति। तत्र प्रथमा प्रवृत्तिः प्रतिभामूलिका प्रज्ञामूलिका वा। (इन्स्यूशनिस्टिक" येन प्रातिभचक्षुषा तत्त्वानि विवेचितानि समाहितचेतसा। तदपरा प्रवृत्तिस्तु तार्किकी। (रैशनलिस्टिक" तादृशसूक्ष्मतत्त्वानि समीक्षितुं तार्किकप्रतिभा प्रयोगः नितान्तं क्षमते।

तत्र लक्ष्यमपि द्विविधं विद्यते तत्र प्रथमन्तु आत्मसाक्षात्कारः, तदपरः धर्मोपदेशः। ऋग्वेदस्य महर्षिः प्रातिभज्ञानबलात् जगतः मूलतत्त्वं व्याख्याय सदा द्वैततत्त्वमन्विषति। (१) तस्यां वेलायां एकमेव वस्तु वायुशक्तिमन्तरेव स्व शक्त्या श्वास प्रश्वासौ नयति स्म।

तदपरो महर्षिः तर्कमूलक प्रवृत्तिमादाय जगतः मूलतत्त्वं व्याख्याय द्वैततत्त्वमेवान्विषति। (२) एतदुभय प्रवृत्तिप्रवाहः वैदिक युगे सर्वत्र दृष्टिगोचरो भवति। वैदिक कर्मकाण्डानि विवेचयितुं तर्कमूलक प्रवृत्तिमुपयोक्तुं मीमांसा शास्त्रं समुत्पद्यते। वैदिक यज्ञादि कर्माणि समुपलभ्यमान विरोधं परिहर्तुं तार्किक बुद्धिमुपयोक्तुञ्च मीमांसा शास्त्रं सदा महत्त्वपूर्णभूमिकां स्वीकुरुते।

प्रज्ञामूलक तर्कमूलक प्रवृत्तिं सामञ्जस्यायोपनिषदां तत्त्वज्ञानं जनिं लेभे। आत्मपरमात्म तत्त्वैकत्वं सम्पादयितुं नितान्तमुपनिषद् विचारस्य पर्यवसानः प्रज्ञामूलक वेदान्ते बभूव। तर्कमूलक तत्त्वज्ञानस्यो हापोहाभ्यां प्रकृतिपुरुषयोः द्वैतत्वं स्वीकुर्वत् सांख्यशास्त्रं जनिं लेभे। व्यावहारिकं योग दर्शनं न्याय वैशेषिकावपि तथैव तन्मूलकतया प्रादुर्बभूवुः।

कियन्ति दर्शनानि वेदस्य सम्बन्धं विच्छिद्य नैरपेक्ष्येण स्वतन्त्र तार्किक बुद्ध्या तत्त्वानि समीक्ष्य स्वसिद्धान्तं कल्पयामास। येन जिनतत्त्वविदां स्याद्वादः तथागतानां शून्यवादः विज्ञानवादश्च चार्वाकाणां भूतात्मवादोऽपि कालक्रम मर्यादया विकासतामगमन्। वेदोपनिषद् वैलक्षण्यादेव पौरस्य दर्शनानि विकसितानि।

उपनिषदामन्तस्तले भारतीय तत्त्वज्ञानानां नयपालीय तत्त्वज्ञानानाञ्च विविध सम्प्रदायोत्पत्तेः मनोज्ञा कथा समाहिता विद्यत एवेति नापरोक्षं प्रेक्षावताम्। औपनिषत् तत्त्वज्ञानस्य पर्यवसानः तत्त्वमसीति मन्त्रे समजायत। अनेनैव मन्त्रेणैवोपनिषदां ऋषयः सिंहनादेनैव व्याचक्षते यत् त्वं जीवोऽसि तद् ब्रह्मैव। अतएवाभयोः नितान्तमेकत्वमेव संघटते। परन्त्वुपनिषद् युगान्ते विषमा समस्या समेषामग्रे समुत्पन्ना। कथं तत्त्वैकत्वस्य साक्षात्कारः केन सम्पाद्यः।

(१) यदूर्ध्वं यदवाक् पृथिव्या यदन्तरा द्यावा पृथिवी इमे यद्भूतं च
भवच्च भविष्यच्चेत्या चक्षते तत् कस्मिन् व्याप्तञ्च। एतत्
सर्वं व्याप्तमाकाशे। आकाशं तु ब्रह्मणि तदेवाक्षर तत्त्वमुच्यते।
अयमेव तावदात्मा। बृ० उ० ब्रा० अ० "अ० ३"

एवं य एषोऽक्षिणि पुरुषो दृश्यते स एवात्मा" तदेवामृतमभयम्।
("छान्दोग्योनिषद्" "पञ्चदश खण्ड"
बहुधा विजायते।
प्रजापतिश्चरति गर्भे अन्तर् जायमानो ~~नित्यत्यापि~~
~~भूतानां जीव गर्भे~~ तस्य योनिं परिपश्यन्ति धीरा-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ य० वे० ॥३१-१९॥

पुरुषप्रकृत्योः जीवजगतोश्च परस्परं गुणधर्मवैपरीत्येन संसरत्ययं संसारः तथाच पुरुषतत्त्वस्य याथार्थ्यमवगन्तुं ब्रह्मजीवयोरेकत्वमुपजायते। परन्तु नहि केवलं बौद्धिकसाक्षात्कारः कार्यमिदं कर्तुं शक्नुयात्। किन्तु व्यावहारिकधरायां तस्य प्रायोगिकपरीक्षा समावश्यकीति निश्चयं प्रतीमः।

सांख्ययोगस्य द्वौ पक्षौ विद्येते। एकः बौद्धिकपक्षः तदपरः व्यावहारिकपक्षः। सांख्यतत्त्वज्ञानमेव बौद्धिकपक्षः योगदर्शनं व्यावहारिकपक्षः। जीवजगतोः याथार्थ्यं निश्चेतुं दर्शनमप्यपेक्ष्यते। आत्मनां गुणान् विवेचयितुं वैशेषिकदर्शनशास्त्रं प्रावर्तत।

वस्तुतत्त्वस्य याथार्थ्यं विवेचयितुं ज्ञानप्राप्तिपरिष्कृतपद्धतिमन्तरा नैव क्षमते कोऽपि इत्यतः शास्त्रीयपद्धत्या ज्ञानं निरूपयितुं न्यायशास्त्रं जनिं लेभे। किन्तु शुद्धतर्के प्रतिष्ठितत्त्वेन न्यायशास्त्रस्य भावनायाः बद्धमूलकतया केवलं शुद्धतर्काणां साहाय्येन नात्मानं साक्षात्कर्तुं शशाक। पक्षप्रतिपक्षतया श्रुतितत्त्वं विवेचयितुं तदन्तर्गत ~~विवेचयितुं~~ तथा कर्मकाण्डान्यपि विवेचयितुं प्रावर्तत मीमांसाशास्त्रम्।

नैतावता कर्मकाण्डविवेचनेनात्मतत्त्वप्रवृत्तिः सफला। ज्ञानकाण्डप्रतिपादनतत्परो हि भगवान् वेदव्यासः ब्रह्मसूत्रं निर्ममौ। अनेन प्रकारेणोपनिषद्तत्त्वमसीतिवाक्यं याथार्थ्येन व्याख्यातुं पूर्वोक्तक्रमेण षड्दर्शनानि प्रादुर्भूतानि। तेन नास्तिककुतर्कजालव्यालाऽऽकुलान् वेदान् परिरक्षितुं विच्छिद्य कुतर्कजालं वेदोपनिषद्प्रतिपाद्यात्मतत्त्वनिरूपणमेवोद्देश्यम्। शरीरात् आत्मानं पृथक् कृत्य तत्स्वरूपं विद्धि। तदनन्तरमेवापवर्गः। अयमेव तावत् वैदिकदार्शनिकानां मूलमन्त्रः।

तार्किकयुक्तिसाहाय्येनात्मतत्त्वज्ञानमेव प्रत्यक्षम्। अनेनैव हेतुना वैदिकमनोविज्ञानं मानसप्रत्यक्षस्यात्मनः यथार्थपद्धत्या दृश्यमानविविधजगदन्तस्तले स्वरूपं निरूप्यात्मतत्त्वैकत्वं विज्ञापयितुं दार्शनिकशिरोमणि याज्ञवल्क्यः यन्योपनिषत्सा इत्ये ~~आम~~ गार्गिं प्रत्युवाच।(७)

प्रजापतिः परमात्माऽऽत्मा वा अजायमानः नित्यतया भूतानां गर्भे जीवरूपतया प्रविश्य बहुधा जायते। यद्यप्यात्मा नित्यः निर्विकारोऽपि नोत्पद्यते किन्तु स्वप्रीतिमायया कार्यकारणात्मकं जगत् निर्माति। अनेन सः गर्भे प्रविष्टः सन् नानारूपाणि धत्ते। यथा घटः मृत्तिकामाश्रित्य सन्तिष्ठते तथेदं कार्यकारणात्मकं जगत् समस्तं परमात्मानमाश्रित्य सन्तिष्ठते।

अयमेव परमात्मा प्रजापतिः नित्योऽपि सन् जगदुपकर्तुं मत्स्यकूर्मवराहमनुष्यादिविभिन्नयोनिषु जनिं लभते। ~~अतएव परमात्मा~~ अतएव ~~[illegible]~~

(१) ॥ ~~प्रकृ~~ प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ "गीता ॥

(२) "अनिरुक्तो प्रजापतिः ॥

प्रजापतेनत्व देवतान्यन्यो विश्वा जातानि परिताबभूव ॥ (३)
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥
॥ य० वे० - ३१-२० ॥

(४) समस्ते व्यस्ते त्वां शरणद् गृणात्योमितिपदम् ॥
॥ म० स्तो० ॥

(५) तदेतत् सत्यं यथा सुदीप्तात् पावकात् विस्फुलिङ्गा सह
स्रशः प्रभवन्ते सरूपाः । तथाक्षरात् द्विविधाः सौम्य भावाः प्रजायन्ते
तत्र चैवापि यन्ति। ॥ मु० उ० - २ - ख० - १ - म० १ ॥
दिव्योह्यमूर्तः पुरुषः सबाह्यन्तो ह्यजः ॥ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः
परः ॥
एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः,
पृथिवी विश्वस्य धारिणी ॥ २-मु०-म०- २ ३-
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी सर्वभूतान्तरात्मा ॥
॥ मु० उ० ॥ - २.४- ॥

तदाश्रयतया इमे विश्वाः अमूनि भूतानि तस्थुः। अयमेव तावदात्मरूपेण सन्तिष्ठते। तेन वेदान्तविदां गर्वोक्तिः– "जीवो ब्रह्मैव नापरः॥" (१) परमात्मनो ईशएव जीवः, विभुः नित्यश्च" कर्मपातन्त्र्यात्।

आधुनिकवैज्ञानिकदिशा प्रतिपदार्थं नितरामेका शक्तिः विराजते। यस्याकर्षणमवलम्ब्य सर्वे पदार्थाः स्थिराः जायन्ते। तमेव शक्तिमाश्रित्य वेदोक्ताधिदैविकविज्ञाने प्रजापतिदेवतां स्वीचकार। श्रुतिवाक्यमपि पक्षमिमं प्रमाणीकरोति। (२) अतएवेयं केन्द्रशक्तिः निरवयवा। अतएवायं प्रजापतिः सर्वपदार्थकेन्द्रे निवसति। तस्मादेव केन्द्रात् विविधानि किरणानि निर्गच्छन्ति। तान्येव किरणानि सर्वभूतेषु व्याप्तानि। तदनन्तरमेव भूतानां प्रकाशकत्वं जायते। स एवात्मेत्युच्यते। विभिन्नेषु भूतेषु व्यष्टिः प्रजापतिस्तावदात्मना परिव्याप्तोऽस्ति। समस्तानां ब्रह्माण्डानां प्रजापतिः परमात्मैव। अनेनैव हेतुना हिरण्यगर्भः सूत्रात्मेति नाम्ना शास्त्रे वर्णितः। (३)

प्रजापतेः ब्रह्मणः परमात्मनः आत्मनो वा नान्यदीयं किमपि वस्तु विद्यते। यदेव तत्त्वं समुत्पन्नान्पदार्थान् अभिव्याप्य सन्तिष्ठते। यया कामनया वयं जुहुमः सा कामना सफला जायताम्। स एव प्रजापतिः ब्रह्म परमात्मा आत्मा वा सर्वेषां भूतानामधिष्ठाता।

इयमेव शक्तिः प्रतिपदार्थेषु व्यापकरूपेण सन्तिष्ठते। मनसा प्राणेन वचसा वा सर्वेषु पदार्थेष्वनुप्रविष्टा विद्यते। तावदिदमेव वैदिकविज्ञानम्। ~~प्रतिपद~~ प्रतिपदार्थं विद्यमाना शक्तिः खल्वेका। तावदियं शक्तिः प्रजापतिशब्देनैव बोध्या वैदिकविज्ञाने।

अस्याः प्रजापतेः द्वौ भेदौ विद्येते। एकस्तावदीश्वरप्रजापतिः, तदपरः जीवप्रजापतिः। ईश्वरप्रजापतिस्तावदाधिदैविकः, जीवप्रजापतिस्तु नितरामाध्यात्मिकः। तत्रैकं समष्टिरूपं तदपरं व्यष्ट्यात्मकञ्च। (४) अतएवेश्वरः समष्ट्यात्मकः जीवस्तु व्यष्ट्यात्मकः।

उपनिषदां मीमांसात्मके ब्रह्मसूत्रे भगवान् बादरायणः ईश्वरजीवयोः त्रीन् सम्बन्धान् प्रत्यपीपदत्। जीवस्तावदीश्वरांशएवः। ईश्वरः बिम्बस्थानीयः। जीवस्तु प्रतिबिम्ब एव। यथा भगवतः भास्करस्य प्रतिबिम्बः जलदर्पणयोः जायते तथैव स्त्री स्वकीयं केन्द्रं निर्माय स्वप्रकाशं प्रक्षिपति। ईश्वरात् नास्ति पृथक् जीवः। उपाध्यवच्छिन्नतया सुतरामीश्वरः जीवात्मसंज्ञां लभते।

वस्तुतः तस्य स्वतन्त्रा सत्ता नास्ति। स्वतन्त्रता तु कर्मपातन्त्रमूला। तेन जीवः परतन्त्रतया ऽवगम्यते। (५) सदा स्मर्तव्योऽयं विषयः यन्नहि दृष्टान्तदार्ष्टान्तयोः सर्वांशे क्वचिदपि समत्वमुपजायते। दृष्टान्तस्तावत् केवलं विषयमवगन्तुं सदा प्रयुङ्क्ते। अवयवेनावयविनं

१- पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवाव शिष्यते ।। श्रुतिः ॥

(२) हिरण्य गर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथ्विं द्यामुतेमां कस्मै देवाय (देवाय) हविषा विधेम ।
यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः ॥

(३) ॥ ततो विराडजायत ॥ ॥पुरुषसूक्त॥ ३१, अ॰-५-

निष्पद्यते। लघुतन्तु कणेनैव महापटः निर्माति। प्रतिवृक्षं सम्मेल्य वनानि जायन्ते। व्यक्तीनां समूहेनैव समाजं निर्माति। अनेनैव प्रकाणांशादेव सर्वलांशी सञ्जायते। न्यायदर्शनमपि प्रस्तुत प्रक्रियां स्वीकुरुते। परन्त्वत्रास्या प्रक्रिया भिन्नैव। प्रथमन्तावदीश्वरः तदनन्तरं तस्मात् प्रादुर्भूतः खलु जीवः।

उपनिषत् साहित्येऽपि अनेनैव दृष्टान्तेनैवेश्वरं जीवमपि निरूपयति। यथा प्रदीप्तात् पावकस्फुलिङ्गात् विभिन्नानि किरणानि जायन्ते। एवं तानि किरणान्यपि स्वकेन्द्रं प्रणीय स्व स्वतन्त्र सत्तामुपकल्पयन्ति। तावादियमेव स्थितिर्जीवेश्वराणाम्।

प्रदीप्त पावकस्फुलिङ्गमेवेश्वरः तस्मात् प्रादुर्भूतः जीवः पावकलघुस्फुलिंगः। परन्तु नानेन दृष्टान्तेन वक्तव्यः खलु प्रदीप्त पावकस्फुलिङ्गेभ्यः लघुस्फुलिंगस्य निर्गततया प्रदीप्त पावकस्फुलिंगस्य रिक्तत्वमुपजायते। परन्त्वत्र विचित्रैव गतिः। ईश्वरान्निर्गततया जीवस्य नाल न्यूनत्वं संघटते। अतएव प्रस्तुत दृष्टान्तस्य साक्ष्यं प्रयच्छति भावती श्रुतिः -(१)

अनेन श्रुतिवाक्येनेश्वरः सदा पूर्णः तस्मान्निर्गतः जीवोऽपि पूर्ण एव। पूर्णादीश्वरात् पूर्णस्य जीवस्य निष्पत्ति र्जायते। पूर्णात् प्रस्यन्दमानः जीवः पूर्ण एव। आध्यात्मिकोऽयं विषयः। तेन प्रस्तुत विषयं लौकिक दृष्टान्तेन नावगन्तुं शक्नोति।

यथाकाशस्य निरूपत्वेऽपि स्वच्छे कासारे प्रतिविम्बः स्पष्टतामाकलयति तद्वत् सर्वशक्तिमतः परमात्मनस्तावदाभास मात्रं जीवः। अतएवाव्ययपुरुषः सर्वज्ञश्चेश्वरः। जीवस्तु प्राज्ञ एव। (२) अनेन प्रकारेण समष्ट्यात्मके परमात्मनि नैव शङ्कावतारः।

समष्टिस्तु परमात्मा, व्यष्टिः तावज्जीवात्मा। अतएव वेदान्तविदां विचारोऽनयोः समष्टिव्यष्ट्योर्भेदः सुतरां सिद्ध एव। समष्टिं जगतीतत्वं प्रकल्प्य विभिन्नेषु मण्डलेषु विभिन्न शरीरावयवं स्वीकृत्य तद्विचाराय प्रवर्तते। यस्तावद् विचारः विराट्पुरुषवर्णनप्रसङ्गे भागवते उपनिषत् साहित्ये च प्राप्यते। तेन विराट् स्वरूप परमात्मनि नास्ति सन्देहावसरः। (३)

ऐसास्य वेदसम्मत व्याख्यायां जडत्वं चैतन्यञ्चावस्था विशेषमात्रम्। नास्ति तत्र कोऽपि मौलिकभेदः। जडस्य चेतने चेतनस्य जडे वा परस्परं परिणामः दृश्यत एव। जीवात्मनः पार्श्वे यदिन्द्रियं मनः व्यष्टि सामग्री विद्यते तत् समष्ट्यात्मक प्रत्यक्षेण पपद्यते। अतएवाऽस्माकं शरीरे एकश्चाभिमानी जीवोऽस्ति। तथा समग्रे विश्वे एक एवात्मा तावदीश्वरः। एवमनन्तानन्त ब्रह्माण्डस्य:

(१) कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ।।“पञ्चदशी”

(२) यदाप्नोति यदादत्ते यच्चात्ति विषयानिह ”
यच्चास्य सन्ततो भाव तस्मादात्मेति कीर्त्यते ।।
कठोपनिषद् भाष्ये - भगवान् शङ्करः ”

आत्मनः प्रत्याख्यातुमशक्यत्वात्। य एव निराकर्ता तस्यैवात्मत्वात्। सर्वो हि आत्मास्तित्वं प्रत्येति। नाहमस्मीति ।।शा०भा०”

स्वशरीरं समुपकल्प्याऽपरिच्छिन्नो परमेश्वरोऽस्ति। यत्र नास्ति तर्कवितर्काः। जीवे यत् ~~चैतन्य~~ चैतन्यमनुभवति तस्य नास्ति कोऽपि समष्टिः तर्हि कुतः समागच्छेत् व्यष्टिः। तस्य या समष्टिः तदेव सत्यम्। ~~ज्ञानम्। आनन्दमे~~ तदेव ज्ञानम्। तदेवानन्दं ब्रह्म। तदेवेश्वरः परमेश्वरो वा, तस्यैवाऽपरोंऽशः जीवात्मा। (१)

जीवस्य कार्योपाधित्वं, ईश्वरस्य कारणोपाधित्वञ्च संगतमेव। कार्यकारणतां विहाय पूर्णावबोधएव। (२)

नहि तावत् प्रमाणेनात्मनः सिद्धिः भवेत्। कथंतु आत्मैव सर्वेषां प्रमाणानां तावदाधारः। अतएवेयमुक्तिः– यतः सिद्धिः प्रमाणानां स कथं तैः प्रसिद्ध्यति। आत्मा चैतन्यमेव तावत्। समग्र मानसिक व्यापारे चकासते। क्वचिदपि शरीरात्मकत्वमात्मनः। ~~क्वचिदपि~~ क्वचिदिन्द्रियात्मकत्वम्। क्वचिद् मनस्त्वमेव। इमेषु शरीरेन्द्रिय मनो प्रभृतिषु केवलमेकमेव तत्त्वम्। तत् ज्ञानमेव। नान्यत् किमपि। येन रूपेणात्मानं स्वीकरोतु परन्तु तेषां वास्तविकं धर्मः चैतन्यमेव। अतः विज्ञातारं केन विजानीयात्। इति श्रुति वाक्यमपि संगच्छते।

यद्यपि "अन् प्राणने धातोः" आत्मेति शब्दः निष्पद्यते। तथापि नेयं व्युत्पत्तिः साधीयसी। ऋग्वेदे आत्मेति शब्दं श्वास प्रश्वासार्थे कतिपये स्थाने प्रायुङ्क्त। तथाप्यात्मेति शब्दस्य व्युत्पत्तिः केचन विदुषां विचारे तावदीदृशी। "अत धातोः" ~~मनि~~ उणादि मनिन् प्रत्ययेन सम्पद्यते खलु आत्मेति शब्दः। अस्मादेव कारणादात्मा न केवलं दार्शनिक शब्दः किन्तु स्ववाचकसर्वनामतया स्वं रूपं द्योतयितुं प्रयुङ्क्ते।

ड्युसन विचारानुसारं (सिस्टम ऑफ वेदान्त) शब्दोऽयं तावदात्मेति नितरामद्भुत एव। अतएव समग्रं दर्शन शास्त्रं स्वशाश्वत प्रतिपाद्य विषयं प्रतिपादयितुं सर्वोत्कृष्ट शब्दं प्राप्तवान्।

आत्मा तावत् नित्यः। प्रकाशात्मकः। ज्ञानात्मकश्च। जाग्रत् स्वप्नावस्थायां बाह्याभ्यन्तरिक विषयान् वेवेत्ति। सुषुप्त्यवस्थायामपि स्मृतिरेव प्रमाणम्। अनुभवात् प्राक् मानस प्रत्यक्षमेव स्मृतिः। आत्मनः चैतन्यात्मकतया अयमात्मा साक्षी विद्यते व्यवहारसिद्धस्य प्रत्यक्षस्य। अतएवात्मानं चकासतुं नहि प्रकाशान्तरमपेक्षते।

आत्मा सत्यस्वरूपं वर्वर्ति। तस्य सत्ता सर्वदैव विद्यमाना। अयमविकारी च। जाग्रत स्वप्न सुषुप्तावपि नहि बाधितो भवत्यात्मा। न कदापि जायते न म्रियते च। त्रिकालेष्वबाधितोऽयम्। आनन्दस्वरूपोऽयमात्मा सर्वदा विद्यत एव। आनन्दघनपरमात्मनस्तावदंशमात्मम्। सुषुप्तावप्यात्मनः सदानन्दत्वं नहि तस्मात् पृथक् भवति। तस्यामप्यवस्थायां चैतन्यप्रदीप्ताज्ञानस्या

(१) नहि केवलस्यात्मनः भोक्तृत्वमस्ति। बुद्ध्याद्युपाधिकृतमेव
तस्य भोक्तृत्वम्।। "शां० भा० ।।

(२) नहि आत्मनोऽन्यत्, तत् प्रविभक्तदेशकालं भूतं भवत् भवि-
ष्यद् वा वस्तु विद्यते। "शां० भा०।।

(३) तदानीमेतौ ईश्वरचैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः
आनन्दमनुभवतः सुखमहमस्वाप्सं न किञ्चिदवेदिषम्।
इत्युत्थितस्य परामर्शोपपत्तेश्च। (आनन्दभुक् चेतोमुखः
प्राज्ञः ।। इति श्रुतेः।

(४) एष म आत्मा अन्तर्हृदयेऽणीयान् यवाद्वा सर्षपाद्वा श्यामकाद्वा। एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरीक्षात् ज्यायमानेभ्यो लोकेभ्य। एष म आत्माऽन्तर्हृदय एतद् ब्रह्मैतमितः प्रेत्याभिसम्भविताऽस्मि ‡ इति स्यादद्धा न
विचिकित्साऽस्ति। इदं ब्रह्मेदं क्षत्रमिमे लोका
इमे देवा इमानि भूतानि इदं सर्वं यदयमात्मा।। "छां० उ०।।
स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि
श्वेतकेतो।

अतएवात्मानं निर्विशेषं ब्रह्म विद्धि आत्मस्वरूपं निरति-
शयं भूमाख्यं ब्रह्मेति विद्धि" शां० भा०।।
परमेवात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो
बालैः शारीर इत्युपचर्यते।। "शां० भा०।।

त्यन्ता सूक्ष्मा वृत्तिः आनन्दमनुभवति। मायोपाधितः स्वातन्त्र्यं स्वकीयाखण्डानन्दस्वरूपं प्राप्नोति तावदात्मा। अतएव नास्ति भोक्ता नैव कर्ता, ~~धर्मि~~ धर्माऽधर्माभ्यां रहितः। स्वकर्मणः फलं नैव भुङ्क्ते। बुद्ध्योपाध्यवच्छिन्नतया स्वात्मनः भोक्तृत्वं स्वीकुरुते।(१)

अतएव कर्तृत्वं भोक्तृत्वञ्चाविद्यया ~~प्रत्युपस्थापि~~ प्रत्युपस्थापितमेव। आत्मादेव कारणादात्मा नित्यः शुद्धः बुद्धः मुक्तश्च। अतएवातीन्द्रियः निर्गुणः नित्यः चैतन्यश्च। अयमेवाविकारी, नितान्तपरिवर्तनशीलश्च। निरपेक्षः नामरूपाद्धीनश्च। अयमेवात्मा ब्रह्म, सत्त्व जगदाधारः। अतएवाखण्डः। ब्रह्मणः जगदाधारतया समग्रविश्वएवात्मा। नान्यदीयःकोऽपि।(२)

अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम्। तमक्रतुः पश्यति वीतशोको धातुः प्रसादाद्महिमा~~नमा~~॥ नमात्मनः॥(३) छान्दोग्योपनिषदि वर्णितशाण्डिल्यविद्यया सर्वं खल्विदं वै ब्रह्मोद्घोषेण प्राप्यते। स्वहृदये स्थितोऽयमात्मा लघुताल्लघुतः व्यापकात् व्यापकतमः। अतएवात्मपरमात्मनोः सदैकत्वं प्रतिपादयति।(४) छान्दोग्योपनिषदः तत्त्वमसीति वाक्ये ब्रह्मात्मनोरैक्याभिव्यक्तिः। तेन समस्तं जगत् आत्मैव तदेव सत्यमात्मा।(५)

जीवात्मनोः पार्थक्यं नैव पारमार्थिकम्। किन्त्वविद्योपाध्यवच्छिन्नतया व्यावहारिकः। अन्तःकरणावच्छिन्नशरीरोपाधितः जीवस्तावत् निष्पद्यते। नष्टायामुपाधौ जीवः शुद्धस्वरूपत्वं लभते।

जीवस्य त्रीणि शरीराणि जायन्ते। स्थूलसूक्ष्मकारणभेदात्। स्थूलशरीरं ~~पञ्चभूतैव~~ पञ्चभूतैरेव निर्मितम्। सूक्ष्मशरीरं तु पञ्चप्राणमनःबुद्धिदशेन्द्रियेभ्यः। कारणशरीरं अविद्यानिर्मितावरणमात्रम्।

जाग्रतावस्थायां जीवः बाह्यविषयान् इन्द्रियेणैव वेवेत्ति। स्वप्नावस्थायामचेतनमनसोः सूक्ष्मवृत्त्या। सुषुप्तावविद्यायाः सूक्ष्मवृत्त्यव~~[illegible]~~च्छिन्नचैतन्यानन्दाभ्याम्। तुरीयचैतन्यं तु शुद्धात्मैव। यस्तावत् निरुपाधिः, अद्वितीयः। अतएव गुणक्रियाभ्यां रहितः। ~~क~~ ~~किञ्चि~~ इन्द्रियाऽयोग्यः। एवमनिर्वचनीयश्च। यं व्याख्यातुं नैव कोऽपि क्षमते। यद्यपि विज्ञानात्मा परमात्मनोऽन्य एव तथाप्यविद्याकामकृतं तस्मिन् मर्त्यत्वमधिरोपितम्।

अतएवेश्वरः मायायाः प्रभावेण नैव भ्रान्तः। मायायाः अभावात्मकावरणशक्तिः नहि तं समाच्छादयति। अतः सुखदुःखाभ्यामनुभवेन रहितः। आत्माऽनात्मनोः भेदं कर्तुं न क्षमते जीवः तेन कष्टान्यनुभवति। ईश्वरजीवौ अज्ञानस्य विभिन्नरूपयोः नितरामाभासेते।

परमेश्वरस्तु ~~स्वामी~~ प्रभुत्वेन सर्वज्ञः सर्वशक्तिमान् पूर्णश्च।

(१) सर्वेषामेव नाम रूप कृत कार्यकारण संघात प्रविष्टानां
जीवानां ब्रह्मत्वमाह:। (शां॰भा॰)
एताभ्यामेव शक्तिभ्यां बन्धः पुंसः समागतः।
याभ्यां विमोहितो देहं मत्वात्मानं भ्रमत्ययम्॥

(२) आनीद वातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्चनास।
एकं वा इदं विबभूव सर्वम्॥ ((ऋक् संहिता))

सदेव सौम्येदमग्र आसीत् एकमेवा द्वितीयम्।
((नेह नानास्ति किञ्चन)) छा॰ उ॰))

(३) नतत्र चक्षुर्गच्छति, न वाग् गच्छति, न मनोगच्छति।
((श्रुतिः))

(४) ((परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च))
((श्वेताश्व॰ उ॰))

सदा प्रबुद्धः मुक्तश्च। जीवानां शक्तिः ज्ञानञ्च सीमितमेव। बन्धं मुमुक्षति परमात्मा तदैव जीवानां शुभकर्मणि प्रवृत्तिर्भवति। परमात्मा साक्षी मात्रमेव। (१)

एक एव परमेश्वरः कूटस्थः नित्यः विज्ञानधातुः अविद्यया मायया अनेकधा विभाव्यते। नान्यो विज्ञानधातुरस्तीति। अनया क्रममर्यादया एकेनैव मूलतत्त्वेन संसारस्य सर्वे पदार्थाः जायन्ते। अत एवास्यां प्रक्रियायां विज्ञानशब्दवाच्यत्वं संगतमेव। वेदेऽपि प्रक्रियेयं अनेनैव प्रकारेण निरूपिता। तस्मात् कारणबुद्धिसम्मतैव प्रतिभाति। अनन्तकोटिब्रह्माण्डं तेनैव परमात्मना सम्पादितम्। अत एव वेदानां सुप्रसिद्धोऽयं यपटा घोषः। (२)

एवं क्रमेण शतशः मन्त्रब्राह्मणोपनिषच्छ्रुतयः पुनःपुनः सिद्धान्तमिमं समुद्घोषयन्ति। संसारस्य जागृतावस्थैव प्रपञ्चः। एवं सुषुप्तावस्थैव [illegible] प्रलयः। मूलतत्त्वं परमात्मा अनयावस्थया पर एव। अस्यैवापरोंऽशः आत्मेति व्यनक्ति श्रुतिर्भगवती। तेन नेन्द्रियं तमात्मानं प्रत्यक्षं कर्तुं शक्नोति। न तमात्मानं प्रतिपादयितुं क्षमते वाणी। न तमात्मानं मन्तुं मनः शक्नोति।

अत एव श्रुतिवाक्यमपि पक्षमिमं प्रमाणीकरोति (३)

गुणक्रियाभ्यां रहितं सच्चिदानन्दस्वरूपं परमात्मा संसारस्य मूलतत्त्वं विद्यते। नैव वक्तुं योग्यं कदापि यद् गुणक्रियाभ्यां रहितः परमात्मा कथं गुणक्रियाविशिष्टं प्रपञ्चं निर्माति। ~~श्रुतिस्मृतिपुराणेषु~~ श्रुतिस्मृतिपुराणेषु प्रतिपादितमस्ति यद् मूलतत्त्वे परमात्मनि विलक्षणा शक्तिः। यया सर्वं स्थूलप्रपञ्चं निर्माति परमात्मा। तत्रोपनिषद्वाक्यं प्रमाणयति — (४)

सैव शक्तिः वलपदवाच्यत्वमभियन्ते। इयमेव शक्तिः वलक्रियाभ्यां व्यवहृता विद्यते। सुषुप्तावस्थायामियमेव शक्तिः वलात्मिका। यदा कार्यं समुद्यतो भवति तदेयं शक्तिः वलरूपतया परिणमते। चरमे तु क्रियारूपं स्वीकृत्योपशान्ता भवति। ततः वलान्तं जागर्ति। अनेन प्रकारेण रसवले द्वे मूलतत्त्वे भवतः।

परन्तु व्यावहारिकावस्थायां तत्त्वद्वयमप्येकमेव। कथं तु शक्तिमतः नैव पार्थक्यं लभते तच्छक्तिः। अग्नितः दाहकता शक्तिः भिन्ना प्रतीयते। वह्नौ दाहकत्व शक्तेः संक्रान्ततया नहि तस्मात् भिन्ना। नहि पटात् भिन्नाः तन्तवः कदापि व्यवहारे प्रतिभान्ति। घटसंक्रान्त ~~भिन्ना~~ मृत्तिका नहि घटात् भिन्ना कदापि जायते।

कारणस्यैव सत्तां गृह्णाति कार्यमति। तेन मृत्तिकायाः सत्ता कार्पासे, कार्पासस्य सत्ता तूले, तूलस्य सत्ता तन्तौ, तन्तूनां सत्तैव वस्त्रत्वं परिणमते। अतएव शक्ति शक्तिमतोः संसर्गः परिकल्प्यः। तस्माच्छक्तिः नैव शक्तिमतः भिन्ना। यदा कदापि नितरामनुभवः शक्तेः तदाश्रयतयैव सञ्जायते। अतएवायं निष्कर्षः यत् वेदएव संसारस्य मूल तत्त्वमस्ति। एकमेवाद्वितीयं मनुते। परन्त्वियं शक्तिः स्वाश्रयात् विरुद्धस्वभावमेवावलम्बते। तेन मूल तत्त्वं व्यापकम्। नहि कस्यां वेलायां कस्मिन् देशेतस्याभावोस्ति। सएवात्मा। सएवात्मा बल शक्त्या परिच्छिन्नोभवति। तेनैव कारणेनात्मनः विभिन्नत्वं संघटते।

वस्तुतस्तु नैव मूलतत्त्वस्य ~~परि~~ परिच्छेदो भवति। सएव कदापि नितान्तमपरिच्छिन्नत्वं प्राप्नोति। यथा समुद्रतः नैव तरङ्गो भिन्नः। कथंतु तदात्मकत्वात्। किन्तु शक्त्यापरिच्छिन्नतयैव तत्र परिच्छेदत्वं प्रतिभाति। इयमेव परमात्म शक्तिः माया नाम्ना व्यपदिष्टा शास्त्रान्ते। माधातोरर्थः मितिः परिच्छेदो वा। अपरिच्छिन्नं परिच्छेत्तुं माया शब्दस्य व्यवहारः शक्त्यैव प्रादुर्भूतः। परन्त्वपरिच्छिन्नं परिच्छेत्तुं कथं शक्नुयादित्यतो दर्शन शास्त्रेऽनिर्वचनीयत्व संज्ञां लभते माया।

अतएव संसारस्य व्यावहारिक दशायां यस्य वस्तुनः तार्किक युक्त्या नोपपत्तिर्जायते तत्रैव माया शब्दं प्रयुञ्जते। शक्तेर्नाम माया, तया परिच्छिन्नं मूलतत्त्वं पुरुष इत्युच्यते। पुरे शेते इति पुरुषः। अर्थात् एकस्मिन् परिधौ परिच्छिन्नत्वात् वा पुरुष इत्युच्यते।

।(पुरुष तत्त्व निरूपणम्”

तत्राव्ययपुरुषाक्षरपुरुष क्षरपुरुषाणां वैविध्येन त्रयो भेदाः प्राप्यन्ते। तत्र यावत् परिच्छेदं प्राप्य केवलं नतु चयनं सएवाव्ययपुरुष इत्युच्यते। बलादुपरिबलानां यदा चयनं जायते तदनन्तरं सएव पुरुषः सदा~~अक्ष~~क्षरपुरुष संज्ञां लभते। बलशक्ति ग्रन्थि तया सएव पुरुषः क्षरपुरुष संज्ञां लभते। अतएवायं क्षरपुरुषः प्रपञ्चतया परिणमते। अनया पद्धत्या क्षरपुरुषएव समस्त दृश्यप्रपञ्चस्योपादान कारणं जायते।

एवं समस्त प्रपञ्चस्य निमित्तकारणमक्षरपुरुषः। सर्वेषामवलम्बनमधिष्ठानं वाऽव्ययपुरुष इत्युच्यते। केवलं यावत् कालपर्यन्तं सा बलात्मिका शक्तिः जागर्ति तदा सएवाऽव्यय

(१) गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु।
भूतानि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकी भवन्ति॥
"मुण्डकोपनिषद्"
((मु०-३-ख०-२-मं०-७))

(२) यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥
((मु० उ०// ३-ख०-२
मं०-८ //

(३) ((तन्मनोऽकुरुत)) ((बृ० उ०))

कामस्तदाग्रे समवर्तताधि मनसो रेतः प्रथमं तदासीत्।
सतो बन्धुमसति निर विन्दन् हृदि प्रतीष्या कवयो मनीषा॥
नासदीय सूक्त -४ मन्त्र०

(४) "मन एव मनुष्याणां काणं बन्धमोक्षयोः"

पुरुषः। सएव परात्परः। सञ्जाते परिच्छिन्ने ऽक्षर पुरुषः। तदनन्तरमेव लघुना परिच्छेदेन जीवाव्ययं इत्युच्यते। अर्थात् अयमेव जीवात्मेति।

एषु त्रिषु पुरुषेषु प्रतिपुरुषाणां पञ्चपञ्च कलाः ~~वेदेषु~~ वेदे वर्णिताः। एतवता सर्वाः कलाः समाहृत्य प्रतिपुरुषं पञ्चदश कलाः विद्यन्ते। आस्यां पञ्चदश कलायां नितामनुप्रविष्टं मूलतत्त्वं वेदेषु परात्पर संज्ञां लभते। एताः कलाः विगणय्य षोडशीपुरुषः प्रजापति नाम्ना श्रुतिषु वर्णितः। तथाच श्रुतिवाक्यम्-
(१)

ततः श्रुति प्रतिपादित लयवेलायां परात्परेऽव्ययपुरुषे पञ्चदशकलाः समागत्य तत्रैकत्वमुपजायते। ईश्वराव्ययादपि परएवात्राव्ययः। अतएवायमात्मा सर्व प्रथमः ईश्वराव्यये लीनत्वमभिव्याप्य तदनन्तरमीश्वराव्ययोऽपि षोडशकला सम्पन्ने परात्परे तदैकत्वं प्राप्नोति। तथा श्रुतिवाक्यम् - (२)

तथाच नामविज्ञानानन्द मनो प्राणवाक् भेदात् अव्ययपुरुषस्य पञ्चकलाः जायन्ते। अव्ययपुरुषस्यास्य शक्त्या परिच्छिन्नतया सर्वस्मात् प्राक् प्रादुर्भूतं मनः। व्यावहारिकावस्थायां यद् मनः वयं स्वीकुर्मः ~~तन्मन~~ तन्मनस्तु बहुकालानन्तरं सञ्जात स्थूलावस्थामात्रम्। अत्रतु सर्वस्मात् प्राक् सूक्ष्मातिसूक्ष्मावस्था विशेषमात्रात्मकं मनः प्रतिपाद्यते। अनयोः भ्रमत्वं निराकर्तुं सर्व प्राथम्येन श्वोवसीय मनसा श्रुति ग्रन्थेषु मनः पदार्थं निरूपितवान्। तद्यथा - बृहदारण्यकोपनिषदि वचनमिदं प्रत्यपीपदत् - (३)

एतावता मूलतत्त्वात्मनः प्राक् मनसां प्रादुर्भावमित्यवोचत्। अतः ऋग्वेद संहितायाः नासदीय सूक्ते प्रस्तुत विचारं व्याजहा~~रत्~~। एवं प्रकारेण सर्वस्मात् प्राक् मनः समुत्पन्नं ततः मनसि द्वे तत्त्वे समुत्पन्ने जाते। तदनन्तरं विज्ञानानन्दयोरभिव्यक्ति जायते। अतएवानन्द विज्ञान मनसां त्रयाणां मुक्तिसाक्षिक कलात्वेनोपपादनं जायते। एतेषां त्रयाणां सृष्टि प्रक्रियायां नैवोपयोगः। ~~एतेषु मनस~~ एतेषु आनन्द विज्ञान मनःसु सृष्टेरत्यन्तं लयरूपात्मिका मुक्तिः प्रभवति।

मनो प्राण वर्चसां भेदात् कलानां त्रीणि नामानि प्रति~~प्र~~ पादयन्ति। तेन प्रतिबन्धक शीलानां बलानां कलाः तावन्निर्मिताः जायन्ते। त्मा अतएव बन्धमोक्षयोः मनः कारणं जायते। (४)
अतएवाध्यावस्थायां बन्धमोक्षयोः मनसः कारणत्वं सं

(१) "सोयमात्मा मनोमयः प्राणमयः वाङ्मयश्च" "शतपथ"

(२) सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्"
"चरक" "आयुर्वेद"

(३) यदक्षरं पञ्चविधं समेति युजो युक्ता अभियत् संवहन्ति।
सत्यस्य सत्यमनु यत्र युज्यते तत्र देवा सर्व एकी भवन्ति॥
"ऐ० उ०" -३-८-१

संयुक्तमेतत् क्षरमक्षरं व्यक्ताव्यक्तं भरते विश्व~~[illegible]~~मीशः।
यदर्चिमद् यदणुभ्योऽणु यस्मिन् लोका निहिता लोकिनश्च।
~~तदेत~~ तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्मनः॥
(मु० उ०) "श्वेताश्व" उ०)

यरते। तदेव मनः संसारेऽऽत्मानं प्रतिबध्नाति। एवं श्रेयो मार्गे परमात्मानमनुसृत्य प्रवर्तते। तस्मादव्यय पुरुषस्य तिस्रः कलाः मुक्तिसाक्षिकत्वेन सृष्टिसाक्षिकत्वेन च प्रतिपादिताः विद्यन्ते। तेन शतपथ ब्राह्मणे विषयमिममनेन प्रकारेण व्यजीज्ञपत् ।(१)

मनोमय प्राणमय वाङ्मयानां त्रैविध्येन तिस्रः कलाः विद्यन्ते अव्यय पुरुषस्य। आत्मनः स्वरूपमिदमेव तावद्विद्यते वेदानुसारेण। अव्ययपुरुषस्य कलात्रयरूपतया त्रीणि तत्त्वान्येवात्मरूपतया समग्रे प्रपञ्चे नितरामवस्थितानि विद्यन्ते।

समस्ते प्रपञ्चे त्रयः समागच्छन्ति ज्ञान क्रियार्थाः। समस्तानां ज्ञानानां मूलतत्त्वं मनः। क्रियाणां मूलतत्त्वं प्राणः, अर्थानां मूलतत्त्वं वाक्। इयमेव वाक् व्याकरण शास्त्रे चतुर्विधा भवति परापश्यन्ती मध्यमावैखरी भेदात्। तदेव ब्रह्म स्वरूपम्। मनोप्राणमन्तरा नैव वाचः सम्मिलन्ति। भूतानां सूक्ष्मात्मके वाचि मनः प्राणोऽपि सर्वत्र व्यापकत्वं लभते।

जड़चेतनात्मके समग्रे प्रपञ्चे ~~क्रिया शक्तेः सर्वत्र-~~ ~~दृश्यमान~~ [illegible] क्रियाशक्तेः सर्वत्र दृश्यमानतया प्राणस्य व्यापकत्वं सार्वजनीनम्। किन्तु मनसो व्यापकत्वे नैव निश्चयोऽस्ति। सत्यपि चेतन पदार्थे विद्यमाने ज्ञानेऽपि नितरामचेतने तद्विरहात्।

किन्तु वैदिक दर्शने जड़चेतनयोः व्यवहारः सदा काल्पनिकः। चेतनवज्जडेष्वपि ज्ञानाभावः नैव कदापि सन्तिष्ठते। जड़चेतनोपपत्तिं प्रदर्शयन् ~~महामुनिः~~ महामुनिः चरकः विषयमिमं निरवोचत्।

(२)

यत्रेन्द्रियाणि विद्यन्ते तत्र ज्ञानान्यपि वर्तन्त एव। यत्रेन्द्रियाणि गुप्तानि तत्र ज्ञानान्यपि गुप्तान्येव जायन्ते। ~~तेनस्य~~ तेन ज्ञानस्य व्यापकत्वे नैव केषां विप्रतिपत्तिः।

आसु तिसृषु कलासु प्राणमाश्रित्याक्षरपुरुषाः विकसन्ते। इमे अक्षरपुरुषाः प्राणप्रधानत्वमाकलयन्ति वा क्रियाप्रधानत्वम्। वाक्तत्त्वमाश्रित्य क्षरपुरुषाः विकसन्ते। अत एवाक्षरपुरुषाणां पञ्चकलाः विद्यन्ते ब्रह्म विष्णु सोमेन्द्राग्नि भेदात्। तथाचोक्तमिति ।(३)

एवं शतपथ ब्राह्मणेऽपि पञ्चभेदमाकलय्य -१-१-६ काण्डेषु प्रस्तुत विषयाः वर्णिताः। एवमन्यच्च—

इति श्रुति वाक्येनाक्षरपुरुषाणां निर्देशः। पार्थिवेऽभ्यन्तरतत्त्वं प्रक्षिपन्ती शक्तिस्तावदिन्द्र संज्ञां लभते। एवं वाह्य प्रक्षेपण सञ्जात

॥ वन्दे सूर्य शशाङ्क वन्दिनयनम् ॥ "पुराण ॥ (व)

रिक्तस्थानं प्रपूरयितुं पालनात्मिका शक्तिः विष्णु संज्ञा लभते। अनया पद्धत्या सञ्जाते गमनागमने समेषां वस्तूनां प्रदर्शक प्रतिष्ठा शक्तिः ब्रह्मेति संज्ञां लभते।

अस्यैवाव्यय पुरुषस्य वाक् प्राणात्मिका कलाग्नि सोमत्वेन विकसिता। अतएव तस्य प्राणतत्त्वमग्निः। वाक् तत्त्वं सोमः। अनेनैव हेतुना इन्द्राग्नि सोमान् सम्मेल्य एकात्मकतया तस्योपासना पुराणेषु नितरां प्रसिद्धिमावहति।

एतेषां त्रयाणां सम्मेलनेन तृतीय देवोत्पत्तिर्जायते यत् तृतीय देवात्मकतया महेश्व नाम्ना पुराणादि ग्रन्थेषु वर्ण्यन्ते। अतएवेन्द्राग्नि सोमाः तेषां नेत्रत्वमलभन्। (व)

((क्षरपुरुष तत्त्वम्))

श्रुति प्रतिपादितस्यार्थभागस्य नितराममृतत्वेन तस्यार्थभागस्य मृतात्मकत्वेन च परिणत एव क्षरपुरुषः संसारं गच्छति। स एव क्षरपुरुषः आत्मा। तस्या क्षरपुरुषस्य साहाय्येन क्षरपुरुषस्यात्मनः पञ्च कलाः जायन्ते। प्राणाप वाक् अन्नाद अन्न भेदात्। शतपथ ब्राह्मणस्य षष्ठकाण्ड प्रारम्भ एव प्रस्तुत विषयाः निरूपिताः। अस्याः कलायाः नितरामाध्यात्मिकाधिदैविकाधिभौतिकतया विकासः सञ्जायते। अतएव समे प्राणिनः पृथक् रूपतया शरीर पिण्डानि जायन्ते। तमेव बाह्याभ्यन्तरिक विकासं तदाध्यात्मिकतया प्रचक्षते। ब्रह्माण्डस्य प्रतिशारं जड़-चेतनात्मक समस्तानि तत्त्वानि समुत्पद्यन्ते तदेवाधिभौतिकम्। एतेषां समेषां मूले विद्यमानमिदमाधिभौतिकम्।

एतेषां पारस्परिक संयोगेन समुत्पन्नानि प्राणिनः शरीराणि पञ्चकलात्मकतया व्यवहृतानि जायन्ते। तद्यथा बीजचिति- (कारण शरीरम्) देवचिति (~~कार्य शरीरम्~~ (सूक्ष्म शरीरम्)) भूतचिति (स्थूल शरीरम्) प्रजावित्त भेदात्। अस्याः पञ्चकलायाः भूता कला पूर्वोक्तैव प्रसिद्धा। अनेनैव प्रकारेण क्षरपुरुषाणां पञ्च कलाः विद्यन्ते ब्रह्म विष्णु सोमेन्द्राग्नि भेदात्। एतेषां पञ्च मण्डलान्यपि विद्यन्ते। स्वयम्भू परमेष्ठी सूर्य पृथ्वी चन्द्र भेदात्।

एतावता वैदिक सिद्धान्ते अक्षरपुरुषस्तावत् समष्टिः। क्षरपुरुषस्तु व्यष्टिः। समष्टिस्तु महाचैतन्यात्मकं विद्यते। तस्यैव महाचैतन्यस्य व्यष्टिः जीवात्मा कथ्यते। यथाऽस्माकं तावदात्मा तस्यैव महाचैतन्यस्य समष्टि रूपस्यांशः। अस्यैव महाचैतन्य समष्टिरूपस्यांशेन सुतरां सम्बन्धतया एक एव जीवात्मा व्या

((कठोपनिषद्))

इन्द्रियाणि पराण्याहु रिन्द्रियेभ्यः परं मनः।
मनसस्तु पराबुद्धि बुद्धेरात्मा परं महत्।।
महतः परमव्यक्त मव्यक्तात् पुरुषः परः,
पुरुषान्नपरं किञ्चित् सा काष्ठा सा परा गतिः।।

(२) यच्छेत् वाङ्मनसि प्राज्ञस्तद् यच्छेज्ज्ञान आत्मनि।
ज्ञान मात्मनि महति नियच्छेत् तद्यच्छेच्छान्तात्मनि।।
((क० उ०))

(३) मम योनि र्महद् ब्रह्म तस्मिन गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत।
सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः
तासां ब्रह्म महद्योनि रहं बीजप्रदः पिता।।
((भगी० १४- .३.४))

वहारिकावस्थायां तावदनेकत्वं लभते।

अस्यैव क्षरपुरुषस्य जीवात्मनः आध्यात्मिककलाभिः सह नितरां सम्बन्धतया व्यवहारावस्थायां अनेकानि रूपाणि लभन्ते। तद् यथा शान्तात्म महानात्म विज्ञानात्म प्रज्ञानात्म प्राणात्मनां भेदात् पञ्चविधः। इमे पञ्च जीवात्मानः जीवानां तन्त्राणि परिचालयन्ति। प्राणेन परिच्छिन्नं चैतन्यं प्राणात्मा कथ्यते। मनसा परिच्छिन्नं चैतन्यं प्रज्ञानात्मा, बुद्ध्यवच्छिन्न चैतन्यं विज्ञानात्मा कथ्यते च। एवं तन्नियामक महत्त्वावच्छिन्न चैतन्यं महानात्मा कथ्यते। एवं सर्वेषु तत्त्वेषु अनुप्रविश्यैकरूपेण सामञ्जस्याय शान्तात्मेत्युच्यते। एतेषां क्षरपुरुषाणां भेदान् निरुप्य मूलतत्त्वमपि निरूपयामास। (१)

एतावता स्पष्टमेवावगच्छामः खलु इन्द्रियाण्येवोत्कृष्टानि विद्यन्ते। इन्द्रियेभ्यः परत्वमधिगच्छति मनः। मनसः परा बुद्धिः, बुद्धेः परः महानात्मा, ततः अव्यक्तात्मा। तस्मात् पर एव पुरुषः। पुरुषात्परं नैव किञ्चित् विद्यते। तत्रैव प्रकर्षस्य समाप्ति जायते। सैव परागतिः।

अतीन्द्रियाणां शरीरापेक्षया परत्वमेव। शान्तात्मनः तावदव्यक्तत्वमेव। (२) अस्मिन् श्रुतिवाक्ये शान्तात्मनः नाम स्पष्टमेव। अस्मिन् तावत् इन्द्रियाणि मनांसि बुद्धयः प्रसिद्धा एव विद्यन्ते। अद्य प्रातः प्रस्तुतात्म निरूपणं प्रसिद्धदर्शन शास्त्रे नैव लोचनगोचरायते किन्तु भगवतः वासुदेवस्य गीतायां स्पष्टमेव प्रतिभाति। (३)

अनेन भगवद्वाक्येन स्पष्टमवगच्छामः खलु प्रति जीवं शरीराणां यादाकारं भवति तदाकारसम्पादकः महान् आत्मैव। महत्यात्मनि बीजरूपेणानुप्रविष्टात्मको सः अव्ययपुरुष एव विद्यते।

भूतेभ्यः समुत्पन्नः भूतात्मा शरीरात्मा वेति कथ्यते। यद्यपि शरीराणि पञ्चमहाभूतांशेनैव निर्मितानि जायन्ते। तथापि महाभूतस्यांशेन निर्मित घटपटापेक्षया शरीरे किमपि वैलक्षण्यमवश्यमेव प्रतिभाति। महाभूतांश निर्मित शरीरस्यावयवस्य समुचित समावेशं दृष्ट्वा एवं ह्रास विकारं विलोक्य वैलक्षण्यं प्रत्यक्षसिद्धमेव।

एवं प्रकारेण भुक्तान्नस्य रसात् रुधिरम्। रुधिरात् मांसमेदौ। ताभ्यामस्थि। ततः मज्जा। मज्जातः शुक्रम्। अनेन क्रमि

(१)
योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते ।
यः करोतीति कर्माणि स भूतात्मोच्यते बुधैः ॥
जीवसंज्ञोऽन्तरात्मानः सहजः सर्वदेहिनाम् ।
येन वेदयते सर्वं सुखं दुःखञ्च जन्मसु ॥
तावुभौ भूत सम्पृक्तौ महान् क्षेत्रज्ञ एव च ।
उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः ॥
((मनुस्मृति – १२))

परिवर्तनेन नितरां परिवर्तनेन वा शरीरस्य ~~[illegible]~~ वैलक्षण्यं स्पष्टमेव। अनेन विज्ञायते खलु शरीराकारतया परिणते भूते ~~[illegible]~~ तावदनुस्यूता चेतनशक्तिः कार्यं कुर्वती विद्यत एव। अस्मादेव कारणात् तं भूतात्मना शरीरात्मना वेति व्यवहरन्ति विद्वांसः। अयं तावच्छरीरात्मा शुभान्यशुभानि कर्माणि ~~[illegible]~~ सम्पादयन्ति। एतेषां शरीरात्मनां जाग्रत्स्वप्नसुषुप्तिभेदात् जायन्ते खलु तिस्रः अवस्थाः। इमे विषयाः मनुस्मृतेः द्वादशाध्याये आत्मानमधिकृत्य भगवता मनुना निर्दिष्टाः। (१)

एतावता मनुना वाक्येन स्पष्टमवगम्यते खलु शरीरे यत्कर्माणि कारयति तदेव क्षेत्रज्ञमाचक्षते। अयमेव तावद् विज्ञानात्मनोच्यते। यत् कर्माणि कुरुते स एव भूतात्मा। अन्योन्तरात्मा जीवात्मैव। याभ्यां सुखानि दुःखानि सदा भुज्यन्ते। इमौ द्वौ भूतात्मना सह सदा सामञ्जस्यमाकलयतः। भवतु कस्मिन्नपि भूतशरीरे बीजशतैः कस्यामपि योनौ तावदात्मा तिष्ठेत् परन्तु तमभिव्याप्य तेन सह सन्तिष्ठते।

अनयोः भूतात्मविज्ञानात्मनोरुल्लेखः प्रथमे श्लोके विद्यते। श्लोकस्यान्तिमचरणे समुल्लेखः विद्यते महतः आत्मनः। समेषु भूतेषु चैतन्यं प्रयच्छति यत् स एव जीवात्मा। प्रज्ञानात्मप्राणात्मानौ पार्थक्येनाऽप्रतिपाद्य भूतात्मन्येव तौ समाहितौ स्तः। नहि शान्तात्मनः महान् आत्मा पृथक्। कर्माणि सम्पादयिता भूतात्मा, एवं भोक्ता जीवात्मा विज्ञानात्मा वा। अमी विषयाः भगवता मनुना प्रतिपादिताः।

व्याकरणस्य महाभाष्येऽपि प्रसङ्गमिममाहृत्य भगवान् पतञ्जलिः प्रोवाच यत् भूतात्मना कृतकर्मणः फलं सदा जीवात्मैव भुङ्क्ते। नाचात्र विचिकित्सा विधेयमा किल केनापि यदन्यकृतकर्मणः फलं नान्यमन्येन भुज्यते। ~~कर्तृं तु [illegible] जीवात्मा चैत~~ ~~कर्तृं तु [illegible]~~

कर्तृं तु भूतात्माऽपि जीवात्मना चैतन्यं प्राप्यते। तेन कर्तृत्वस्य जीवात्मन्येव पर्यवसानः।

वैदिकविज्ञानं देवतातत्त्वमवलम्ब्य सदा सन्तिष्ठते। यद्यप्याधुनिकविज्ञानं (इलैक्ट्रीसीटी) पदवाच्यमधिकृत्य प्रवर्तते। किन्तु ~~[illegible]~~ वैदिकविज्ञानं प्राणतत्त्वमधिकृत्य प्रवर्तते। प्राणविद्ययैव समस्तानि वैदिकविज्ञानानि वेदे पर्यवसन्नानि विद्यन्ते। प्राणपदार्थं

(१) असद्वा इदमग्र आसीत् । तदाहुः किं तद सदासीत् । ऋषयो
वाव तेऽग्रे सदासीत् । तदाहुः के त ऋषय इति । प्राणा वा ऋषयः ।
॥ शतपथ ब्राह्मण ॥ ॥ काण्ड - ६ ॥

ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः
देवेभ्यश्च जगत् सर्वं चरं स्थाण्वनुपूर्वशः ॥ "मनुस्मृति"

परिच्चेतुं प्राणशक्तिः कथ्यते। या प्राणशक्तिः नितरां सूक्ष्मा। यां सूक्ष्मशक्तिं गृहीतुं नेन्द्रियाणि क्षमन्ते। सैव शक्तिः स्थूलरूपतया विकासत्वं लभते तदा संसारावस्थायां विषयत्वमादधाति। अत एव वैदिकसिद्धान्ते जगतः दृश्यमानस्येयं मूलशक्तिः स्वीकृता वैदिकसिद्धान्ते। परन्त्वियं इलेक्ट्री सीटी पदवाच्या प्राणशक्त्यपेक्षया नितरां नितान्तं स्थूलतमा वीक्ष्यतीति। प्राणस्तावत् वैदिकसिद्धान्ते ऋषिपितृदेवासुरगन्धर्वभेदान् लभते। संसारस्य प्रथमचरणे प्राणस्य खल्वावस्था या विद्यते सएव ऋषिप्राणः। अतएव शतपथब्राह्मणे विषयमिमं प्रकारान्तरेण प्रस्तौति। (१)

प्रश्नोत्तरवाक्यकदम्बप्रबन्धेनापि निबद्धोऽयं विषयः यत् जगदिदं समुत्पत्तेः प्राक् असदेवासीत्। किं तावत् असत्? ऋषिरेव। सृष्टेः प्राक् ऋषीणामिन्द्रियाऽग्राह्यतयाऽसत्। कस्तावत् ऋषिः? प्राण एव। ऋषिप्राणविकासेनैव पितृप्राणदेवप्राणासुरप्राणगन्धर्वप्राणादयः समभवन्।

अतएव शतपथब्राह्मणस्य चतुर्दशकाण्डस्य जनकसभाक्रान्ते महर्षियाज्ञवल्क्यः स्पष्टमेव देवानां प्राणात्मकतया व्याख्यानं चकार। वैदिकप्राणसिद्धान्तस्य स्पष्टं व्याख्यानं कृतवान् भगवान् मनुः। (२) ऋषिप्राणेभ्य एव पितृप्राणः समभवत्। पितृप्राणेन देवासुरप्राणाश्च बभूवुः। तेनैव जडचेतनात्मकं जगत् प्रादुर्भूतम्। कल्पं तु तस्य नैमित्तिकप्रलये नाशो न भवति।

एवं भूतानां परिणामः शरीरम्। भूतेषु अनुस्यूता प्राणशक्तिः भूतात्मेत्युच्यते। तेषामपि त्रयो भेदाः प्राप्यन्ते वैश्वानरतैजसप्राज्ञभेदात्। शरीरस्यावयवविशेषस्य यथास्थानं संगठनं संश्लेषणञ्च वैश्वानरस्य कार्यमेतत्। अयं वैश्वानरात्मा जडचेतनादिपार्थिवपदार्थेषु व्याप्तोऽस्ति। अतएव मनुष्याणां अवयवसंगठनमिव प्रस्तरलोष्ठादिषु समानरूपतयाऽवलोक्यते। शरीरं तावद्वर्धयमानः क्रमेण वृक्षपर्यन्तेषु प्राणिषु तैजसात्मा विराजते। इदमेव ~~कार्यम्।~~ कार्यं तस्य वीवर्ति। यत्र यत्र क्रमिकवृद्धिः लोचनगोचरायते तत्र खल्वस्यैव सत्ता वीक्ष्यतीति। ज्ञानेच्छासुखादीनामाश्रयः प्रज्ञात्मेत्युच्यते।

कर्मात्म चिदाभास चिदात्मनां भेदात् त्रयो भेदाः प्राप्यन्ते प्रज्ञात्मनः। तत्र शुभाशुभकर्माणि प्रवर्तयिता चैतन्यांशः कर्मात्मेत्युच्यते। कर्मजनितसंस्कारोऽपि कर्मात्मन्येव सन्तिष्ठते। मीमांसादर्शनशास्त्रे तावदिदं कर्म नितरामपूर्वपदं लभते। न्यायदर्शन

ईश्वरः सर्वभूतानां हृद्देशोर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥(गीता)(७)

यद् यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंश सम्भवम् ॥(गीता)(१०)

स्वप्नेन शारीरमभि प्रहृत्या सुप्तः सुप्तानभिचाकशीति।
शुक्रमादाय पुनरैति स्थानं हिरण्मयः पौरुष एक हंसः ॥
प्राणेन रक्षन्नवरं कुलायं बहिः कुलायादमृतश्चरित्वा।
स ईयते अमृतो यत्र कामं हिरण्मयः पौरुषएक हंसः ॥
॥ श्रुति ॥

शास्त्रे तावदिदं कर्म धर्माधर्मपदमायत्ते।

अयमेव कर्मात्मा भूतात्मनः अवस्था विशेषमात्रं विद्यते। भूतात्मा भूतेषु अनुस्यूतात्मनः परिणाम एव। भूतेष्वनुस्यूतात्मनः जडस्वभावतया कुतः चैतन्यं समागच्छेदिति न शङ्कनीयं कर्मंतु नितान्तं स्वच्छतयाऽस्मिन् चिदात्मना प्रतिभासते। अयमेव विचारपक्षः वेदमूलक दर्शनस्य। यथा सूर्य प्रतिबिम्बाक्रान्त कासारः स्व प्रकाशं प्रक्षिपति तथा तस्य चिदात्मनः प्रतिबिम्बस्य चिदाभास नाम्ना व्यवहृतः वेदान्तादि दर्शन शास्त्रे। अयमेव चिदाभासः व्यावहारिको जीवः। शरीरबुद्धि मनसां चैतन्यस्य सञ्चार एव चिदाभासः। चिदाभासस्य मुख्योत्पादक बिम्बः चिदात्मना प्रसिद्धः। स एवेश्वरांशोऽस्तीति। अयमेव दर्शन शास्त्रेषु प्रत्यगात्म संज्ञां लभते। अतएवेश्वरः सर्वभूत हृदये विराजते। [illegible] यन्त्रारूढवतामिव स्वमायया सर्वाणि भूतानि भ्रामयति। यथा च भगवद्गीतायां भगवान् वासुदेवः।(१) अयमेव चिदात्मा गीतायां वासुदेवस्य विवक्षितोऽस्ति। [illegible] उपनिषत् साहित्येऽपि अयमेव चिदात्मा तावदन्तर्यामी सर्वेषु भूतेषु व्याप्तोऽस्ति। सर्वभूतान्यभिव्याप्य सर्वान् नियमयति। अयमेवान्तर्यामी सर्वजीवेषु व्यवस्थितः।

परमेश्वरोत्पादितेषु प्राणिषु [illegible] ऊर्ज्ज विभूति रूपतया व्याप्तानि बलानि त्रीणि प्रकाराणि विद्यन्ते [illegible] ब्रह्मबल क्षत्रबल विड्बल भेदात्। तत्र ब्रह्मबलं विभूतिः, क्षत्रबलमूर्ज्जम्। विड्बलं श्रीः। एतेषां बलानां यत्र वैशिष्ट्यं एवमाधिक्यञ्च दृश्यते स एवेश्वरावतारतया ऽवगन्तव्यः। तथा च गीतायां भगवद्वाक्यम्।(२)। एतावता भूतात्मनः नितरामष्टौ भेदाः मन्त्र ब्राह्मणात्मकेषु तत्र तत्र निरूपिताः विद्यन्ते।

एतदतिरिक्तमपि भूतात्मनः सहचरः हंसात्मा श्रुतौ प्रसिद्धिं भजते। तद्यथा—(३) तात्पर्यमिदमाकलयन्ति विद्वांसः यत् पञ्चीकृतं वायुमाश्रित्य सूर्यमण्डल परिप्राप्त ज्योतिषा विज्ञान सम्पन्नत्वमाकलय्य तथा चन्द्र ज्योतिषा प्रज्ञान सम्पन्नतामधिकृत्यायं हंसात्मा भूतात्मना सह शरीरे सन्तिष्ठते।

परन्त्वनेन शरीरस्यावयवेन मांसरुधिरास्थि मज्जादिनाऽस्य हंसात्मनः नास्ति कोऽपि सम्बन्धः। एवं कर्मजनित संस्कारस्य नैतस्मिन् प्रभावोऽस्ति। जाग्रत् स्वप्न सुषुप्ति प्रभृतयोऽप्यवस्थाः नास्य जायन्ते। विनष्टेऽपि शरीरे अयं हंसात्मा वायु रूपेण विचरति। [illegible] पुराणादि काव्येष्वपि अस्य हंसात्मनः [illegible] दिग्दर्शनं विद्यते। एवं प्रकारेण भूतात्मनः अष्टौ भेदाः प्राप्यन्ते। शरीरात्म वैश्वानर तैजस कर्मात्म चिदाभा

(१) "शतपथ ब्राह्मण" "काण्ड-६ - अ० १, ब्रा० ।। १"

म० म० [illegible] [illegible]
"गिरिधरशर्मा चतुर्वेदी" "वैदिक विज्ञान"

(२) "सम्पूर्णानन्द" "आर्यों का पुराना देश"

(३) इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ।।
"महाभारत" "आदिपर्व"

(४) सायणकृत तैत्तीय संहिता भाष्य भूमिका ।

सोऽजर्जशीर्णां भेदात्। एकः ईशात्मा च। अन्यच्च परात्परव्ययाक्षराक्षरभेदात् चतुरः। क्षरपुरुषाणां पञ्चभेदाः विद्यन्ते। ~~[illegible]~~ शान्तात्म विज्ञानात्म प्रज्ञानात्म प्राणात्म महानात्मनां भेदात्। अतः सर्वान् भेदान् समाकलय्य जीवेश्वरयोरष्टादशभेदाः श्रुतीनां विभिन्नेषु स्थानेषु विभिन्नप्रकारकतया समुवर्णिताः विद्यन्ते। अनेनैव हेतुना क्षर पुरुषाणां विकास एव समस्त प्रपञ्चोऽस्ति।(ब) (२।

एतावता वाक्य कदम्बेन भारतीय दर्शनस्य वेदः प्राण एव। एवं भारतीय धर्मे एवं नेपाली धर्मे च या जीवन शक्तिः दृष्टिगोचरा जायते तस्याः मूलं कारणं वेद एव। अतएवास्य विचारणामानसरोवरः वेदः। यस्मात् वेदात् दार्शनिक विचारधाराप्रवाहः समागत्य भारतभूमेः मध्यभागे हिमालयं समलङ्कृत्य नेपालभूमिमभिषिच्य एव सत्त्वं रक्षितुमिति स्वोद्गमभूमौ निरन्तरमवलम्बते।

“वेदानां महत्त्वम्”

“~~[illegible]~~” अयं ज्ञानराशिर्वेदः भारतीयनेपालीय साहित्यस्य मात्रं नास्ति सर्व प्रथमो ग्रन्थः किन्तु मानव मात्रस्येति नास्मात् विशिष्टः कोऽपि प्राचीन ग्रन्थः समुपलभ्यते साम्प्रत पर्यन्तम्।(२) भारतीय नेपाली तत्त्वज्ञानानां भाकृति प्रकृति विकासोद्गम समुचितानुसन्धानायास्य ग्रन्थमणेः वेदस्य पर्यालोचनं समेषां पौरस्त्यानामेव न हि समपेक्षते किन्तु पाश्चात्यानामपि नितान्तमावश्यकमेव।

परन्तु श्रुति सम्मत दार्शनिक विचाररूप रेखा सन्दर्भ विषये विद्यते पर्याप्त मत भेदः तस्यास्याः समस्यायाः समाधानं वेदोपनिषत्साहित्यानां पर्यालोचनेनैवाऽचिरमेव ~~[illegible]~~ सम्पत्स्यते।

अद्य प्रातः द्वाभ्यां प्रकाराभ्यां वेदमधीयते मन्वते च विद्वांसः। तत्रैका प्राचीना पद्धतिः तदपराऽर्वाचीना पद्धतिः। वेदार्थान् परिशीलयतुं देशान्तर साहित्यस्याध्ययनं नितरामपेक्षते। इतिहास पुराणाभ्यां वेदान् परिशीलयितुं क्षमते। वैदिकरहस्यानि प्रतिपत्तुं तत् सन्दर्भ ग्रन्थाध्ययनमप्यपेक्षते। इदमेवाभिप्रायमवलम्ब्य महाभारते भगवान् वेदव्यासः सुतामित्यचीकथत्।(३।

उभयमत साधारणतया दृष्टिभेदस्य मीमांसां विभिन्न पद्धत्या कृतवान्। यद्यपि पाश्चात्यास्तु नितान्तासभ्याऽर्धसभ्य प्राथमिकार्यजनस्याभिमत गायनादधिकं महत्त्वं वेदस्य नैव स्वीकुर्वते। परन्तु भारतीय कल्पनानुसारं वेदस्तावन्नित्यः। एवं विविध ज्ञानस्यामूल्य भाण्डागारः। धर्म तत्त्वं साक्षात्कर्तॄणां महर्षीणाऽनुभूत परमतत्त्वस्य परिचायकः। अतएवेष्ट प्राप्त्य निष्ट परिहारलौकिकोपाय प्रतिपादयिता वेद एव प्रतीयते।४॥

(१) ~~नमे स्तेनो~~

नमे स्तेनो जनपदे न कदर्यो न मद्यप:।
नानाहिताग्निर्ना विद्वान् न स्वैरी स्वैरिणी कुत:॥
॥छा० उ०॥

(२) ॥सवे सौम्येदमग्र आसीत् एकमेवाद्वितीयम्॥ ॥[illegible]॥
॥छा० उ०॥

पाश्चात्यानां

तथापि पाश्चात्यास्तु महतश्रमेण समस्तान् वेदग्रन्थान् पर्यालोच्य वेदस्य महत्त्वमाकलयन्तः तस्य गुरुत्वमपि स्वीचक्रिरे। परन्तु ते विकास वाद सिद्धान्तमाकलय्य विकासवाद सिद्धान्त भित्तौ सदा सन्तिष्ठन्ते। अतएव विचारानुसारं तावदयं वेदशब्दः आर्याणामैतिहासिक वृत्तानि विज्ञापयितुं साहाय्यमादत्ते।

यद्यपि पाश्चात्य विदुषामाधारभूत विकासवादस्य वर्तिं वैदिक विज्ञानेन कर्तुं शक्नुमः। तथापि नितान्तमावयो विकासवादे महद् पार्थक्यमवगच्छामः।

ह्रासि

अद्य प्रातः विकासवादएव समेषां कृते श्रेयकोऽस्तीति पक्षं कक्षीकुर्वन्ति। वैज्ञानिक विचारप्रवाहस्तु जीवानामुत्पत्ति सन्दर्भे विकासवाद पक्षं स्वीचकार। ऐतिक विचारधारायां मानवानां प्रतिभायाः क्रमशः विकासस्य परिणामः। किन्तु ऐतिहासिक विचारधारायाः विकासवादं पर्यालोच्य वयमवगन्तुं शक्ष्यामः यत् नैवायं संसारः कदापि विकास मार्गोऽग्रं गच्छति। किन्तु तद्विपरीतमेव ह्रासपक्षः समागच्छति। कथंतु नास्त्यद्य हरिश्चन्द्रसदृशः सत्यवादी, नास्त्यद्य शिव सदृशी दयालुता, नास्त्यद्य भीष्म सदृशः ब्रह्मचारी, नास्त्यद्य विश्वामित्र सदृशः तपस्वी, अतः संसारे दुर्लभाः विद्यन्ते तावदित्थं जनाः।

सत्य त्रेता द्वापराणां कृते समीक्ष्य साम्प्रतपर्यन्तं ह्रासवादएव लोचनपथे समागच्छति। यम नियमाभ्यामेव विकास ह्रासयोः व्याख्या स्वीकार्या। अतएव कैकय देशस्य राजाऽश्वपतिः ऋषीणामग्रे प्रतिज्ञामिमां समुद्घोषयतिस्म।(१)

किमद्य कोऽपि विषमायां परिस्थित्यां प्रतिज्ञामिदृशीं कर्तुं क्षमते। अतएव पूर्वापर सन्दर्भं विचारमासाद्य निष्पक्ष भावतया कथितुं क्षमते खलु यदयं संसारः प्रतिपलं ह्रासतामाकलयति। नकेवलं भौतिकविज्ञानस्योन्नतिः संसारस्योन्नतिः कथितुमिति शक्या। अस्मादेव कारणादाध्यात्मिकोन्नतिः संसारस्य विकासे महत्त्वपूर्णभूमिकां दातुं शक्नुयात्। मुखमस्तीति वक्तव्यमितिवत् असभ्यार्धसभ्य ग्रामीकार्य जनस्य गायनमात्रमुदीर्य स्वात्मनः पण्डितम्मन्य मानत्वं च्युत्वा स्वय महतोल्लासेन वचनमिदं तेषां प्रलापमात्रम्।

वेदानां सिद्धान्तस्तु हिमालयस्योत्तुङ्ग शिखरश्रेणीव निश्चलः। वेदानां घण्टा घोषः प्राचीनकालतएव सर्वमान्यः।(२) नाधुनापर्यन्तं पाश्चात्याः मौलिकतत्त्वेनैकेन परस्परं विरुद्धे तत्त्वे

(१) श्रुतिश्च नः प्राणमतीन्द्रियार्थ विज्ञानोत्पत्तौ ।।
॥ शाँकरभाष्यम् ॥

(२) ॥श्रीमद् भागवत ॥ ॥स्कन्धः ॥ ॥- १-४-१९-२२ ॥

(३) - ॥२-१-३५-३८॥ जैमिनिः ॥

कथमभूतामिति विचारग्रन्थिं निराकर्तुं नैव क्षमन्ते। अतएव ते पाश्चात्याः दर्शनशास्त्रस्य मनोविनोदमात्रत्वं स्वीकृत्य स्वात्मनः वञ्चनकेलिलोलत्वं व्यजीज्ञपन्।

श्रुतिप्रतिपादिताऽऽध्यात्मिकमूलरहस्यग्रन्थिं स्फोटयितुं क्षमते चेत्तदा वेदोपनिषदां विचारपक्ष एवेति निश्चयं प्रतीमः।(१)

~~वेद~~ ~~वि~~ “वेदविभाग” संहिता ”

“मन्त्रब्राह्मणयोर्वेदनामधेयम्” (आप॰ परि॰ ॥३१॥ अतएव मन्त्रब्राह्मणात्मको वेद इत्यपि संगच्छते।

(विशेष) यद्यपि सामान्यतया वेदस्य त्रयो विभागाः विद्यन्ते संहिताब्राह्मणाऽऽरण्यकभेदात्। मन्त्राणां समूहः संहिता। कस्यापि देवस्य स्तुतौ ~~प्रयुक्तार्थस्मारक~~ प्रयुक्तार्थस्मारकवाक्यं नाम मन्त्राः। चतस्रः संहिताः विद्यन्ते। ऋक्यजुःसामाथर्वभेदात्। पुराणव्याख्यानानुसारं संहिताचतुष्टयस्य संकलनं महर्षिवेदव्यासः यज्ञस्यावश्यकत्वं सुविचार्य नितान्तमकार्षीत्। (२) वैदिकयज्ञानुष्ठानं सम्पादयितुं चत्वारः + ऋत्विजः समपेक्ष्यन्ते। ऋक्यजुःसाम्नां समानविभागतया त्रयीति संज्ञां लभते। यज्ञार्थवशेन पादव्यवस्था ऋक्। गीतिषु सामाख्या। शेषे यजुः। तथा च ~~जैमिनि~~ जैमिनिसूत्रम्।(३) अतएव त्रयी धर्मेण व्यपदेश्यः। धर्ममर्मज्ञाः विद्वज्जनाः धर्मिणं त्रैविद्येन प्रतिपादयन्ति।

वैदिकयज्ञानुष्ठानस्य पल्लवितवर्णनं ब्राह्मणग्रन्थे समुपलभ्यते। ब्राह्मणग्रन्थानन्तरं आरण्यकमेव समागच्छति। अरण्ये पठनीयतयाऽऽरण्यकमुच्यते। ग्रन्थेऽस्मिन् वानप्रस्थाश्रमोपयोगी क्रियाकलापस्य वर्णनं प्राप्यते। विशेषतः यागविधानस्याऽऽध्यात्मिकरहस्यं ग्रन्थेऽस्मिन् समुपलभ्यते। आरण्यकस्यान्तिमभागस्तावदुपनिषत् साहित्यम्। अध्यात्मविषयकमहत्त्वपूर्णसमस्यायाः विद्वत्तापूर्णविवेचनं प्राप्यते। अतएव वेदान्तशब्देनोपनिषदं व्यवहरति।

इदमेव कथ्यते विदुषा खलु वेदप्रतिपाद्यसिद्धान्तस्य विवेचनमपि प्राप्यते ग्रन्थोऽस्मिन्। अध्यात्मविषयक ~~समस्यां~~ समस्यां समाधातुं प्रतिपादितविषयदृष्ट्या वेदस्य द्वौ भागौ विद्येते। तत्रैकं कर्मकाण्डं तदपरं ज्ञानकाण्डञ्च।

संहिताब्राह्मणारण्यकेषु प्रधानतया कर्मकाण्डपरकत्वविवेचनमवेक्ष्य संहिताब्राह्मणारण्यकानि कर्मकाण्डेऽन्तर्भवन्ति। ज्ञानविवेचनपरकत्वेनान्तर्भवति ज्ञानकाण्डे उपनिषत्साहित्यम्। वैदिकदर्शनस्य मूलसिद्धान्तस्तु उपनिषदि समुपलभ्यते। संहिताब्राह्मणारण्य

एवं परस्परं सर्वाः सम्मेल्य सहस्रोत्तरैकशतत्रिंशत् शाखाः प्राप्यन्तेस्म परन्त्वधुना दश द्वादश शाखाः केवलं समुपलभ्यन्ते।

“स्रोतदर्शन”

कारणं सत्यपि कर्मकाण्डप्राधान्ये संहितादावध्यात्मविषयक विपुल रहस्योद्घाटनं प्राप्यत एव। परन्तु दौर्भाग्यमेव पौरस्त्यानां। यदस्माकमवहेलनया वेदस्यानेकशाखाः साम्प्रतं नोपलभ्यन्ते।

पातञ्जलमहाभाष्यानुसारं ऋग्वेदस्यैकविंशति शाखाः, यजुर्वेदस्य शतं शाखाः, सामवेदस्य सहस्राणि शाखाः, अथर्ववेदस्य नव शाखा तदानीं समुपलभ्यन्तेस्म। विषय दृष्ट्या समस्तासु संहितासु ऋक् संहिता महत्त्वपूर्णा सर्वप्रथमा चेति। ऋग्वेदस्य समस्त सूक्त संख्यानि एकीकृत्य सहस्रोत्तराष्टाविंशति सूक्तानि विद्यन्ते।

सच ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः। तत्र सूक्तं चतुर्विधम् - ऋषिसूक्त देवता सूक्त छन्दः सूक्तार्थ भेदात्। एकर्षि दृष्टमन्त्राणां समूहो ऋषि सूक्तम्। एक देवताक मन्त्राणां समूहो देवता सूक्तम्। समान छन्दसां मन्त्राणां समूहो नाम छन्दः सूक्तम्। यावदर्थ समाप्तानां मन्त्राणां समूहोऽर्थसूक्तम्। सुष्ठूक्तत्वात् सर्वं सूक्तमित्याख्यायते।

समस्ते ऋग्वेदे दशमण्डलानि विद्यन्ते। प्रतिमण्डलं तदावान्तर विभागस्यानुवाकं कथयन्ति विद्वांसः। सच विभागोऽपि सूक्तत्वेन परिणमते। अष्टकानां संख्याः अष्टौ विद्यन्ते। प्रत्यष्टकं अष्टौ अध्यायाः प्राप्यन्ते। अनेन प्रकारेण समग्रे ऋग्वेदे चतुषष्ठितमाध्यायाः प्राप्यन्ते। प्रत्याध्यायं सूक्तानि जायन्ते।

अनयोर्विभागयोः प्रथमविभागः नितान्तैतिहासिक दृष्ट्या महत्त्वपूर्णः। एषु मण्डलेषु प्रथम दशम मण्डलयोः विभिन्नेन ऋषिणा दृष्टमन्त्राः संगृह्यन्तेस्म। नवम मण्डले सोमविषयक मन्त्राः समुपलभ्यन्ते। द्वितीय मण्डलादारभ्याऽष्टम मण्डल पर्यन्तं क्रमशः गृत्समद विश्वामित्र वामदेवात्रि भरद्वाज वसिष्ठ कण्व प्रभृतयो ऋषयः विद्यन्ते। इमे खलु ऋषयः मन्त्रद्रष्टारः। न तु कर्तारः।

ऋग्वेदस्याध्यात्मिक विवेचना समस्तानां दार्शनिकानां विपुल तात्त्विक विचारोद्गमभूमिः विद्यते। एवं रमणीया प्रकृतिसुन्दरी तावदुषा ऋग्वेदस्य कमनीय कल्पना वैशिष्ट्यं धत्ते। सा तावदुषाकाशस्य पुत्री। सा तमोमय रजन्याः रमणीय रूपधारिणी लोकोत्तराह्लादसम्पन्ना भगिनी सर्वदा विराजमानैव लोचनगोचरायते। प्राचीन कलेवापि साऽभिनवा युवतिः सर्वेषां चेतांसि नितामाह्लादयति। वैदिक मन्त्रेषु सुन्दर कमनीय कल्पना दार्शनिक जगतीतले नितां

(१) एकं सद् विप्रा वदन्ति ।।"ऋग्वेद" अथात आदेशो नेति नेति ।
"बृ० उ०"।"२-३-११"।

(२) हिरण्य गर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथ्वीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।
ऋ०-१०-१२१-(१)

(३) "पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।।"ऋ० -१० म०।।

(४) अदिति द्यौरदिति रन्तरिक्ष मदिति र्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना अदिति जात मदिति जनित्वम् ।।
"ऋ०·१·८९।१०।।

वैदि-

(५) इन्द्रं मित्रं वरुण मग्नि माहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्राः बहुधा वदन्ति अग्निं यमं मातरिश्वान
माहुः । ऋ० -१-१६४-४६।।

उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः ।।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्व मन्तः समाहितम् ।।
"बृ० उ०।। ११।७१।।

न्त मुषायाः स्तुतिमन्त्रो ~~सु~~ समुपलभ्यते।

वस्तुतस्तु ऋग्वेदः विश्वस्यानुपम शक्ति शालिना जगन्नियन्त्रा सर्वदा पर्यचीयत। तथा विभिन्नाः खलु देवाः तस्यैव व्यापक विपुल शक्ति शालिनः प्रति निधित्वमाकलयन्त एव विद्यन्ते। सदाऽद्वैतत्त्वमाश्रित्य विराजते वैदिकधर्मः। अनेकेषु नितामेकत्वकल्पना विभिन्नेष्वभिन्नत्व कल्पना च दार्शनिक जगतीतले विलक्षणमिदं मौलिक तत्त्वमालैव।(१)

अतएवैतादृशा निगूढतम तत्त्वानुसन्धान प्रयास गौरवः केवलमार्षचक्षुः सम्पन्नानां ऋषीणामेव। तद् यथा -(२)

ऋग्वेदे दशममण्डलस्य सूक्तमिदं नितान्तमाध्यात्मिकतत्त्वेन व्याप्तम्। अनेनैव हेतुना परमप्रतिभा सम्पन्न दार्शनिक विचारोद्गम भूमिभूतं सूक्तमिदं ऋग्वेदेषु सदा सन्निहितम्। अयमनिर्वचनीय एव। यत्र समस्तानि भूमण्डलानि समस्तान्यन्तरिक्षाणि चाश्रित्य प्रत्यवतिष्ठते। वैदिक यज्ञादिकर्मणि तं प्रसादयितुं वयं जुहुमः।(३)

एवं प्रकारेणादितेश्च पुरुषस्य सर्वव्यापकत्वं मत्वा समस्तविश्व पदार्थेण सहाऽभिन्नत्वं मनुते।(४)

मनुष्याणां ~~मधु~~ मधुरवाण्यां स एव चकासते, विहगानां कलरवे स एव विद्योतते। विकसितपुष्पाणां स एव हास्यं विकासयति। घनपटलानां गर्जने स एवोद्दाम भावं प्रदर्शयति। चञ्चत्तडोर्मिमालां स एव स्व प्रकाश सूत्रे ग्रन्थयति। नभोमण्डले रजनीकान्तं स एव नियुङ्क्ते। भगवतः मरीचिमालिनः मरीचिमालां प्राचीभव्यभाले स एव चकासयति। भिन्नत्वेषु नितामभिन्नत्वं केनाप्यज्ञायि चेत्तदा स एव वैदिकानामार्यः। अस्यैवाभिन्नतत्त्वं पल्लवीकृतमुपनिषदा। अयमेवाभेदविषयः सदोपनिषद्प्रतिपाद्यः।

ऋग्वेद संहितायाः नासदीय सूक्तेऽस्याभेदवादस्य मूलमन्त्रं कानामार्यः सर्वप्राथम्येन ददर्श। प्रस्तुतसिद्धान्तं संश्राव्य वैदिकार्यः समस्तावनीतले विश्वशान्तेः प्रथममन्त्रमश्रावयत्।

वैदिकसाहित्येषु ग्रन्थरत्ने तावदुपनिषत्साहित्येऽध्यात्मिक विद्यायाः गूढतम रहस्यानां विशद्विवेचनं कृतमस्ति। भारतीयतत्त्वज्ञानानां नेपालीय तत्त्वज्ञानानाञ्च मूलं नितान्तमुपनिषत्साहित्यमेव विद्यते। अतएवेदं साहित्यं वास्तविकमाध्यात्मिकस्य मानसरोवरः। यतः विभिन्नज्ञान सरित् धारा निर्गत्य पुण्यभूमावार्यावर्ते मानवमभ्युदयाय नितरां नितान्तं प्रवहति। तथा च प्रतिपादितमस्ति वेदे।(५) एवं महाभारते भगवान् वेदव्यासः। तथा

(व) धर्मे ऽर्थे च कामे च ~~मोक्षे~~ मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥
॥ महाभारत ॥

सर्वोपनिषदो गावो दोग्धा गोपाल नन्दनः ॥
पार्थो वत्सः सुधी र्भोक्ता दुग्धं गीतामृतं महत् ॥

चोक्तम् ।(ब)

"उपनिषद्" ।"प्रस्थानत्रयम्"

एवं प्रकारेण त्रीणि प्रस्थानानि विद्यन्ते हिन्दूदर्शने । यानि वैदिकं धर्मानुसारं गन्तव्यपथं निश्चिन्वन्ति। भारतीयनेपालीय विचारशास्त्रमनुसृत्य सर्वश्रेष्ठोपजीव्य ग्रन्थेषु प्रस्थानत्रयेषु प्रथमं प्रस्थानमुपनिषत्साहित्यमेव। द्वितीयं प्रस्थानं श्री वासुदेवस्य परमकारुणिकस्य भगवतः लीलापुरुषोत्तमस्य भगवद्गीतावाक्यम्। अतएवोक्तिः परमश्रेयसी विद्यते तथाच -(ब) तृतीयं प्रस्थानं भगवता बादरायणव्यासेन प्रणीतं ब्रह्मसूत्रम् ।। यस्मिन् संप्राप्तोपनिषद्विरोधवाक्यानां समन्वयं सङ्गमय्य तदैकत्वं व्युत्पाद्य विभिन्नतार्किकप्रमाणानि चिच्छेद ।

"एकोऽहं बहु स्याम यथा सौम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छा०) स यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः (ब्रह्मणः) सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति। एवं- "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" ((श्वेताश्वतरोप०))

अनेन हेतुना त्रीणि प्रस्थानानि वैदिकधर्मदर्शने महत्त्वं भजन्ते। उपनिषद्ग्रन्थरत्नमिदं समीक्ष्य स्वसिद्धान्तप्रामाण्यस्याऽक्षुणत्वं द्योतयितुं त्रयाणां ग्रन्थरत्नानां स्वमतानुकूलतया भाष्यमीरचन् आचार्यप्रवराः।

उपनिसद् धातोः क्विप् प्रत्यये कृते प्रयोगोऽयं निष्पद्यते। अध्यात्मविद्येति नितरामुपनिषद्शब्दार्थः। यां विद्यामधीत्य दृष्टानुश्राविकविषयेभ्यः वैतृष्ण्यं लभते। संसारबीजभूतमविद्यामुच्छिद्य लभन्ते विद्यां मुमुक्षवः। येन गर्भवासमूलानि विनश्यन्ति। सैवाऽऽध्यात्मविद्या। उपनिषद्शास्त्रम् ।

यद्यपि मुक्तिकोपनिषद् विचारानुसारं अष्टोत्तरशतकानि विद्यन्ते तमामुपनिषद् साहित्यानि। कथं तु ऋग्वेदात् दशोपनिषदः प्राप्यन्ते। एकोनविंशतिसंख्यकोपनिषदः समुपलभ्यन्ते शुक्लयजुर्वेदात्। द्वात्रिंशतसंख्यकोपनिषत्साहित्यानि कृष्णयजुर्वेदादवगम्यन्ते। षोडशसंख्यकोपनिषदः प्राप्यन्ते सामवेदात्। एकत्रिंशत संख्यकोपनिषदः प्राप्यन्तेऽथर्ववेदात्।

एतेषु उपनिषत् साहित्येषु द्वादशोपनिषत् साहित्यानि विषयप्रतिपादनवैशद्येन प्राचीनत्वेन च नितान्तं प्रामाण्यं भजन्ते तराम्। अमूनि द्वादशोपनिषत् साहित्यानि समीक्ष्य भगवान् शङ्कराचार्यस्तु

नष्टोमोहः स्मृतिर्लब्धा त्वत् प्रसादात् मयाच्युत ।
स्थितोऽस्मि गत सन्देहः करिष्ये वचनं तव ।। (गीता)

(२) यस्मात् क्षरमतीतोऽहम् क्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।। (गीता)

“गीतारहस्य” “तिलक”

स्वविशिष्टं भाष्यं प्रणिनाय। यस्याः भाषा नितरां प्रौढा। उपनिषत् साहित्यस्याऽऽध्यात्मिकपक्षः भगवतः वासुदेवस्य गीतायां स्पष्टमेव परिपूर्णत्वमाकलयति। परमकारुणिको भगवान् वासुदेवः निष्काम कर्मयोगमर्जुनोपदेशव्याजेनाऽऽत्मतत्त्वप्रचाराय श्रुत्याध्यात्मत्व सन्देशं प्रादादिति विश्वसाहित्येतिहासाय। गीतायाः निष्कामयोगस्तु सिद्धान्तप्रयोगयोः निकषपरीक्षोत्तीर्णः। तेनाऽऽध्यात्मिकत्वं व्यावहारिकपक्षधरातले समवतार्य नितरां वासुदेवस्य गीता वैशिष्ट्यं विश्वसाहित्ये धत्ते। यथाध्यात्मिकपक्षः गीतायाः युक्तियुक्तः तथा व्यावहारिकपक्षोऽपि श्लाघ्य एव।

गीताव्यक्तात्मतत्त्वं समुपदिश्य व्यावहारिकपक्षे परीक्षितुं तत् सदा प्रवर्तते। वासुदेवं प्रत्युवाच यथार्जुनः गीतायाम्।-

(१)

पुरुषोत्तम तत्त्वमेव गीतायाः रहस्यं वीक्षतीति। तदेवाध्यात्मिक तत्त्वं विद्यते। सांख्य दर्शनानुसारं जगतः कारणभूता नितरामजन्मा प्रकृतिः सदाऽव्यक्ता। सएव खलु आत्मा। गीतायां क्षरपदवाच्यत्वमचला प्रकृतिरेव लभ्यते। तस्य कूटस्थ पुरुषः विद्यतेऽक्षर तत्त्वम्। सएव पुरुषोत्तमः। सैवाचला प्रकृतिः क्षरस्वभावात्मकः लभतेऽऽत्मसंज्ञाम्। तथा च प्रत्यपादि गीतायां वासुदेवेन (२)

जडात्मकजगतः भिन्नाऽव्यक्ता प्रकृतिः सदात्मरूपेण प्रत्यवतिष्ठते। तस्मादपि पर एव पुरुषोत्तमः। पुरुषोत्तमोऽयं सदा क्षरत्वादपि पर एवाऽऽस्ते।

श्रीमच्छङ्कराचार्यानुसारं गीतायाः मुख्यं प्रयोजनं निवृत्तिमार्ग एव। निवृत्तिमार्गस्य प्रतिपादनं ज्ञानेनैव सम्भवति। अतएवात्मतत्त्वं विज्ञातव्यं सर्वैः। श्रीरामानुजाचार्य विचारानुसारं परमात्मतत्त्व प्राप्तये सर्वश्रेष्ठो मार्गः भक्ति एव। अयमेव गीतायाः प्रतिपाद्य विषयः। तेषां विचारानुसारं ज्ञानरहस्या विशिष्टाद्वैत एव तथाचाररहस्या परमात्मनि पुरुषोत्तमे भक्तिरेव साधीयसी सर्वोत्कृष्टा च।

लोकमान्य बालगंगाधर तिलकस्तु स्वकीयं गीतारहस्यं निर्माय प्राचीनाचार्य सिद्धान्ते वैषम्यमुपदर्श्य गीताभिमतं प्रवृत्तिमार्गं नितरामुदीर्य गीतायाः तदेव लक्ष्यं विद्यत इति प्रतिपाद्य निष्काम कर्मयोग साधनं प्रतिपादयामास।

(३) लोकमान्यस्तु स्वाभिमत सिद्धान्तं विद्वत्तापूर्णप्राञ्जलभाषया अचीकथत्। यद्यप्यमी महोदयाः भाष्यकाराणां व्याख्यान

((सर्वभूतस्थमात्मानम्)) गीता । (१)
((सर्वभूतानि-चात्मने)) गीता)) (२)

विद्याविनय सम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैवाश्वपाके च पण्डिताः समदर्शिनः ॥(३)
(गीता)

ते ध्यान योगानुगता मपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् ।
((श्वेताश्व)) (४)

(५) योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥
अन्यच्च - गीता -(६-४७)

नि सम्मानतया मन्यन्ते तथापि पूर्वोक्त विचारेषु गीतोपदेशस्य व्यापकत्वे नैव दृष्टिमदासिषुः।

परन्तु गीता शास्त्रं मानव प्रकृतेः वैविध्यं समवलोक्य चरम लक्ष्यं प्राप्तुं त्रिविधोपायस्य व्यवस्थां दत्तवान्। अतएव चिन्तनाभिलाषी साधकस्तु ज्ञानस्यैव पन्थानं प्रत्यपीपदत्। यदितो सांसारिक विषय वस्तूनि चेतसा लक्ष्यीकृत्य कर्मयोगस्य गान्यामपीपठन्। तद्वयो मानसिक वृत्ति विकासं वाञ्छन्तः भक्ति गान्यामप्रपन्यन्।

अतएव भगवान् वासुदेवस्तु गीतायाः प्रचारं वाञ्छन् कर्म ज्ञान ध्यानानां समन्वयं सम्पाद्य गंगायमुनयोः विमल प्रवाह इव ते विमल धाराप्रवाहः तत्त्वेच्छूनां ज्ञान पिपासामशीशमत्। यद्भवतु तत्र नास्माकं विप्रतिपत्तिः ~~[illegible]~~ विचिकित्सा वा परन्तु गीतासम्मतं ज्ञानं तदेवाऽऽस्ते सर्वभूतेषु नितान्मेकत्वं पश्य। सर्वभूतेषु तदैकत्वं ~~[illegible]~~ यत् सएवात्मा।(१) अतएव भगवान् वासुदेवः योगेश्वरः स्व ~~[illegible]~~ दुर्लभ विराट दर्शने व्यापके चात्मनि सर्वभूतानि चादर्शयत्।(२) अतः भगवतः वासुदेवस्यायं घण्टाघोषः वरीवर्ति यत् समस्तेषु जीवेषु सदैकत्व व्यवहारः समादर्तव्यः।(३)

अतएव भगवती गीता समस्तेषु प्राणिषु स्थूलादप्य सूक्ष्मतमेषु आत्मानं द्रष्टुं समत्वमेवादिशति। तथा समस्तेषु जीवेषु समदर्शित्वं समवर्तित्वं प्रतिपत्तुं प्रेरयति। भगवती गीता षष्ठतमेऽध्याये उपनिषद् पद्धत्या ध्यान योगं प्रस्तौति। श्वेताश्वतरोपनिषद् वर्णित ध्यान योगस्य स्पष्टं प्रभावः परिलक्ष्यते भगवद्वाक्ये।(४)

वायोरपि सुदुष्करं मनः निग्रहीतुं आसन प्राणायाम प्रत्याहारादयः योग साधनत्वेन निर्दिष्टाः भगवत्या गीतया। विषय वासना पङ्केन कलुषितं चेतः नहि परमात्मानं साक्षात्कर्तुं शक्नोति। तेन प्राणायामादि परिष्कृतं चेतः परमात्मनि संघटते। तस्माद्योगेश्वरः नहि शुष्कं योगमपेक्षते। किन्तु संसारस्य प्रतिवस्तूनि परिव्याप्तस्य सर्वभूत संयोगित्वात्मकात्मनः व्यापकत्वमेवाभिमतं भगवतः वासुदेवस्य। ज्ञानकर्मभ्यां विलक्षणमेव योगः। ज्ञान विज्ञानाभ्यां व्याप्तः सर्वभूतान्तरात्मा संसारस्य ~~प्रति वस्तूनि~~ प्रतिवस्तु विद्यमानएवेति निश्चयं प्रत्येमि।

तथाच गीतायां वासुदेव वाक्यम्(५)

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं सयोगी परमो मतः।।(गीत)

(१) शांकरभाष्यम्। "गीता"

(२) "मामनुस्मर युध्यच" "गीता"

(३) यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।
(गीता) (१८-४६)

विभिन्नमार्गाणां समन्वयं व्युत्पाद्य साधनमार्गस्य सौलभ्योपपादनमेव गीतायाः वैशिष्ट्यमाभाति। कर्मज्ञानध्यानानां वैविध्येनापि तदपि चैकत्वमेव प्रतिपादयति। विभिन्नमार्गाणां परस्परं सामञ्जस्याय तदेवोपदिशति।

भगवती गीता सकामनिष्काम भेदेन द्वे उपासने प्रतिपादयति। एका सकामोपासना तदपरा निष्कामोपासना। निष्कामोपासना सर्वोत्कृष्टा सर्वश्रेष्ठा च। श्रीमच्छङ्कराचार्यस्तु उपासनामाचक्षते यत्- उपासनं नाम यथा शास्त्रमुपास्यार्थस्य विषयीकरणेन सामीप्यमुपगम्य तैलधारावत् समान प्रत्यय प्रवाहेण दीर्घकालं यावद् यद् आसनं तदेवोपासना। (१)

ज्ञानकर्मणोः समन्वयः भक्तियोगे सञ्जायते। वास्तविकं निष्कामकर्मयोगेन साफल्यमाकलयितुं शक्नुयात्। यद्यपि कियन्तोहि भक्तिज्ञानयोः पार्थक्यं मन्वते तथापि नायं पक्षः विद्वद्भ्यः रोचते। नहि ज्ञानमन्तरा विमला भक्तिः दुर्लभा। भक्त्यै ज्ञानमपेक्षत एव। नान्यथा ~~भक्त~~ भक्तिः सुलभा।

अतएव दैवीसम्पदं प्राप्य ज्ञानकर्मणोः सामञ्जस्यं सम्पादयितुं भक्तिरेव गीतायाः सर्वेभ्यः ज्यायसी। गीतानुसारं केचन व्याचक्षते खलु सांसारिकविषयवासनां परित्यज्यारण्यमाश्रित्य सर्वभूतेषु व्यापकत्वावगमनमेव गीतानुसारमादर्श इति।

वस्तुतस्तु गीतायाः व्यवहारशास्त्रं मध्यात्मज्ञानस्य दृढभूमौ प्रत्यवतिष्ठते। अतएव योगशास्त्रं कर्तव्यशास्त्रम्। यत् स्वात्मानमवबोधयितुं ब्रह्मविद्यायाः दृढायां शिलायां सन्तिष्ठते। अतएव योगेश्वरः कषायपात्रं परिधाय तुम्बीपालं स्वीकृत्य गिरिकन्दरायां तपः तप्तुं नैवादिदेश। किन्त्वाततायिनं हन्तुं निर्दिष्टवान्। (२ इयमेव भगवत्याः गीतायाः महती शिक्षा। या शिक्षा वैदिकधर्मदर्शनयोः मेरुदण्डः। अयमेव प्रामाणिकः प्राञ्जलः सरसश्चेति। यतोहि गीतायाः तात्पर्यमस्मिन्नेव वाक्ये समाहितं जायते। (३)

एतावता भगवद्वाक्यानुसारं तावदेक एव साधनमार्गः नितरां श्रेयाय विद्यते खलु भगवच्चरणसरोजस्य पूजनं विद्यते। तदप्यर्चनं सिद्ध्येत् स्वकर्मोपासनया। अतः मानवानां कर्तव्यमिदं वर्ततीति यत् वर्णाश्रमनियतकर्मणां सम्पादनमेव। अयमेव गीतायाः व्यवहारादर्शः प्रतिभाति।

(१) गीता सुगीता कर्तव्या किमन्यैः शास्त्र विस्तरैः ।
या स्वयं पद्म नाभस्य मुख पद्मात् विनिसृता ॥
" गीतामाहात्म्यम् "

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्यासीच योगीच न निरग्निर्न चा क्रियः ॥ (२)

(३) " तयोस्तु कर्म सन्यासात् कर्म योगो विशिष्यते "

अनया पद्धत्या भगवती गीता जनान् तावदुपदिशति यन्नहि विषमपरिस्थितेः पलायनवादं शिक्षयति। किन्तु विभिन्न विविध विषयाभिनवाभिनय रंगशालात्मके जगतीतले दुखेष्वनुद्विग्नः सुखे विगतस्पृहः सन् वीतराग भावतया समुच्छ्रितो भूत्वा स्वविषमां परिस्थितिं दूरीकर्तुं निष्कामकर्म वैलक्षण्येन विजयमालामाकलयितुं भगवतीयं भगवद्गीता नितान्तमस्मान् उपदिशति।

अतएव पौरस्त्यानां पाश्चात्यानाञ्च समत्वेन गीतांप्रति समाकर्षणं समेषां कृते नितरां श्रेयः।(१) तेन गीताशास्त्रं सर्वस्यां परिस्थित्यां सर्वस्यामवस्थायां मार्गदर्शकमिति निश्चयं मन्ये।

गान्धी अरविन्द रामकृष्ण परमहंस राधाकृष्णन् प्रभृतयो ~~प्र~~ पाश्चात्य प्रधान दार्शनिकाः स्व प्रतिभा वैचित्र्येण गीतां व्याख्यातवन्तः। एतेषां दार्शनिकानां विचारानुसारं कर्मसन्यास एव गीतायाः प्रतिपाद्य विषयः।(२) एतावता पद्येन स्पष्टमुपजायते यत् निष्काम कर्मयोगस्य वैलक्षण्यं समेषां कृते श्रेयः।

विषमायां परिस्थित्यां निष्काम कर्मयोगोपदेशः गीतायाः नितान्तमावश्यकः। वास्तविकं गीता देशकालाभ्यां परैव ।~~एव~~। नात्र देशकालानां प्रभावः समापतति। अनेनैव हेतुना समाजस्य प्रतिक्षेत्रे गीतायाः वचनोपदेशपीयूषं पातुं समुत्सुकतो भवन्ति। तया गीतया प्रेरणां समनुप्राप्य राजरंकौ समेषां दृष्ट्या समानौ। योद्धाऽपि गीतायाः प्रकाशं तावदेव प्राप्नोति यथा महात्मनां वृन्दम्। वैदिक दर्शने नास्तिकोऽपि विषयः वैलक्षण्यमाधत्ते यथा गीतोपदेशः।

ज्ञान भक्ति कर्मणां निष्काम कर्मयोगस्य वैलक्षण्यं निरवोचत भगवान् वासुदेवः न तथा कस्यापि महत्त्वमिति।(३)

सर्वभूतव्याप्तात्मनः व्यापकत्व सन्दर्भे विश्लेषणात्मक पक्षमादाय भगवान् वेदव्यासः सरस रोचक पद्धत्योद्धव गोप्योः सम्वादेऽऽत्मतत्त्व रहस्यमप्रपञ्चयत्। तथाच -(४)

अहो विधातस्तव न क्वचिद्दया,
संयोज्य मैत्र्या प्रणयेन देहिनः।
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं
विक्रीडितं तेऽर्भकचेष्टितं यथा॥
॥ श्रीमद्भागवत ॥ (द० स्क०)

अस्मिन् चराचरात्मके जगति विद्यमान प्रकाश स्वात्मनः व्यापकत्वम्। सर्वेन्द्रियाणां तत्तदिन्द्रियाणि ~~जन्म~~ जातानि भूताः सर्वे हेतवः ते स्वरूपं नैव केचिद् विदुः। योगिनोऽपि

(७) क्षरः सर्वाणि भूतानि कूटस्थो क्षर मुच्यते ।। (गीता)

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।।

॥ भौतदर्शनं ॥

~~समस्त भूतेषु~~ समस्त भौतिक पदार्थेषु व्याप्तोऽयं प्रकाशः तावदात्मेति व्याचक्षते। कर्मकाण्डिनोऽपि ब्राह्मणाः वेदविद्यया यत्तत्त्वमुपासन्ते तदेव तत्त्वं भवान्। स्थूलादारभ्य सूक्ष्मपर्यन्तं समस्ताः खलु चराचरजीवाः तेनैव तत्त्वेन व्याप्ताः विद्यन्ते।

येन प्रकारेण सूत्रे मणिं प्रतिबध्नाति तथा संसारस्य समस्तानि भूतानि तावदात्मतत्त्वेन नितरां प्रतिबद्धानि विद्यन्ते। परमेश्वरस्य द्वे प्रकृती विद्येते। एका परा तदपराऽपरेति। अपरा प्रकृतिरेव क्षरपुरुषतयोच्यते। तदेव क्षेत्रमस्ति। परा प्रकृतिस्तु क्षेत्रज्ञः। सएवाक्षरपुरुष इत्युच्यते। समस्त भौतिकतत्त्वानां क्षरपुरुषतया निर्देशः।(१)

तत्र क्षराणां विकासः विभिन्नप्रकारेण अवस्था वा सञ्जायते। पृथ्वीजलतेजोवाय्वाकाशमनोबुद्धयहंकारभेदात्। पञ्च महाभूताहंकारबुद्धिरव्यक्तेति। पञ्चज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनः शब्दस्पर्शाः॥ इमे क्षेत्रतया गण्यन्ते।

अमूनि तत्त्वानि गीतानुसारं क्षरपुरुषतया गण्यन्ते। इच्छाद्वेषसुखदुःखानि च क्षेत्राणां विकारतां प्रयान्ति। वैशेषिकन्यायदर्शनानुसारं ते ऽऽत्मनो गुणाः विद्यन्ते। गीतासम्मतौ एतेषां सम्बन्धः क्षेत्रेण सह विद्यते न तु क्षेत्रज्ञेन।

जीवस्य चैतन्यात्मकतया परात्मनः प्रकृतिः क्षेत्रज्ञः स एवात्मा। कृतकर्मणां फलानामाधारतया भोगायतनं शरीरम्। क्षेत्राणां ज्ञानविषयतयाऽऽत्मनः क्षेत्रज्ञत्वव्यवहारः। आत्मनो पादादारभ्य मस्तकपर्यन्तं समग्राणां शरीराणां कृतानुभवतया क्षेत्रज्ञत्वव्यवहारः संगच्छत एव।

गीतादर्शने विभिन्नाध्याये स्पष्टं वर्णयति भगवता ~~भणिति भग~~।(२) आत्मा नैव कदापि जायते। नैव म्रियते। अतएवायं नित्यः। अजन्मेति। शाश्वतः पुराणश्चेति। एतावतात्मनः सदा पुराणत्वेऽपि प्रतिपदं नवीनत्वमेव। हन्यमानेऽपि शरीरे न हन्यते तावदात्मा। तेन नायं हन्ति न हन्यते। परित्यज्य जीर्णवासः नवान्यादत्ते यथा तथा प्रारब्धकर्मणा जीर्णशरीरं विहाय नवान्याधत्ते। यद्यप्ययमात्मा नितरामविकारी तथापि कर्मपारतन्त्र्येण विकारित्वं प्राप्नोति। अनेनैव हेतुनाऽयमच्छेद्यः। एवमदाह्यः। अक्लेद्यः, व्यापकः, सनातनश्चेति। तथा च भगवद्वाक्यम् - गीतायामिति।

॥ अचलोऽयं सनातनः ॥

(१) "ममैवांशो जीवलोके जीवभूत: सनातन:" "गीता"

(२) मयाध्यक्षेण प्रकृति: सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद् विपरि वर्तते।। गीता
(९-१०)

एः
यद्यपि शरीरभेदेन भिन्नत्वं लभते तथाप्यात्माऽएकैव। सन्दर्भेऽस्मिन् भगवता परमकारुणिकेन वासुदेवेनोपमेयं प्रदत्ता। यथा भास्वतः मरीचिमालिनः मरीचिमाला समस्तं जगत् चकास्ते· तथा क्षेत्रज्ञोऽपरमात्मा समस्तानि क्षेत्राणि व चकासते। अतएव तत्र नानात्व व्यवहारः सर्वथाऽज्ञानमूलक एव। जीवस्तु परमेश्वरस्य सनातनांश एव। (१)

परमात्मा तावदंशी विद्यते। जीवात्मा तु तस्यैवांशोऽस्तीति। “ब्रह्मसूत्रम्” - २·३·४२·५३” एतावता भगवता सूत्रेणाऽज्ञापियत् जीवस्य तदंशरूपत्वात् तत्त्वमिति। अयमंशांशी भावः गीतानुसारि कथमुपपद्यते तन्नावगच्छामः यद्यपि। परवर्तिनो टीकाकारास्तु सदाद्वैत पक्षं स्वीकृत्य प्रतिबिम्ब वाद मवच्छेदवाद मासाद्यांशांशी भाव कल्पनोपपत्ति मचीकथन्। परन्त्वियं कल्पना भगवता वासुदेवेन सम्मताऽसम्मतेति विदुषां तत्त्वविदां हृदयमेव पर्याप्तं प्रमाणंसम्भाव्येत।

जगदिदं तेनैव विपरिवर्तते। सचराचरमपि सृज्यते। यथा बीजादेव वृक्षः। पुनस्तत्रैव लीयते। तथा परमात्मना जगदिदं समुत्पद्यते एवं तत्रैव विलीयते च। गीतायां प्रकृति शब्दः सदाऽव्यक्तत्व संज्ञां लभते। क्वचिदपि ब्रह्मेति संज्ञामाकलयति। परन्तु सांख्य सम्मता प्रकृतिः नैव वासुदेवेनाभिमता। न सा जगदुत्पत्ति मूलेति।

गीतानुसारं परमात्मनामध्यक्षत्वे निगामियं प्रकृतिः जगदिदं सृज्यते। अचेतन जड़ात्मक प्रकृतौ कुतः सामर्थ्यं समागच्छेत्* जगदुत्पादनस्य। स्वयमेव भगवान् वासुदेवः पक्षमिमं प्रमाणीकरोति। (२) अतः गीतावाक्येन स्पष्टमुपजायते खलु ~~प्रक~~ प्रकृतिरियं तावत् मातृस्थानीया। परमात्मा च पितृस्थानीयः।

“नासतो विद्यते भावो नाभावो विद्यते सतः”

अनेन भगवता वासुदेव वाक्येन विज्ञायते यत् जगदिदं न मायिकं न काल्पनिकं किन्तु सर्वथा सत्यं वास्तविकञ्चेति। अनया तात्त्विक विवेचनया गीतादर्शने तावदुपनिषदां प्रभावः स्पष्टं परिलक्ष्यते। पौरस्त्य धारायां यावन्ति दर्शनानि निसर्गत एव प्रादुर्भूतानि तेषां मूलमुपनिषद् वाक्यम्। तेन दर्शन मूलबीजस्योपनिषदि विद्यमानतया सर्वेषां पौरस्त्य दर्शनानां मूलं तावदुपनिषदः।

(१) "कठोपनिषद्" "नाचिकेता यमराज सम्बाद"

(२) "कठोपनिषद्" (१-३४)

वेदविरुद्धप्रमाणमाकलयता जैन बौद्ध चार्वाकादिनाऽपि स्वस्व दर्शनसिद्धान्तबीजानि तावदुपनिषदि प्राप्तानि। केचन दार्शनिकास्तु ब्रह्मात्मनोः सदा भिन्नत्वं स्वीकुर्वन्ति। तदपरे दार्शनिकास्तु तयोरभिन्नत्वमेवाङ्गीकुर्वन्ति। विशिष्टाद्वैतवादिनस्तु सदा विशिष्टत्वं मन्वते। अतएव सर्वे दार्शनिकाः स्वस्वसिद्धान्त ~~[illegible]~~ बीजानि तत एव जगृहुः। नास्तिकोऽपि तत्रैव स्वसिद्धान्तबीजं ~~प्राप्नु~~ प्राप्नोति।

उपनिषत् साहित्ये नितरां तार्किकपद्धत्याऽऽत्मानं विवेचितवान्। तां पद्धतिमनुसृत्यात्मनः सत्ता निरपेक्षा सापेक्षा वेति समस्यामिमां समाधातुं कठोपनिषदि प्राञ्जलभाषया महान्तं प्रयासं विहितवान्। सन्दर्भमनुसृत्य नाचिकेता यमराजं ~~[illegible]~~ पप्रच्छ। यमराजेन तावदभाणि यत् नैव कदापि नित्यात्मैत्यवस्यादिकृत दोषमासादयति।

विषयानाकलयद्भ्यः इन्द्रियेभ्यः संकल्पविकल्पात्मकेभ्यः मनोभ्यः विवेचनात्मकेभ्यः मतिभ्यः समस्तसत्ताकारणभूतेभ्यः प्राणेभ्यः भिन्नैव तावदात्मा। तावदिदमेव रहस्यं विद्यते मृत्योः। (१)

स्वयं साक्षात् त्रिकालज्ञः यमराजः मृत्युरहस्यसन्दर्भे तावदिदं वचनमचीकथत् खलु शरीरं रथं बुद्धिः सारथिः प्रग्रहं मनः, इन्द्रियाणि तावदश्वाः। अमूनि तावदिन्द्रियाणि विषयान् समाकृष्य मार्गे सञ्चरन्ति। एतेषां सर्वेषां मध्यस्थः तावदात्मैवास्तीति। अनेन यमराजवाक्येन स्पष्टं जायते यत् एन्या ~~[illegible]~~ ध्यक्षत्वं प्रतिपाद्यात्मनः तस्य सर्वश्रेष्ठत्वं प्रत्यपीपदत्।

(२) आत्मानं रथिनं विद्धि शरीरं रथमेव तु;
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥

अतएवेदं ब्रह्मतत्त्वं भागवताऽपि वासुदेवेन प्रत्यपादितम्। तदप्यक्षरतत्त्वं सदोपनिषदि प्राप्यते। क्षराक्षरभेदेन द्वे तत्त्वे भगवताऽपि प्रतिपादिते। तावदिदमक्षरतत्त्वं निर्दिष्टं भगवता पाञ्चरात्रिकेन वासुदेवेन। तस्यापि मूलं ~~[illegible]~~ तावदुपनिषदि प्रतीयते।

बृहदारण्यकोपनिषत्साहित्ये गार्गीं नितरामुपदि-

(१) "उपनिषद्"

"केनोपनिषद्" (२)

"मुण्डकोपनिषद्" (१-१-६)

शार दार्शनिकशिरोमणिः याज्ञवल्क्यः प्रोवाच यत् हे गार्गि! अस्मिन्नेवाक्षरतत्त्वे नियमबद्धतया ब्रह्माण्डोऽयं प्रचलति। इदमेवाक्षरतत्त्वं ब्रह्म विदाऽधिष्ठानतत्त्वमुच्यते। अदः नैव स्थूलं नैव ह्रस्वं नैव लघु नैव दीर्घं नैवाणुः। नेदं चक्षुः तत् गृहीतुं शक्नोति। नैव श्रोत्रेण गृहीतुं शक्यं तत्। पक्षमिमं प्रमाणीकरोति श्रावती श्रुतिः यत्

(१) स एष नेति नेति आत्मा। नह्येतस्मात् अन्यत् परमस्ति।

तथाच—

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते।
(२) तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

यत्तत्त्वं वाणी नैवाचक्षते। परं यया शक्त्या वाणी वक्तृत्वमासादयति। स एव देशकालोपाधिप्रभृतिभिः नितान्तमतिक्रान्तः। अतएव प्रमाणातीतः नितान्तमप्रमेयश्च। नहि शब्दस्य शैली तद्विषयत्वमाप्नुतः। तथाच—

यथोर्णनाभिः सृजते गृह्णते च,
यथा पृथिव्यामोषधयः संभवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम् ॥३॥

इदमेवाक्षरतत्त्वं भगवता वासुदेवेन निर्दिष्टम्। एवमपि मतञ्च। गीतायाः व्यवहारपक्षोऽपि नितान्तादर्शरूप एव। यथा गीतायाः तावदाध्यात्मपक्षः युक्तियुक्तः तथा समन्वयात्मकोऽपि। तद्वत् व्यवहारपक्षोऽपि नितान्तमादरणीयः मनोरमश्च। गीतां पर्यालोच्य विज्ञायते खलु गीतायाः प्रधानोद्देश्यं व्यावहारिकः। स एव सामाजिकानां कृते श्रेयान्।

परन्तु केचन विद्वांसस्तु प्रवृत्तिमार्गं समुपपादयन्ति। तदपरे नैव क्षमन्ते। तेषां निवृत्तिरेवोद्देश्यं प्रतिभाति। वस्तुतस्तु व्यवहारसिद्धान्तयोः समन्वयं श्रेयः। व्यवहारसिद्धान्तौ सदाऽऽध्यात्मिकधरातले समवतार्य प्रयोगे तदनुकूल ~~भा~~ माचरितुं सदा सर्वैः प्रयतितव्यम्। - इदमेव चास्य प्रयोजनम्। गीतायाः व्यवहारपक्षोऽपि तावदुपनिषदि नितान्तमवलम्बितोऽस्ति। गीतायाः व्यवहारपक्षस्याऽऽधारः तावदुपनिषद् एव।

तथा दार्शनिक तत्त्वानि व्यवहारपक्षे समानीय मानवजीवनसमाकर्षणं भारतीयविचारशास्त्रस्य वैशिष्ट्यं द्योतयति। उपनिषदामाचारमीमांसा पक्षः नितान्तं मनोरमः श्लाघ्यश्च। आत्मानं

(१) "यान्यस्माकं सुचरितानि तानि त्वयो पास्यानि नो इतराणि"
"उपनिषद्"

"उपनिषद्"(२)

"दी फिलासफी आवदी उपनिषद् पाल डायसन"
"पृ०-१३-१४"

नियमांस्तु दयादमतयोऽवश्यकत्वं स्वीकुर्वते उपनिषदा। तपः दानसत्यवचनानि नितरामाध्यात्मिकसमुन्नतौ साधनतया नितान्तमवादीत्। (१) इत्युपदिश्य गार्हस्थ्यमूलभूतबीजानि शिक्षयति गुरुः शिष्यान्। तेन भण्यते यत् वासनानद्यः द्वे धारे विद्येते। एका खलु शुभमार्गस्य धारा, तदपराऽशुभमार्गस्य धारा।

एवं स्वमहता प्रयासेन नितान्तमशुभकर्मणि व्यापृतवासना तावच्छुभकर्माणि चोद्या। कर्मनिष्पादनेऽस्मिन् स्वातन्त्र्योपपादनं समस्तोपनिषदः समस्तशिक्षायाः सार एव। तद्यथा—

शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित्,
पौरुषेण प्रयत्नेन योजनीया शुभे पथि।
अशुभेषु समाविष्टं शुभेष्वेवावतारयेत्। (२)

परं लौकिकभाषायां नान्येन वचसाऽऽत्मतत्त्वं विज्ञापयितुं कोऽपि शक्नुयात्। तत्त्वमिदं प्रतिपत्तुं सर्वे उपायाः व्यर्थतामासादयन्ति। आत्मवेत्ता पुरुषः तत्त्वमिदं प्रतिपत्तुं क्षमते। सम्प्राप्तायां तत्त्वावस्थायां सर्वे मूकायन्ते। केवलं "शिवोऽहं शिवोऽहम्" इत्येव ध्वनिः प्रत्यवतिष्ठते। अतएवात्मा तावदानन्दरूपतामासादयति। स्थितिरियं तावत् स्वानुभूत्या विज्ञातव्या भवति। स्वानुभूतिस्तत्त्वं ज्ञापयति। इयमेवापरोक्षानुभूतिः वैदिकतत्त्वविदां रहस्यवादः।

अयमेव रहस्यवादः श्रौतदर्शनस्य मौलिकसिद्धान्तः। उपनिषदां तत्त्वज्ञानमत्रैव पर्यवस्यति। ज्ञानकर्मणां समुच्चयः वैदिकदर्शनस्य मूलं विद्यते।

उपनिषदां तत्त्वज्ञानं समस्तदार्शनिकानां श्लाघ्यप्रयासः। स एव साध्यमार्गश्च। नान्यः पन्थाः विद्यते वेदात् भिन्नः।

(तद्व्याख्या) कालनिरूपणञ्च।

उपनिषद्शब्दस्य व्याख्यानसन्दर्भे विभिन्नानि मतानि विद्यन्ते। तत्र पाश्चात्यविचारकाणां ओल्डेनवर्गमहाशयानां विचारानुसारं ~~ता~~ तावदुपनिषदामर्थस्तु उपासनैव। अतएवात्मोपासना ब्रह्मोपासना वा।

किन्तु पालडायसन् विचारानुसारं नोपास्या खलु आत्मोपासना किन्तु जिज्ञास्यः। (३) श्रीमच्छङ्कराचार्यानुसारं तावदुपनिषदां ब्रह्मविद्यैवार्थः। ब्रह्मविद्यैव संसारं छेत्तुं प्रभवति। येषां ग्रन्थानां प्रयोजनं ~~ब्र~~ ब्रह्मविद्यैव तदेवोपनिषद्पदवाच्यत्वमाकलयति। अतएव तदनुसारं ब्रह्मविद्यैवोपनिषदश

(१) ''बृहदारण्यकोपनिषद्'' भाष्यम् । ((शंकराचार्य))
वेदान्तोनाम उपनिषत् प्रमाणं तदुपकारीणि शारीरिकसूत्रादीनि ॥

(२) ''भाष्यवार्तिक'' ((सुरेश्वराचार्य))
((मण्डनमिश्र))

अन्यच्च ये इमां ब्रह्मविद्यामुपयान्त्यात्मभावेन श्रद्धाभक्तिपुरः सराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थं विनाशयति परं वा ब्रह्म गमयति, अविद्यासंस्काराणि चात्यन्तमवसादयति विनाशयति, इत्युपनिषद्, उपनिपूर्वस्य सदेरेव मर्थ संस्मरणात् ।

(३) ~~दी फिलासफी~~ ((दी फिलासफी आव दी उपनिषद् पाल डायसन))
(१६-१७)

शब्दार्थः। लक्ष्यार्थस्तु ब्रह्मविद्या विषयक ग्रन्थः।

उपनि~~स~~सद् धातोः क्विप् प्रत्यये विहिते नितामुपनिषद् शब्दः निष्पद्यते। नाशः गमन ~~शैथिल्य~~ शैथिल्यञ्चार्थः सद् धातोः। या विद्या परमात्मनः सामीप्यं प्रापयति, संसारबीजं नश्यति, कर्माणि शिथिलयति। तदेवोपनिषत् साहित्यम्। परन्तु नायं पक्षः रोचते श्रीमच्छङ्कराचार्याय। पूर्वोक्त लक्षणान्योपनिषदि ग्रन्थे नितामघटितत्वेनाभिधा वृत्त्योपनिषदामर्थः ब्रह्मविद्यैव। कथंतु ब्रह्मविद्यायां संघटन्ते ४ त्रयोऽर्थाः। यस्मिन् ग्रन्थे लक्षणा वृत्त्या ब्रह्मविद्यायाः वर्णनं प्राप्नुमः। स एवोपनिषदामर्थमादत्ते। (१)

सुरेश्वराचार्योऽपि नितामनयैव पद्धत्या तस्य व्याख्यानं चकार। एतेषां विचारानुसारं उपनिषदामर्थः ब्रह्मविद्यैव तावल्लक्षणा वृत्त्या। (२)

किन्तु पाल डायसन विचारानुसारं शंकरस्य व्याख्या नैव युक्तिसम्मता। भाषा विज्ञानमधिकृत्य नैव पूर्वोक्ता व्याख्या प्रामाण्यं भजते। एतेषां विचारानुसारं ब्रह्मजिज्ञासां तावद्वालक जिज्ञासां वा लक्ष्यीकृत्य गुरु सामीप्यं प्राप्य गोपनीय विद्यामादत्ते स्मै शिष्यः स एवोपनिषदामर्थः।

अतएवोपनिषद् शब्दार्थस्तु त्रिषु विभक्तः। तद्यथा ~~रहस्यमय~~ रहस्यमय शब्दः, रहस्यमय ग्रन्थः, रहस्यमयार्थश्च। वृहदारण्यकोपनिषदि रहस्यमय शब्दं प्रयुङ्क्ते। तैत्तीयोपनिषदि रहस्यमय ग्रन्थं प्रयुङ्क्ते। छान्दोग्याय रहस्यमयार्थं ~~प्रयु~~ प्रयुङ्क्ते। (३)

परन्त्वियं व्याख्या नैव साधीयसी। उपनिषच्छब्दस्य व्याख्यान परकत्वात्। ओमित्येतदक्षरं इदं सर्वं तस्योपव्याख्यानम्॥ "भूतं भवद्भविष्यत्" ॥ अनयोपनिषदि व्याख्यास्यामः॥ एतेन पूर्वोक्त व्याख्यानस्य नैव युक्तियुक्तत्वं प्रतिभाति।

वस्तुतस्तु ऋग्वेदस्य नासदीय सूक्तौ यद्दार्शनिक तत्त्वं प्राप्यते तस्यैव व्याख्यानमुपनिषत् साहित्यमिति। अतः ऋषीणां दिव्य प्रतिभाज्ञानेन यत् तत्त्व मनुभूयते तस्यैव व्याख्योपनिषत् साहित्यम्। तेन शङ्कर कृत व्याख्या नितां श्रेयसी एवसैतिहासिकी च। सैव व्याख्या विदुषा समादृता। एवं तर्क सम्मता।

(१) "गीतारहस्य" "बाल गंगाधर तिलक"
"दशम संस्करण" १९५५ - पृ० सं०(५२६६)

(२) ऋग् वेद "नासदीय सूक्त" अन्यच्च-
सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राण एव,
प्राण ऋच् इत्येवं विद्यात्।(२-२-१०) "ऐतरेय"

"श्रीमद्भागवत" "दशमस्कन्ध" "रासलीला"

यच्चुपनिषदां समय निर्द्धारणमतिव कष्टसाध्यं कार्यम्। कस्यचिदुपनिषदां समय निर्द्धारण सन्दर्भे नहि केनापि किमपि लिखितम्। अस्यां स्थितौ अन्यकृतैरुल्लेखैः एवमनुमानेन च प्राचीनतमानामुपनिषदां समयः व्यवस्थापनीयो भवति। अस्मादेव हेतोः प्राच्योपनिषदां समय सन्दर्भे मतभेदा वर्तन्ते।

"भायाख्यम् शविष्ठार्यमै आग्नेयं क्रमेण" इत्युपनिषद् वाक्यमूहापोहेन वितर्क्य लोकमान्य बाल गंगाधर तिलकस्तु मघानक्षत्रादारभ्य धनिष्ठा नक्षत्रस्य भागार्द्धं यावत् क्रमशः दक्षिणायनं प्राप्नुते, अत एवोदगयन स्थितिं सुसमीक्ष्य तस्मिन्नेव समये तं प्रणैषीदिति निरवोचत्। तेनोदगयनस्य स्थितिं तादृशीं विगणय्य लोकमान्यः ईसातः प्राक् चतुर्दश शतकादारभ्य द्वादश शतक पर्यन्तं तदुद्भवत्वं मन्यते।(१)

वास्तविकमेवोपनिषदां मूलं वैदिकसाहित्यमेव। वेदादेव समस्तानि दर्शनानि समुत्पन्नानि। अस्य बलवत्तरं प्रमाणं ऋग्वेदस्य नासदीय सूक्तमेव पर्याप्तम्। ऋक् यजुः सामाथर्व वेद मन्त्रान् समीक्ष्य तेनैव तत्त्वदोपनिषत् साहित्यानि प्रणिनाय। ऋग्वेदस्य शाकल शाखामधिकृत्य वोपनिषदं निर्ममौ। कृष्ण यजुर्वेदस्य तैत्तीयः शाखामवलम्ब्य ~~श्वेता~~ श्वेताश्वतर कठोपनिषद् प्रभृतीर् प्रणैषीत्। शुक्ल यजुर्वेदस्य काण्व माध्यन्दिन शाखामधिकृत्य बृहदारण्यकोपनिषदं व्याचत्। अथर्ववेदस्य पिप्लाद शौनक शाखामधिकृत्य मुण्डक माण्डूक्य प्रश्न प्रभृतीन् प्रणिनाय।

अनेन स्पष्टं जायते खलु सर्वेषां मूलत्वं वेदे सन्निहितम्। तच्चाच नासदीय सूक्तम्।(२) तद्यथा —

इयं विसृष्टि यत आवभूव यदिवादधे यदिवान।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदिवान वेद॥

अन्यच्च —

तिरश्चीनो विततो रश्मिरेषामधः स्विदासीदुपरि स्विदासी—
उतारेतो धा आसन् महिमान आसन्त स्वधा अवस्तात् प्रयतिः परस्तात्"

एतावता वेदवाक्येन समस्त संसारस्य भौतिकानि क्षात्मकानि आत्मतत्त्वेन व्याप्तानि जायन्त इति विज्ञायते। तत्त्वविदा ज्ञानिना रहस्यमिदं विज्ञायते। यत् तत्त्वं भगवता द्वैपायनेन षोडशकलासम्पन्नस्य भगवतः वासुदेवस्य रासलीला प्रसङ्गे प्रत्यपादि यत् — (३)

जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्रहि
दयित दृश्यतां दिक्षु तावका स्त्वयि धृतासवस्त्वां विचि
(न्वते॥ श्री०·१० स्क०,

"गीता" "श्रीकृष्ण:" (१)

(२) "कविराज विश्वनाथ:" "साहित्य दर्पण"

(३) (१८८९) "हिस्ट्री आव् एसियेन्ट संस्कृत लिट्रेचर"
"मैक्समूलर"

भगवान् वासुदेवस्तु अक्षरतत्त्वेऽपि तदेव परात्परतत्त्वं विद्यते येन परात्परस्य तत्त्वेनाप्यक्षराण्यपि क्षराणि च समाहितानि ~~विद्यते~~ विद्यन्ते। श्रीकृष्ण तत्त्वं तदेव। तस्यैवाक्षरतत्त्वांशः आत्मा। प्रतिकोणं प्रतिकणं प्रतिवस्तु विद्यमानं त्वां विचिन्वते। व्यापकत्वात्। आनन्दस्वरूपाच्च। अतएव भगवती श्रुतिः -"रसो वै सः"। तस्मात् परात्परस्य भगवतः वासुदेवस्य रसात्मकस्य प्रतिभूतं प्रतिचेतनं प्रतिक्षणं प्रतिजडं विद्यमानत्वात्। अतएव भगवद् वाक्यम् -

"धर्माविरुद्धो लोकेऽस्मिन् कामोऽस्मि भरतर्षभ" (७)

काव्य तत्त्वविदामपि विलक्षणलोकोत्तराह्लादः काव्येनाऽऽस्वाद्यः रसरूपतया परात्परैवानुभूयते। विभावानुभाव सञ्चारीभावेभ्यः रसनिष्पत्तिरित्यनुमता परात्परैव। तथाच -

~~विभावानुभाव सञ्चारी~~ विभावानुभाव व्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते। (८) अस्मादेव हेतोः विभावानुभावादिषु निष्पद्यमानस्य परात्परतया तस्य व्यापकत्वं सुस्पष्टमेवेति काव्य तत्त्वविदो भाषन्ते।

धर्मार्थ काम मोक्षाणां चतुर्णां पुरुषार्थतत्त्वानां वेदेन प्रतिपादनात्। तेन संसारस्य समेषां विदुषां समाकर्षणकेन्द्रबिन्दुः वेदः पौरस्त्यपाश्चात्यैश्चावगन्तव्यः।

जर्मन देशीयेन मैक्स मूलर महोदयेनहि संहिताब्राह्मणारण्यकोपनिषद् प्रभृति ग्रन्थरत्नानि समीक्षितुं स्वात्मानमुत्ससर्ज। तेषां धार्मिक दार्शनिक साहित्यिक दृष्ट्या महत्त्वं चेतसा स्वीचकार। वेदस्य सर्वदृष्ट्या प्राचीनत्वं सर्वैः स्वीकृतमेव। विभिन्न विचारदृष्ट्या वेदं पर्यालोच्य तद्रहस्यान्याविष्कर्तुं प्रायतत। (१८८९) एकूठराब्दतमे वर्षे स्वप्रकाशित ग्रन्थे वेदस्य विस्तृत विवेचनां सम्पाद्य तस्य दार्शनिक दृष्ट्या एवं साहित्यिक सामाजिक दृष्ट्याच सर्वाङ्गपूर्ण समालोचनामचीकरत्। (९)

परन्तु महदाश्चर्यं प्रतिभाति यद् वेदोपनिषदं सर्वाङ्गपूर्णाध्ययनेनापि तन्महत्त्वपूर्णप्रभावेण प्रभावितोऽपि तद्वैशिष्ट्यमाकलयन्नपि संसारस्य सर्वेषामपेक्षया तस्य प्राचीनत्वं कक्षीकुर्वन् ईसातः प्राक् द्वादश शतकावधित्वं स्वीचक्रे। तावदियं विचारसरणिः मैक्समूलर महोदयानां कियतां पाश्चात्य विदुषां वेदसम्बन्ध विचारमजीजनत्।

तिलक याकोबी महोदयौ ज्योतिषगणितपरिपाटीमाकलय्य एवं तस्यैव साक्ष्यं हृदयेन ~~मह~~ मत्वा स्वस्वतन्त्रगवेषणां सम्पा

(१) "वैदिक साहित्य विमर्श" वेदकाल "निरूपण"
"डा० कृष्ण कुमार"

(२) "निरुक्त" "यास्क" "७-६-४"

पञ्चचत्वारिंशत् शततमवर्षादारभ्य षट्सहस्रावधिकः कालः वेदोद्भवस्येति विचारमपप्रत्यगाम्। किन्तु तदितरे पाश्चात्याः वेवर ओल्डेनवर्ग कीथ महोदयाः तिलकया कोवी विचारपक्षं नितान्तं समालोचयामासुः।(१)

डा० आर०जी० भण्डारकर प्रभृतयो विद्वांसस्तु इतिहासमधिकृत्य वेदस्य समयं निश्चेतुं महान्तं प्रयासम~~कुर्वत्~~ कार्षुः। ईशावास्योपनिषदि यजुर्वेदस्य चत्वारिंशत्तमेऽध्याये असुर्या शब्दः समागच्छति। भण्डारकर विचारानुसारं शब्दोऽयं (असीरिया शब्दस्य) समानार्थकोऽस्ति। (मेसोपोटामिया) वास्तव्यः नितामसुरतया +वेदे निर्दिष्टः। अयं तावत् (२५००) ईसातः प्राक् भारतं समाययौ। अतः यजुर्वेदं प्रायशः ईसातः प्राक् पञ्चविंशतिशततमे वर्षे प्रणैषीत्। ऋक्संहिता इतोऽपि प्राचीनतमा विद्यते। तेन प्रस्तुतविषयमधिकृत्य ऋग्वेदस्य रचनाकालः षट्सहस्रावधिकः विद्यते ईसातः प्राक्।

शता

जर्मन प्रदेशस्थित बोन नगर निवासी जैकोबी महोदयस्तु ज्योतिषशास्त्रमधिकृत्य ईसातः प्राक् पञ्चचत्वारिंशत्~~सहस्रा~~वधिकः ऋग्वेदस्य रचनाकालः विद्यत इति प्रतिपादितवान्। तेषां तात्पर्यमिदमस्ति यत् कल्पसूत्रस्य विवाहप्रकरणे "ध्रुव इव स्थिरो भव" इतिवाक्यं समागतमस्ति। अनेन ध्रुवतारायाः प्रकाशकत्वं स्थिरत्वञ्च सिद्ध्यति। इयं परिस्थितिः ईसातः प्राक् सप्तविंशति शतावधिका वीक्षतीति। ब्राह्मणग्रन्थेषु कृतिका नक्षत्रे वसन्तसम्पातोल्लेखोऽस्ति। तं विगणय्य कल्पसूत्रस्य समयः ईसातः प्राक् सप्तविंशतिशततमः। अतः ऋग्वेदस्य रचनासमयः पञ्चचत्वारिंशत् शततमः तेन स्वीकृतः।

प्रोफेसर लौटूसिंह महोदयस्तु ऐतिहासिकप्रमाणमाकलय्य ऋग्वेदे ऐतिहासिकतत्त्वानुसन्धान मूलसिद्धान्तबीजस्य सन्निहिततया ऋग्वेदस्य रचनाकालः लक्षावधिकादपि परएव।

अनेके विचारकास्तु चतुर्षु वेदेषु ऋग्वेदस्य रचनाकालः सर्वप्रथमोऽस्तीति विचारं प्रत्यपीपदन्। भारतीय विचारकास्तु वेदे नित्यत्वमपौरुषेयत्वञ्च मन्यन्ते। नात्र वेदानां रचनाकालस्यावसरः समागच्छति। तस्मात् वेदानां कालनिर्धारणमुपेक्ष्य तत्प्रतिपाद्यविषयान् ध्यानावस्थितचेतसाऽस्थासीत्। सत्यमिदमाभाति। वेदानामपौरुषेयत्वात्। अतएव मन्त्रद्रष्टारो ऋषयः नतु कर्तारः। तथाचोक्तम्-

साक्षात्कृतधर्माणो ऋषयो बभूवुः। ते अवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः।(२)

विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिर्धर्मार्थकाममोक्षपुरुषार्था इ-

॥वैदिक विज्ञान॥ म० म० गिरिधरशर्मा चतुर्वेदी॥ (व)

ति वेदाः। अथवा विदन्ति जानन्ति विद्यन्ते भवन्ति विदन्ति सर्वाः विद्याः यै यैषु वा स वेदः॥

विद् ज्ञाने धातोः घञ् प्रत्यये वेदेति शब्दः निष्पद्यते। भावः, कर्म, करणे घञ् प्रत्ययार्थाः तेन ज्ञानं ज्ञानविषयः ज्ञेयपदार्थोऽपि वेदपद्वाच्यत्वमपि धत्ते। पाणिनिनापि स्व धातुपाठे सत्ता लाभः विचारश्च विद् धातोरर्थः। उल्लिखितेष्वर्थेषु निर्दिष्टप्रत्ययत्रयार्थस्य योगेन वेदशब्दार्थः महत्त्वातिशयं धत्ते। सत्ताज्ञानमानन्दोऽपि वेदार्थः। अतः वेदब्रह्मणोः समानार्थकत्वं समुपपन्नमेव। अनेन लौकिकालौकिकज्ञानस्य साधनशब्द एव वेदनाम्ना प्रसिद्धिमावहति।(९)

"ज्ञानप्रक्रिया"

अथ विचार्यते का नाम प्रक्रिया प्रत्यक्षज्ञानस्य ? तत्र विभिन्नानि लक्षणानि प्रत्यक्षस्य विभिन्न दर्शन शास्त्रे विभिन्न दार्शनिकाः चक्रुः। इन्द्रियज्ञेयार्थयोः परस्परं सम्बन्धेन यज्ज्ञानं सम्पद्यते तदेव प्रत्यक्षम्। रसगन्धस्पर्शादि विभिन्नेन्द्रियाणि सम्प्राप्य तदनन्तरमेव ज्ञानं बोभवीति। अमुना क्रमेणैव सुदूरपुष्पाणां वाय्वानीत गन्धस्य प्रत्यक्षं घ्राणेन्द्रियेण जायते। एवं शब्दज्ञानप्रक्रियापि तादृशी विद्यते। यत्कालावच्छेदेन यच्छब्दः एकस्मिन् स्थाने प्रादुर्भूय तस्य धारा कर्णविवरे समागच्छति तदा तज्ज्ञानं समुत्पद्यते। अस्मादेव हेतोः दूरस्थ शब्दः स्वोत्पत्त्यनन्तरं श्रोत्रपर्यन्तं प्रयाति। अनेन प्रकारेण दूरस्थ शब्दोऽपि धाराप्रवाहमर्यादया नवान् शब्दान् समुत्पादयन् कर्णपर्यन्तं समागत्य तदनन्तरमेव ज्ञानं जायते। परन्तु रूपप्रत्यक्षज्ञानप्रक्रिया सर्वथा विलक्षणैव प्रतिभाति। कथं नु दूरस्थ शब्दं श्रोत्रेण प्रत्यक्षं करोति। किन्तु दूरस्थमपि तद्रूपं चक्षुः सम्बन्धमन्तरा कथं प्रत्यक्षमाकलयेत् चक्षुः।

अत्र कियन्ति दर्शनानि तद्विपरीतमेवाचक्षन्ति यत् चक्षुः विषयवस्तूनां सामीप्यमाकलय्य तज्ज्ञानमाकलयति। यथा सूर्यादि प्रकाश किरणानि दूरं गच्छन्ति तथा चक्षुरपि विषयपर्यन्तं गच्छति। प्रस्तुत ज्ञान परिपाटीं सूक्ष्मानुसन्धान पद्धत्या विविच्य मानेन सिद्धान्तेन तत्त्वविदां विदुषां चेतः प्रसीदति। ज्ञानस्य नितान्तमान्तरिकत्वेन तदपि च शरीराभ्यन्तरमेव जायते। नहि बाह्यप्रदेशे वस्तुतत्त्वे ज्ञानं जायते।

आत्मनः व्यापकत्वं प्रतिपादयतां दार्शनिकानां विचारास्त्वित्थं वरीवर्ति खलु, यदात्मा सर्वत्र विद्यते तदा शरीरात् दूरतरे बाह्यप्रदेशे सञ्जाते ज्ञाने काऽऽपत्ति स्यादिति सत्यम्। ज्ञानस्यात्मगुणत्वात्। कस्मिन्नपि प्रदेशे ज्ञानात्मकगुणस्य वर्तमानत्वात्।

"वैदिक विज्ञान" "गिरिधरशर्मा चतुर्वैदी" (७)

तदन्ये तु विचारकास्तु नैव पूर्वोक्तपक्षं क्षमन्ते। तेषां विचारानुसारं भवतु व्यापकत्वमात्मनः किन्तु तस्यात्मनः भोगशरीरमेव। अत्र केषां दार्शनिकानां विचारभेदः। तदात्रात्मनां विशेषगुणाः सुखदुःखेच्छाज्ञानादीन्यपि शरीराभ्यन्तर एव निष्पद्यन्ते। यद्यत्र प्रतिपाद्यते शरीरादतिरिक्तेऽपि ज्ञानं निष्पद्यते तदा कानाम खल्वावश्यकता शरीरस्य। एवं ज्ञानाय मनसा सहयोगोऽपि नितान्तमपेक्षित एव। नहि ज्ञानं प्रत्यक्षीकर्तुं मनसो विरहे कारणम्। तेन ज्ञानोत्पादने मनसा सहयोगः नितान्तमपेक्ष्यः। मनःसंयोगमन्तरा इन्द्रियाण्यपि ज्ञानं कर्तुं क्षमन्ते। विषयान्तरे तल्लीनं चेतः संगीतं पुरतः विद्यमानमपि नैव श्रोतुं क्षमते। अतएव ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्य कारणत्वं स्वीकृतम्। तेन पुरीतति विद्यमानं मनः स्वप्नावस्थायां सत्यपि नैव जनयति ज्ञानम्।

ण वेदान्तसांख्यदर्शनानि अत्रेदं समादधति यत् ज्ञानमन्तःकरणस्यैव गुणोऽस्ति। न त्वात्मनः। कथं तस्य निर्विकारत्वात्। अतएव साक्षिमात्रत्वं स्वीकुर्वते। तथापि मनसः हृदि विद्यमानतया कथं बाह्यप्रदेशे ज्ञानं सम्पद्येत। अनेके दार्शनिकास्तु व्याचक्षते यत् अन्तःकरणान्यपि चक्षुषा सह बाह्यप्रदेशं गत्वा तत्रास्थितानि वस्तूनि विदन्ति। परन्त्वियं कल्पना नितान्तमुपहासास्पदा। मनस्तावच्छरीरं निर्गत्य क्षणपर्यन्तमपि गच्छेत्तदा निमेषमात्रमपि शरीरं ~~धारयितुं क~~ स्थातुं शक्नुयादिति। तदनन्तरमेव शरीरं प्रपतेत्।(१)

अनेके विद्वांसस्तु पक्षमिमं स्वीकुर्वते खलु चक्षुः बाह्यप्रदेशं प्राप्य वा गत्वा रूपादीनि समाकृष्य मनसि समायोजयति। परन्तु द्रष्टुं क्षमते चक्षुः नैव कमपि पदार्थं गृहीतुं शक्नोति। अतएवेयं कल्पनापि नितरां हास्यास्पदा। एकं चक्षुः किञ्चिन्निमील्य रूपद्वयं द्रष्टुं क्षमते कथं चक्षुः। अनया विवेचनया समेषां दार्शनिकानां ज्ञानप्रक्रिया नैव युक्तियुक्ता प्रतिभाति।

अत्रेदं वैदिकविज्ञानं समाधत्ते।

संसारस्य प्रतिवस्तु प्राणशक्त्या परिव्याप्तम्। विना प्राणशक्तिं किमपि नैव स्थातुं शक्नुयात्। बलं वियाणञ्च प्राणस्यैवाऽपरा शक्तिः। बलवियाणे प्राणशक्तिमधिकृत्य सन्तिष्ठेते। प्रतिपार्थिवपदार्थमात्रेय प्राणशक्त्या परिव्याप्तम्। अग्निरेव पृथिव्याः प्राणोऽस्ति। वैदिकसिद्धान्तमाकलय्याग्निः द्वौ प्रकारौ भवतः। एकं चित्यं तदपरः चितेनिधेयः। अग्निप्राणाचयनेन समस्तानि वस्तूनि निर्मान्ति। प्राण एव समस्तभूतं निर्माति। अनेनैव क्रमेण वस्तुस्वरूपसंगठनतल्लीनोऽयं प्राणः वैदिकपरिभाषायां-

(৭) "শতপথ ব্রাহ্মণ" কাণ্ড-১০, অধ্যায়-৫-
ব্রাহ্মণ - ২।

"শতপথ ব্রাহ্মণ"

चित्यं भाषते। भौतिकवस्तूनां स्वरूपं निर्माय पुनस्तत्र प्राण शक्तिः सञ्जायते। तदनन्तरमेव तत्रस्थितानि वस्तूनि नितरामकाच्छन्ति।

संसारे चत्वारः पदार्थाः विद्यन्ते स्वज्योति परज्योति रूपज्योत्यज्योतीनां भेदात्। स्वप्रकाशमङ्गीकुर्वन्तः सूर्यविद्युदग्नयः स्वज्योतिषा व्यवह्रियन्ते। परप्रकाशमङ्गीकुर्वन्तः परज्योतिषा चन्द्र जलादयोऽपि-व्यवहृताः। पार्थिव पदार्थादयः रूपज्योतिषा व्यवहृताः। वायवोऽप्यज्योतिषा व्यवहृताः। स्वपरज्योतिषोः प्रकाशः सुदूरपर्यन्तं निर्गच्छति। अनेनैव तुल्यन्यायेन पार्थिव पदार्थस्य प्राणः सर्वान् विद्योतते। अत एव सर्वत्र विद्यमानस्य प्रकाशस्य परिणाम एव समेषां प्रकाशनम्।

तस्माद्विभिन्नानां वस्तूनां चितिनिधेय प्राणः स्व तीव्रगत्या तत्तद् वस्तूनां स्वरूपं परिगृह्य चक्षुः पर्यन्तं समागच्छति। अतएवेदं कारणं ~~प्रभा~~ प्रतिभाति यच्चक्षोः दूरेऽपि वस्तु चक्षुः प्रत्यक्षीकरोति। अतएवास्य प्राणस्य व्यापकत्वं सिद्ध्यति। अयमेव प्राणः तावदात्मेति संज्ञां लभते नितान्तं दर्शन शास्त्रे।

स्वाधारं विना नैव कदापि स्थातुं शक्नोति प्राणशक्तिः। अतएव वाक्तत्त्वमप्यपेक्षते। इमे प्राणवाक् तत्त्वे अव्ययपुरुषान्तर्गततया वेविद्यते। तस्यैवाव्ययपुरुषस्य भेदोऽस्त्यात्मा। इयं सूक्ष्मा वाक् प्राणमण्डलतया वर्तते। अस्मादेव हेतोः प्राणापानोदान व्यानानां चातुर्विध्यम्। तेन ऋक् यजुः सामाख्यानां तदाकारप्रसारतया विद्यमानेऽपि तत्रास्थितानि भूत भौतिकानि चराचराणि समस्तान्यग्नि तत्त्वाख्येन यजुषाव्य वृतान्येव विद्यन्ते।

तथाच पक्षमिमं प्रमाणीकरोति। तद्यथा—

यदेतन्मण्डलं तपति, तन्महदुक्थम्, ताः ऋच~~श्च~~स ऋचां लोकः। अथ यदेतदर्चिर्दीप्यते, तन्महाव्रतम्, तानि सामानि स साम्नां लोकः। अथ य एष एतस्मिन् मण्डले पुरुषः सोऽग्निः तानि यजूंषि स यजुषां लोकः।।१।।सैषा त्रय्येव विद्या तपति। तद्धे तदप्य विद्वांस आहुः—त्रयी वा एषा विद्या तपति। वागेव तत्पश्यन्ती वदति।(२)

य एष एव मृत्युः य एष एतस्मिन् मण्डले पुरुषो अथ तदेतदमृतम्। यदेतदर्चिर्दीप्यते, तस्मान् मृत्युर्न म्रियते। अमृते ह्यन्तः। तस्मादु न दृश्यते अमृते ह्यन्तः।।३।। (१)

प्रतिष्ठितं

अन्यच्च =

तदेष श्लोको भवति अन्तरं मृत्योरमृतम्। अवरं ह्येतन्मृत्योरमृतम्। मृत्यावमृतमाहितमिति। एतस्मिन् पुरुषे एतन्मण्डलं तपति। मृत्युर्विवस्वन्तं वस्ते इत्यसौ वा आदित्यो विवस्वान्, एष ह्येहो

"ऋग्वेद" (१)

"तैत्तीय ब्राह्मण" (२-१२) (२)

(३) "शत० प०" ब्राह्मण" काण्ड-१४- "बृहदारण्यकोपनिषद्"

"स्मृतिः" (४)

(५) "ऋग्वेद" अ०-१०, ९०, ९"

रात्रौ विवस्ते । तमेष वस्ते । सर्वतो ह्यनेन परीवृतो मृत्योरात्मा विवस्वति इति एतस्मिन् हि मण्डले एतस्य पुरुषस्याऽऽत्मा एतद्वैष श्लोको भवति ।।४।। तयो र्वा एतयोः । उभयोः, तस्यार्चिषः एतस्य पुरुषस्य एतन्मण्डलं प्रतिष्ठा ।

एवं ऋग्वेदेऽपि

अन्तरं मृत्योरमृतं मृत्यावमृतमाहितम् ।(१)
मृत्युर्विवस्वन्तं वस्ते मृत्योरात्मा विवस्वति ॥

अनेन वैदिकवाक्येन स्पष्टं जायते यदयमात्मा एतत् प्रकाशमण्डलस्य केन्द्रभूते विवस्वति प्राणे नितरां प्रतिष्ठितोऽस्ति । अतएव तैत्तीय ब्राह्मणेऽपि—

ऋग्भ्यो जातां सर्वशो मूर्तिमाहुः ॥
सर्वा गति यजुषी हैव शाश्वत् ॥
सर्वं तेजः सामरूपं ह शाश्वत् ।
सर्वं हीदं ब्रह्मणा हैव सृष्टम् ॥(२)

यथा प्रदीप्तात् पावकाद् विस्फुलिङ्गा व्युच्चान्ति एवं वा अरे अस्य महतो भूतस्य निश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इति ।(३)

यथा मानवानां श्वासप्रश्वासयोः स्वातन्त्र्यं नैव विद्यते तथा वेदनिर्माणे परमात्मनः स्वातन्त्र्यं नैव विद्यते । अतएव

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः ॥ अन्यच्च—
सर्वेषां तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥

‘‘स्मृतिः’’

तेन वेदानामपौरुषेयत्वमनादित्वञ्च सुस्पष्टमेव । न्यायवैशेषिकास्तु वेदानां पौरुषेयत्वं मन्यन्ते । एवं तेषां प्रवाहोऽप्यनादिरेव । भगवान् हरीश्वरस्तु स्वयं प्रतिकल्पादौ वेदं प्रवर्तते । तथा च—

तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुः तस्मादजायत ।।(४)

एतावता श्रुतिवाक्येन वेदानां पौरुषेयत्वं तथाऽनादित्वञ्च प्रतिपन्नमेव । भगवान् परमात्मा जगन्निर्मातुः ब्रह्मणः बुद्धौ वेदं समुत्पेदे । जगन्निर्माता धाता ऋषिभ्यः सदोपदेशं ययौ । ऋषयः स्वपरम्परया वेदान् अचीचकासन् । तेनेयमुक्तिः सदा सङ्गच्छते । प्रचोदिता येन पुरा सरस्वती वितन्वताऽजस्य सतीं स्मृतिं हृदि

(ब) ॥श्रीमद् भागवत॥

॥म० म० गिरिधरशर्मा चतुर्वेदी॥ वैदिक विज्ञान॥

॥तैतीय ब्राह्मण॥ ॥२-६६॥

अन्यच्च = तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥१

परन्त्वियं समस्या महतीयं विद्यते सत्यपि निर्गुणत्वे परात्मनि कथं कण्ठताल्वभिघातेन समुत्पन्न वेदशब्दः प्रादुर्बभूव। सकथं निर्गुणेन परात्मना शब्दाः निःसृताः। कथं तेषां प्रचारप्रसारौ भविष्यतः।

परन्तु पुराणागमशास्त्रेषु प्रकारचतुष्टयेन वाचः निरूप्यन्ते परापश्यन्ती मध्यमा वैखरी भेदात्। आसु परापश्यन्ती मध्यमावैखरीषु परावाक् आत्मशक्तिस्वरूपैव। नहि तां परां शक्तिं निश्चेतुं क्षमते। यस्मिन् शब्दार्थौ एकाकारतया परिणतौ स्तः। नैव तं वैविध्येन व्याख्यातुं क्षमते। तयोः कैव केवलं प्रकाशस्वरूपमुदीर्य शास्त्रेषु वर्ण्यते। मध्यमायां शब्दार्थौ विभज्येते। किन्तु मनस्येव तावच्छब्दः पर्यटति। नहि तत्र कण्ठताल्वादीनां व्यापारः सम्भवति। नापि श्रोत्राणि प्रत्यक्षत्वमाकलयन्ति। वैखरीयं वाक् विभागद्वयं विभज्य उपांशुभाषणतया उच्चैःस्वरभाषणतया व्यपदिशति।(२)

(ज्ञान) एतेन परापश्यन्तीमध्यमायां कण्ठताल्वभिघात व्यापारः नैवापेक्षते। अतएव वैखरी शब्दे कण्ठताल्वभिघात व्यापारस्यावश्यकत्वं भजते। अपितु परापश्यन्ती वाचोः पुरुषस्वातन्त्र्यं नैवोपपद्यते। तयोर्निर्विकल्प सविकल्प रूपतया स्वतः सत्त्वमुपपन्नमेव। ज्ञानस्य नित्यत्वात्।

तावदिदं नित्यज्ञानं वेदान्तविदां ब्रह्मैव। ज्ञान प्रमाण वाक्यकदम्ब प्रबन्धेनान्तःकरणे प्रवर्तते। पश्यन्ती वाचि परस्पराश्लिष्टत्वे नापि नैव तं विभक्तुं शक्नोति। मध्यमा शब्दे शब्दार्थयोः सञ्जातविभागेनातः पुरुषस्य स्वातन्त्र्यमुपजायते। एवं शब्दान् परस्परं समाहृत्य वैखरीं वाचं प्रकटयति। परिस्थित्यामस्यां महर्षीणां पश्यन्ती वाचि परमात्मा वेदान् प्रचकार। पुनस्ते महर्षयः स्व वैखरी वाचा शिष्योपशिष्यान् सदाऽध्यैयत। तस्यैव पश्यन्ती वाचः परावाक् शक्तिस्वरूपमेवाऽऽत्मा। सा वाक् शक्तिः व्यापिका। तद्यथा—

यामृषयो मन्त्रकृतो मनीषिणः
अन्वैच्छन् देवास्तपसा श्रमेण।
तां देवीं वाचं हविषा यजामहे-
सा नो दधातु सुकृतस्य लोके॥ (३।

एतावता परावागेव दैवीत्वेन विवक्षितोऽस्ति। सा परा वाक् वेदान्तिनां कृते नित्यज्ञानात्मिका। स एवात्मा। तस्मादुपनिषद् वाक्यं संगच्छते यत्— आत्मा वा अरे द्रष्टव्य इति।

अनया व्याख्यया वैदिकदार्शनिकानां मूलमन्त्रः खल्वात्मैव। आत्मानं विद्धीत्यनेना~~स्मतत्त्व~~ त्मतत्त्वमेव संसारस्य मूलतत्त्वं विव

"दर्शयितुं"

(१) कार्ल जैस्पर्स कृत "द ओरिजिन एण्ड गोल आफ हिस्टरी
अंग्रेजी अनुवाद "१९५३" पृ०-२६९"

क्षितम्। इदमेवात्म तत्त्वं सकल ब्रह्माण्डस्य सकल दर्शनस्य रहस्यं विद्यते। चतुरः पुरुषार्थान् आकलनायात्म तत्त्व मेव प्रथमः सोपानः। अतएव भारतीय दर्शन सकल पुरुषार्थ सोपानस्याऽऽत्मतत्त्वमवाप्तुं प्रधानोद्देश्यं स्वीकृतीति। एकतात्मक सूत्रे सर्वान् समावेष्टुं किमपि तत्त्वं क्षमते चेत्तदा स एवात्मेति समेषां विमर्शः।

यथा दृश्यमान विविधान्तस्ले विद्यमानैकत्वं परीक्षितुं वेदान्तस्य सूक्ष्म तात्त्विक विवेचनं सर्वतः विलक्षणमिदमाभाति। एवं ध्यान धारणाभिः प्रतिपाद्यं तदेवात्म तत्त्वमेवेति निश्चयं मन्ये। भारतीय दर्शनस्य वैशिष्ट्यमावहति यज्जाग्रत स्वप्न सुषुप्त्यवस्थायां तद् मूलभूतात्मतत्त्वं महत्ताऽनुसन्धानेन दिव्यचक्षुषा वा विविच्य तं सम्परीक्ष्य वेदोदधि मन्थनेन तदेवात्म तत्त्वं सुविचार्य तस्य व्यापकत्वं विविध रूपत्वं समन्वयक्षमत्वं सर्वतो भावेन प्रमाण प्रतिपन्नमेव।

पाश्चात्य दर्शनं केवलं दर्शनस्य बाह्यमेव साम्प्रत पर्यन्तं पक्षमवगन्तुं शशाक। अस्मादेव हेतोः वैदिक दर्शनस्य प्राचीनत्वं व्यापकत्वं स्वातन्त्र्यञ्चावेक्ष्य वैदिकी संस्कृतिः वैदिक धर्मो वा सम्मानाभिमानाभ्यां समस्तां सभ्यतां समलञ्चकार। यया सभ्यतया यया संस्कृत्या केषां चेतांसि न प्रसीदेयुः। केषां हृदयानि महानन्द सलिल चञ्चल धारया नैवाभिषिञ्चेयुः। केषां भव्य भालानि महत्ताभिमानेन समुन्नतानि न भवेयुः। एवं केषां वाणी परमाह्लादेन मुखरिता नैव सम्पद्येत। अतएव चिरकाल पर्यन्तं वैदिकीयं संस्कृतिः समस्त जगतो मार्गं ~~द्रष्टुं~~ प्रगल्भा स्यादिति नापरोक्षं प्रेक्षावतां केषां विदुषां वेति।(१)

अतएवाभिनव गुप्त पादाचार्येण त्वमभाणि यत्—

तीर्थक्रिया व्यसनिनः स्वमनीषिकाभि-
रुत्प्रेक्ष्य तत्त्वमिति यद् यदमी वदन्ति।
तत् तत्त्वमेव भवतोऽस्ति न किञ्चिदन्यत्
संज्ञासु केवलमसौ भवतो विवादः॥

(अभिनवगुप्त)

॥एकं सद्विप्रा बहुधा वदन्ति॥ ॥ऋग्वेद॥

॥तृतीय परिच्छेदः समाप्तः॥

यास्क नानिरुक्ति॥ - ७-५-८-६९॥

"[illegible]"

"चतुर्थ परिच्छेदः" "चार्वाक दर्शन"

मानवास्तावत् प्राकृतिक विचित्र गम्भीर लीला सम्पदां पर्यालोच्य प्रतिदिनं प्रतिक्षणं भूमण्डल जन्म ग्रहणादारभ्य कौतुकावहप्राकृतिक दृश्यावलोकन समाच्छन्नतया स्व विचारमालाकुलतया वा परः शतान् विचारान् प्रत्ययीपदत् । केषां मानसमन्दिरं प्राच्यां कमल कोमल कमनीय किरणानि समुद्भास्य काञ्चन रञ्जिताग्निमाला पुञ्जमय सूर्य विम्बानां, प्रतिसायं रजतरश्मिमाला ललामभूतां चान्द्रमसीं भामास्य शैत्यपारावार प्रवाहे जगन्मण्डलानां कौतुकमयविस्मयानि नावीनवत् ।

प्रावृट् श्यामायमानाम्बरमण्डले वलाहकमण्डलानि विस्मापयन् स्व विद्युता सङ्घर्षणेन कर्णकुहराणि वधिरयन् समेषु चेतःसु प्राकृतिक दृश्यावलोकन दुर्घटना विस्मयान् अच्यूचुदत् ।

अतएव परमर्षिः नितान्तमार्यः प्राकृतिक लीला दृश्यावलोकन विस्मयानि सौलभ्येनावगन्तुं संसार रहस्यं देवात्मतत्त्वमचिचिन्तत् । तन्मौलिक व्यापक रहस्यमवधार्य चेतसा तत्त्वं प्रतिपत्तुं सदा प्रायतत । तेन समस्तोऽयं संसारः विभिन्न देवानां क्रीडानिकेतन मित्युक्तिपर्यायाणां सदा संगच्छते । निश्चिनुत इति खल्वार्यः यद् देव परमानुग्रहेणानेन समस्तानि जगती कार्याणि प्रवर्तन्ते । तेनैव विभिन्नाः खलु दुर्घटनाः सदा वो भूयन्ते । समस्त भौतिक जगती प्राकृतिक दृश्यावलोकनस्याधिष्ठानमेवेत्युरीकृते खलु आर्याः । जगतः मूले एकैव परमैश्वर्य शालि लोकोत्तराह्लाद सम्पन्ना शक्तिः सर्वदोद्भासते । स एव खलु आत्मा । अतएव भगवान् यास्कः वचनमिदमाचचक्षे । तथाच–

महाभाग्याद् देवताया एक एवात्मा वहुधा स्तूयते ।
एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति ।।(१)

परन्तु दौर्भाग्यमेव चार्वाकाणां यद् विपरीतां गतिं लेभे । कारतम्य समासीनसुधाह्लादमपाकुर्वन् विषय विषज्वालां निपीय विषयभोग लालसाऽऽकुल चेताश्चार्वाकः मदन मन्दिर चित्त चाञ्चल्योन्मुक्त परिभ्रमणे भौतिकत्वं पर्यहात् ।

भौतिक विषय कमनीयाह्लादकानने विहारमाधुर्यमाकलनमात्रमित्युद्वीक्ष्य केषां चेतांसि नैव चेविद्येरन् । परमकारुणिको भगवान् कथापारावारः कथां कलयेत्तदा चार्वाकाः कामयमानां गतिं लभेरन् । विचित्रात्मकं वस्तु वोभवीति सन्देहवादः । यस्य कस्यापि दर्शनस्य पृष्ठभूमौ विचित्रात्मक सन्देहवादवीजमुवाप चेत्तदा तद् सन्देहवीजमपाकर्तुं सततं प्रयतमानोऽपि नैर्मूल्य मेवाऽऽदत्ते । तद् सन्देहवीजं पादपरूपतामासाद्य सदा वर्द्धतएव । विच्छेदेऽपि तद्वीजे पर्कटीवृक्ष इव सर्वदा एधमान एव लोचनगोचरायते ।

"जायस्व म्रियस्व" "इत्युपनिषद्" (छा०)

~~सन्देहमाकलयन्तं~~ ~~[illegible]~~ सन्देहमाकलयन्तं सयन यदा परलमितस्ततः विच्छेत्तुं विचाराणां प्रवाहः कतिपयानि क्षणानि क्षमेत तदा मन्दत्वमाकलयति विचारधारा प्रवाहे ज्ञान विवस्वत् किरणानि नितरामाकलयन्ति प्रगाढतिमिरपटलानि। भारतीय तत्त्वज्ञान नवयुगोतिहासं पर्यालोच्य सत्यमिदं वचः आगमनिगमाभ्यां संवलितम्।

पश्चात्तत्र समुत्पन्न विभिन्न विचारपक्षान् अजीजनत्। यस्मिन् विचार तत्त्वप्रधाने उपनिषत्साहित्ये विभिन्न विचारपक्षाः समाजग्मुः। यत्र क्रियावादः, यदृच्छावादः सन्देहवादश्च समागच्छन्ति। अंयमेव सन्देहवादः चार्वाकाणां विचारपक्षस्य मूलभित्तिः।

चार्वाकाणां विचारपक्षस्य मूलभित्तिं सन्देहवादं समुच्छेत्तुं बद्धपरिकोर्यं वैदिकधर्मः हिन्दुसंस्कृतिं पुनः प्रतिष्ठापयितुं पञ्चम वेदं महाभारतं प्रणिनाय। आपाततः सन्देहवादिनः कमनीयां युक्तिं निगमागम हीनां विलोक्य तस्य निःसारत्वमभाषत।

आसुरी सम्पद्वर्णनावसरे षोडशाध्याये तेषां प्रवृत्तिं नितरामुल्लिलेख। ये च सन्देहवादिनः जगतः आश्रयरहितत्वं, असत्यत्वं वेत्युदीर्य सामान्यतया स्त्रीपुरुषोत्पन्नमिदं जगत् सदाऽपरस्परसंभूतमेवेति व्याजह्रुः। भोगवृत्तिं चरितार्थयितुं काम हेतुकत्वमप्यवभाषते। ये सन्देहवादिनः कामस्यैव पुरुषार्थत्वमुद्वीक्ष्य जन्मकाल प्रभृति मरणपर्यन्तं विभिन्न चिन्तासन्तान वितानेन स्वात्मानं समाच्छादयामासुः।

परन्तु दौर्भाग्यमेव चार्वाकाणां यद् गीतारहस्य प्रधान व्याख्यामालोच्य तेषां विचार प्रवाहः नावरुरोध। अतएवोपनिषत्साहित्ये आत्मनां तिस्रः गतीः अभाणिषुः। अर्चिमार्गः (देवमार्गः) (धूममार्गः) पितृमार्गश्च। द्वाभ्यां भिन्नो मार्गः जघन्यात्मकः। अयमेव जघन्यात्मको मार्गः समुत्पत्ति विनाश मार्गस्य संज्ञां लभते। एव, एतादृश्यां प्रतिकूल परिस्थित्यां चार्वाकाणां विचार पन्थाः अधिकाधिकां विकासतामाकलयत्। चार्वाकोऽयं वैदिक धर्मस्याऽऽध्यात्मपक्षं व्यावहारिकपक्षमपि वस्तुतः नितरामुपेक्ष्य भूतवाद प्रचाराय प्रसाराय च सन्नद्धो बभूव। कोऽपि व्यवस्थित समाजः चार्वाक दर्शनं कल्याण साधन मार्गतः सदोपेक्ष्य तिरश्चकार। अतएव जनसमुदायान् स्वाभाविकगत्याऽऽकर्षयितुं नैव समर्थोऽभूत्। जैन वौद्धादयोऽपि सर्वांशेवैदिक मार्गमपास्य क्वचिद्देशमाकलय्यपि जनसमूहानां पीडित हृदयं विज्ञाय तद्व्यथां निराकर्तुं

"चार्वाक दर्शन" "डॉ० आनन्द झा"

"कठोपनिषद्" "कठ० उ०"

प्रायतन्त। अस्मादेव कारणात् सामाजिकव्यवस्थायाः पृष्ठभूमौ तिरोहितं रहस्यं विज्ञाय तद्व्यवस्थाविकासाय च महत्त्वपूर्णभूमिकां स्वीचकार। अतएव जनसमूहानां श्रद्धास्पदत्वं लेभिरे।

जन्ममरणक्लेशादीन् नितान्तमपहर्तुं उपनिषत्कालीनऋषीणां लक्ष्यं स्वीकृत्य तत्पदचिह्नमनुकृत्य बुद्धमहावीरौ प्रवर्तेताम्। उभौ महाशयौ उपनिषत्कालीन विचारपद्धतिमवलम्बयन्तावपि निःसङ्कोचमेव क्वचिदपि श्रुतिमूलकपक्षं तिरश्चक्रतुः। नहि तावदुपनिषत् साहित्यपरम्परामत्याक्षाम्।(१)

एक एव विशालकाय सुशीतल महाद्रुमस्य शाखालक्को वैदिकधर्मो यथा सन्तिष्ठते तद्वत् जैनबौद्ध धर्मावपि वैदिकधर्मस्य छायेव प्रतिभातः। आरम्भसमये नोभयोर्वान्तरभेदः परन्तु कालक्रममर्यादया परवर्तिनो विद्वांसः भेदभावं समुपकल्प्य महतीं शैलालेखां निर्ममौ। परन्तु नेयं वार्ता वास्तविकी। श्रुतिप्रमाणप्रतिषेधतया उभौ बौद्धजैनौ नितान्तमवैदिकौ स्तः।

अवैदिक दर्शनेषु चार्वाकदर्शनस्य प्राचीनत्वं सर्वमान्यमाभाति। लोकोऽयं तावदाशानां क्रीडास्थलमेव। इहलोकात् परं किमपि नास्ति। शरीरमेवात्मा। मरणमेव मुक्तिः। अतएव यावच्छरीरे प्राणोऽस्ति तावत् कालपर्यन्तं सुखं वाञ्छति सः। नतावत् कश्चित् पुरुषार्थो धर्मः। मानवजीवनाय काम एव पुरुषार्थः। अयं सिद्धान्तश्चार्वाकाणां विद्यते इति। ~~उपनिष~~

उपनिषत्कालेऽपि चार्वाकाणां सिद्धान्तस्य प्रचारप्रसारौ आस्ताम्। तस्यां वेलायामपि तावदात्मविषयकसिद्धान्तो जागर्ति इवाऽऽसीत्। अनेके विचारकास्तु नहि मरणान्तरमात्मनः सत्ता विद्यते इति प्रवदन्ति तदपरे न क्षमन्ते। न प्रेत्य संज्ञास्तीत्युपनिषद्वाक्येन मरणानन्तरं नहि किमपि चैतन्यं विद्यते इति।

"अस्तीत्येके नायमस्तीति चैके" "न प्रेत्य संज्ञास्तीति" ओ ब्रवीमि॥(२) अनेन वाक्येन चार्वाकाणां प्राचीनत्वं सर्वसम्मतमेव। बौद्धजैन ग्रन्थेष्वपि चार्वाकाणां सिद्धान्तः पूर्वपक्षतया समागच्छति। पारलौकिकचर्चामाकलयन्तो जनाः नितान्तमग्लासिषुः।

श्रुतिकाले यज्ञानुष्ठानं तपश्चरणं कुर्वतां वैदिकानां श्रुतिसिद्धान्तेन हतप्रभतयैव चार्वाक दर्शने प्रस्तुतसिद्धान्तस्य प्रतिक्रिया लोचनपथे समागच्छति। अस्मादेव कारणात् चार्वाकः परलोकचर्चाञ्चिच्छेद। इन्द्रियप्रत्यक्षाण्येव सत्यत्वमाकलयन्ति ते। नहि क

"बृहस्पति सूत्रम्" "चार्वाक दर्शन"

"आदिकाव्य" "रामायण" "जावालि राम सम्बाद"

"विनयपिटक" "सद्धर्म पुण्डीक" "त्रयोदश परिच्छेद"

श्चिदात्मा सत्यम्। उपर्युक्तोपनिषद्वाक्येन श्रौतकालीन धर्मानुष्ठानेनाऽपराजित तया चार्वाकाणां दर्शनं समेषां चेतःसि उदितं प्रतिभाति।

बृहस्पति मतानुसारिणां नास्तिकशिरोमणीनां चार्वाकाणां तावत् सिद्धान्तः

यावज्जीवेत् सुखं जीवेत् नास्ति मृत्युरगोचरः।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥ (१)

इति लोकगाथां स्वीकुर्वन्तो चार्वाकाः नीति काम शास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यन्ते। चार्वाकमतमनुवर्तमानाः पारलौकिकमर्थमपह्नुवाना एव सदानुभूयन्ते। अतएव तस्य चार्वाक मतस्य लोकायत मन्वर्थं नामधेयं प्रसिद्ध्यति।

परपक्षोच्छेदनमेव तेषां प्रधानोद्देश्यम्। नहि तेषां स्वपक्षस्थापने किमपि वैशिष्ट्यमवलोक्यते। स तु केवलं वैदिकानां पक्षं भेत्तुं भीरस तर्कं जग्राह। अमी लोकायतिकाः स्वकीयान् तर्कजालान् विहाय शास्त्रप्रमाणानि लेभिरे। अयं वेद विदूषकः जैन बौद्धग्रन्थान् चिच्छेद। जैन बौद्ध वैदिकाश्च घृणाभावनया चार्वाकमतानि अलुलोकन्।

(१) आदिकाव्येऽपि श्रीरामचन्द्रः भ्रातलक्ष्मणाभ्यां सह लोकायतिकं निनिन्द। वि~~[illegible]~~नय पिटकेऽपि भगवान् बुद्धः लोकायतिक पक्षं तिरस्कुर्वन् स्वशिष्यान् एवमुपदिदेश। चार्वाक दर्शन विषयक निन्दोल्लेखेन स्पष्टमेव विज्ञायते यदयं चार्वाकः नितरां निन्द्यः। जैन दार्शनिकोऽपि चार्वाक विचारपक्षं सदाऽश्रद्धेय तया निनिन्द।(२)

अयं चार्वाकः देवगुरोः शिष्यत्वमुपजगाम। चर्वभोजने इत्यस्माद् धातोः चार्वाक इति सम्पद्यते। ~~चर्वकान् भुञ्जानां~~, । चर्व्यतां भुज्यतां निपीयतां भुज्यतां वेत्यनेन चार्वाकः। पारलौकिक तत्त्वानि चर्वयित्वा अयं दार्शनिकः चार्वाक संज्ञां लेभे। अथवा भौतिक सुखोपदेशमाकलय्य चारुवाक इत्यनेन चार्वाक पदवीं लब्धवान्। अद्यप्रभृत्यपि नास्तिक सिद्धान्तानुमन्ता चार्वाक शब्देन व्यवहृतः। दर्शनमिदं बार्हस्पत्य संज्ञां लभते।

भारतीय दर्शनस्येतिहासे चार्वाकाणां विचारपक्षः देवगुरुणा बृहस्पतिना प्रत्यपादि। प्राचीन दर्शनग्रन्थेषु ब्रह्मसूत्रेष्वपि शाङ्करे भाष्ये वा विभिन्नानि सूत्राणि दृश्यन्ते।

"भौतिकसिद्धान्तः" पृथिव्यप्तेजो वायुरिति तत्त्वानि।
तत्समुदाये शरीरेन्द्रिय विषयसंज्ञा,
तेभ्यश्चैतन्यम्।
किण्वादिभ्यो मदशक्तिवत् विज्ञानम्।
चैतन्य विशिष्टः कायः पुरुषः॥

"बार्हस्पत्य सूत्रम्" (१)

(२) "वार्ता दण्डनीतिश्चेति बार्हस्पत्याः"

(३) "तत्त्वोपप्लवसिंह" जयराशिः" "(८०) शतक"

(४) "चार्वाक दर्शन" "बलदेव उपाध्याय"

(५) "चार्वाक दर्शन"

कामएवैकः पुरुषार्थः ॥
मरणमेवाऽपवर्गः ॥ (१)

इमानि अष्टौ सिद्धान्तानि चार्वाकाणां प्रतिभान्ति। तथाच— विज्ञानघन एवैतेभ्यः समुत्थाय तान्येवानुविशयति सर प्रेत्य संज्ञास्तीति। तस्मात् चैतन्यविशिष्ट एवात्मा। देहातिरिक्ते ऽऽत्मनि प्रमाणाभावात्। प्रत्यक्षैकप्रमाणतया ऽनुमानादेरनङ्गीकारेण प्रामाण्याभावात्।

राजनीतिशास्त्रेष्वपि बृहस्पते रुल्लेखोऽस्ति। भासस्य प्रतिमानाटके बार्हस्पत्यशब्दमुल्लिलेख। कौटिल्योऽपि स्वकीयार्थशास्त्रे बृहस्पतिमतं समुट्टङ्कितवान्।(२)

तावदिदं बार्हस्पत्यसूत्रं चार्वाकाणां सर्वस्वरूपम्। प्राचीनकाले चार्वाकाणां मूलग्रन्थोऽपि समुपलभ्यते स्म। परन्त्वधुना तदवहेलनया तेषां मूलग्रन्थः नितान्तदर्शनत्वमगमत्। ~~महान्ति~~ भट्टराशिविरचिते ग्रन्थे चार्वाकाणां तत्त्वानि यथास्थानि प्राप्यन्ते। (३) तर्कबहुलोऽयं ग्रन्थः व्यलेखि दशमशतके। एतेषां दार्शनिकसिद्धान्तः प्रतिवैदिकदर्शनैः पूर्वपक्षतया समुत्थापितः। ब्रह्मसूत्रस्य भाष्ये न्यायमञ्जर्यां श्रीहर्षस्य नैषधीयचरिते सर्वदर्शनसङ्ग्रहे च चार्वाकाणां सिद्धान्तो यथास्थानि नितान्तमभाणि।

अतएव चार्वाकाः पक्षमिदं ब्रुवते यत्—

(४) देहाकारपरिणतेभ्यः किण्वादिभ्यः मदशक्तिः चैतन्यमुपजायते। विनष्टेष्वपि तेषु स्वयमेव विनश्यति। अङ्गनाद्यालिङ्गनमेव पुरुषार्थः। नचास्य दुःखसम्भिन्नतया पुरुषार्थत्वं नास्ति। प्राप्तदुःखपरिहारेण सुखमात्रस्यैव भोक्तव्यात्। मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते। यथा वा धान्यार्थी सपलालानि धान्यानि आहरति। तस्मात् दुःखभयात् सुखं त्यक्तुं नैवोचितं प्रतीयते।

सन्तिष्ठन्ते मृगा इति नोप्यन्ते किं शालयः। सन्तिष्ठन्ते खलु मृगाः नाधिश्रीयन्ते स्थाल्यः। अतएव कश्चित् भीरुः विलोक्य त्यजेत् सुखं तर्हि पशुवत् मौर्ख्यमेवतावदास्ते। अतोहि वचनमिदं तावदचीकथत्—

त्याज्यं सुखं विषयसंगमजन्म पुंसां—
दुःखोपसृष्टमिति मूर्खविचारणैषा।
व्रीहीन्जिहासति सितोत्तमतण्डुलाढ्यान्—
को नाम भोस्तुषकणोपहितान् हितार्थी।।(५)

नन्वत्र "बहुवित्तव्ययशरीरायाससाध्येऽग्निहोत्रे पारलौकिकसुखाभावे कथं प्रवर्तिष्यन्ते वृद्धा इति चेत्सत्यम्।

(व) अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुष हीनानां जीविकेति बृहस्पतिः॥
॥बार्हस्पत्य सूत्रम्॥ ॥चार्वाक दर्शन॥

॥गौतम सूत्रम्॥

अनृत व्याघात पुनरुक्त दोषैः दूषिततया वैदिकमन्त्रैः वाद जल्प प्रलापपर्यायैः कर्मकाण्ड प्रामाण्य व्याख्यान प्रगल्भैः ज्ञानकाण्ड प्रकाण्ड व्याख्यान चतुरैः ज्ञान कर्म विषयाणां प्रतिक्षिप्तत्वेन त्रय्या धूर्त प्रलाप मात्रत्वेन च जीविका मात्र प्रयोजनत्वात् अग्नि होत्रादेः। तथाचाभाणकोयं नितरां संगच्छते। (७)

अनेन बृहस्पति वाक्येन अग्निहोत्रस्य लौकिक सुख विरहत्वमाकलय्य तस्य वैयर्थ्यमेव। सम्पादितेऽपि पुत्रेष्टि यज्ञे पुत्रानुत्पाद एव वेदवाक्यस्य वैयर्थ्यं ज्ञापयति। कर्मकाण्ड प्रकरण सन्दर्भे "ओषधे त्रायस्वैनम्, स्वधिते मैनं हिंसीः" इत्यादि कर्मकाण्ड वाक्येनाऽचेतन वस्तुनः चेतनतया सम्बोध्य तत्प्रतिपादनस्यनौचित्यात्।

उदिते जुहोति अनुदिते जुहोति" इत्यादि वैदिक मन्त्राणां पारस्परिक व्याघात दोष दुष्टत्वात् तदुपेक्षणे नैव सङ्कोचावसरः। अतएव सायणाचार्यस्य ऋग् वेद भाष्यभूमिकायां मन्त्रब्राह्मणयोः प्रामाण्य विचारः द्रष्टव्यः। तथाच न्याय सूत्रमपि —

"तदप्रामाण्य मनृत व्याघात पुनरुक्त दोषेभ्यः" (७)

मीमांसकाः ज्ञानकाण्डस्याऽप्रामाण्यं भजन्ते। वेदान्तिनस्तु कर्मकाण्डस्याऽप्रामाण्यमङ्गी कुर्वते। चार्वाकस्तु वेदाऽप्रामाण्यं स्वीचकार। अतएव केवलं प्रत्यक्ष प्रमाणमङ्गी कुरुते चार्वाकः। निर्मूलावेवानुमान शब्दौ विद्येते। विषयेन्द्रिय सन्निकर्षात् प्रत्यक्षज्ञानमेव भजते चार्वाकः। प्रमेयस्य सिद्धिरपि प्रत्यक्षप्रमाणेनैवोपपद्यते। इन्द्रिय प्रत्यक्षीकृतं जगद् वास्तविकम्। तद्भिन्नमवास्तविकम्। अतएवायं विषयः कल्पना मात्रम्। मृदु कठोर शीतोष्ण भावाः त्वगिन्द्रियेणैवोपपद्यन्ते। कटु कषायाम्ल मधुरादि रसाः रसनेन्द्रियेणैवाऽऽस्वाद्यन्ते। मृगमद मलय चन्दनादीनि घ्राणेन्द्रियेणैव प्रत्यक्षी क्रियन्ते। घटपट स्थावर जङ्गमादयोऽपि चक्षुषावगम्यन्ते। शब्दाः श्रोत्रेणैव विज्ञायन्ते। अनया पद्धत्या पञ्च प्रकारक प्रत्यक्षाणि इन्द्रियेणैवानुभूयन्ते। तान्येव प्रामाण्यमाकलयन्ति। अनास्वादिताऽनाघ्रातादृष्टाश्रुत विषयाः न कदाप्यङ्गी क्रियन्ते चार्वाकैः।

यद्यपि बौद्ध जैन प्रभृति दर्शनानि नितान्तमवैदिकत्वं भजमानान्यपि अनुमान प्रामाण्यं भजन्ते। नहि प्रत्यक्षप्रमाणेनैव समस्ताः प्रमेय पदार्था अवबुध्येरन्। एवं समस्त लोक व्यवहाराः नहि प्रत्यक्षेण जायेरन्। अतएव इमे दार्शनिकाः लोकव्यवहार मर्यादयाऽनुमान प्रामाण्यं मन्यन्ते। परन्तु नानेन चार्वाकेण प्रमाणको

(१) "बार्हस्पत्य सूत्रम्" "चार्वाकदर्शन"

रावनुमानं स्वीक्रियते। सन्दर्भेऽस्मिन् तर्कप्रणाली नितान्तमाह्लादिनी मनोरमा चेति।

"अनुमान प्रामाण्य विचारः"

लोकव्यवहारसाधनाय नितरामनुमानमपेक्षते। परं चार्वाकः लोकव्यवहारं निश्चेतुं नैवानुमानस्यावश्यकत्वं भजते। केवलं सम्भावनामात्रमपेक्षते। सम्भावनामाश्रित्य जगतः समस्तानि कृत्यानि सन्तिष्ठन्ते। दुग्धस्य लघुपात्रे धवलतम पर्याप्ति निगममवधार्य शिशवः प्रवर्तन्ते। अतएवेयं प्रकृतिः नितरां सम्भावनामूलिका। किन्तु नि नेयं प्रकृतिः ध्रुवा। तानि पर्याप्ति ग्रहीतुं यदा शिशवः प्रवर्तन्ते तदपि सम्भावनमात्रमेव न तु निश्चेतुं क्षमते। तस्मात् सम्भावनामात्रमुदीर्य लोकव्यवहारायानुमानमपेक्षते।

परन्तु किमर्थमनुमानमपेक्षन्ते वैदिकदर्शनानि। तदप्याश्चर्यमाभाति। अतएव कण्टकादिजन्यदुःखस्यैव नरकत्वात्। लोकसिद्धस्य राज्ञः परमेश्वरत्वात्। देहोच्छेदस्यैव मोक्षत्वात्। स्थूलोहं कृशोहं कृष्णोहमित्यादि व्यवहारा सामानाधिकरण्येनैव देहात्मवादे समुत्पद्यन्ते। ममशरीरं तु व्यवहारः "राहोः शिरः" इतिवत् औपचारिक एव। तथाचोक्तं चार्वाकसूत्रम्—

अङ्गना लिङ्गना जन्यं सुखमेव पुमर्थता।
कण्टकादिव्यथाजन्यं दुःखं निरय उच्यते॥
लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः,
देहस्य नाशो मुक्तिस्तु न ज्ञानान्मुक्तिरिष्यते,॥
अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः,
चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥
किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।
अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः॥
देहे स्थौल्यादियोगाच्च स एवात्मा न चापरः।
ममदेहोऽयमित्युक्ति सम्भवेदौपचारिकी॥ (९)

स्यादेष मनोरथश्चार्वाकाणां यद्यनुमानादेः प्रामाण्यं न भवेत्। वह्निधूमयोः कार्यकारणभङ्गीकृत्य तत् साहचर्यमपि नितान्तमवकुद्ध्याऽपि नहि चार्वाकः व्याप्तिं मन्तुं प्रभवति। एतेषां विचारपद्धतौ जगतीतलेऽस्मिन् कार्यकारणभावाय नास्ति किमपि प्रयोजनमपेक्षते। संसारस्य वैचित्र्यं नहि कार्यकारणभावमूलकं किन्तु स्वभावमूलकमेव। सुखिनं दृष्ट्वा धर्मं कल्पते, दुःखिनं विलोक्याऽधर्मं कल्पते। नास्मै प्रयोजनाय कारणान्तरमपेक्षते। जले शैत्यं वह्नानुष्णत्वं स्वाभाविकमेव। नहि तत्र कारणान्तरं विद्यते। मयूरे चित्रत्वं नैवका

(१) "चार्वाक दर्शन" "डा॰ देवराज"

(२) सृण्यव जर्भरी तुर्फरी नैतोशेव तुर्फरी पर्फरीका।
उदन्यजेव जेमना मदेरू ता मे ~~[illegible]~~ जराय्वं मरायु" ॰
"ऋग्वेद - १० - १०६।६"

रणमपेक्षते नैसर्गिकादेव तत्। पिकानां मधुरकलरवोऽपि नैसर्गिक एव। नात्र कारणान्तरावसरः समापतति। अतएव चार्वाकाणां सिद्धान्तो दार्शनिक जगतीतले स्वभाववाद नाम्ना विख्यातोऽस्ति। तेन जगतां समुत्पत्तिविनाशौ स्वभावप्रयुक्तौ विधीयेते। वस्तूनां स्वभाव एव जगतः वैचित्र्यमाधत्ते।

कार्यकारणभावस्य वास्तविकं ज्ञानं नैव सेत्स्यति। कार्योत्पत्तिवेलायां विभिन्नाः खल्वोपाधयः सन्तिष्ठन्ते। यस्मिन् बह्व्यः व्यक्तत्वं लभन्ते। तदपरेऽव्यक्तत्वमेवाऽऽकलयन्ति। अस्मादेव हेतोः समग्रव्यक्ताव्यक्तोपाधिपूर्णज्ञानमन्तरा नहि कार्यकारणभावं मन्तुं क्षमते चार्वाकः। एभिः कारणकूटैः चार्वाकः नानुमानं प्रमाणमिति नितान्तं निरणैषीत्। एवं शब्दोऽपि न प्रमाणं मनुते सः। (१)

विभिन्नानां दार्शनिकानां विचारपक्षमाकलय्य शब्दप्रमाणे सत्यपि सर्वसम्मतत्त्वे जैनबौद्धाः वेदे प्रामाण्यं नावलम्बन्ते। परन्तु तेऽपि स्वागमवाक्यानां प्रामाण्यं संसेद्धुं बद्धपरिकरा एव दृश्यन्ते। अतएव तेऽपि शब्दप्रामाण्यं नैव तिरस्कुर्वन्तो दरीदृश्यन्ते। स्वपक्षप्रतिपादनकुशलाः स्वपक्षमुद्घोषयन्ति।

कस्याप्तपुरुषस्य वाक्यं श्रावंश्रावं यदर्थमाकलयन्ति तत् प्रत्यक्षेणैवोपपद्यते। नहि तस्मै स्वतन्त्रं प्रमाणं नितामपेक्षते तावत्। कस्याप्त प्रामाणिक सत्य वचनस्य नितान्तं हितप्रदतया तद्वचसि विश्वास योग्यत्वसम्पादनमेवानुमानमुद्गिते। आप्तपुरुषाणां वचसि सत्यत्वं निःसारमेव। अदृष्टलोकस्याश्रुतपूर्वपदार्थप्रतिपादनं भवतु नाम चेतांसि नितान्तमाह्लादयितुं सक्षमः परन्तु नास्ति तत्र प्रामाण्यमङ्गीकर्तुं क्षमते कोऽपि। अतएव वेदस्यापि नैव प्रामाण्यं भजते चार्वाकः।

परस्परं विरोधवाक्यप्रतिपादनेन, निरर्थकशब्दस्योपादानेन चाऽप्रत्यक्षपदार्थस्य परिकल्पनेन च नैव वेदानां प्रामाण्यं स्वीकर्तुं क्षमन्ते तावत्। अश्वमेध यज्ञवर्णनप्रसङ्गे घृणितकार्यकलापवर्णने जर्भरी तुर्फरीत्यनर्थक शब्दप्रयोगे जायमानतया तथा यज्ञकर्मणि मांसभक्षण विधानवाक्येन च नहि वेदानां प्रामाण्यमनुत।(२)

परन्तु प्रत्यक्षप्रमाणमङ्गीकुर्वतां चार्वाकाणां मन्दमतीः दर्शं दर्शं चकितमभिधत्ते। लोकव्यवहारसम्पादनायानुमानस्य प्रामाण्यमस्त्येवेति। कथमन्यथा धूमप्रत्यक्षानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत। फलानि सन्ति नद्यास्तीरे" वचनमिति श्रवणानन्तरमेव झटिति फलार्थिनो नदीतीरे प्रवृत्तिरिति सार्वजनी

(१) "चक्षुराद्युक्त विषयं परतन्त्रं बहिर्मनः" "तत्त्वविवेक"

"इण्डियन रिसर्च इंस्टीच्यूट सम्पादित ऋग्वेद भाष्य भूमिका" (२)
"सायणाचार्य"

मो व्यवहारः। परन्तु दौर्भाग्यमेव चार्वाकाणां यत् मनोराज्य विजृम्भणमात्रं व्यनक्ति सर्वमिति। अनुमान प्रामाण्य वादिना नितान्तमभ्युपगतं व्याप्ति पक्षधर्मताशालि लिङ्गं गमकम्। व्याप्तिश्चोभयविधोपाधि विधुरः सम्बन्धः। स च विद्यमानतया चक्षुरादिवन्नाङ्गभावं भजते किन्तु ज्ञाततयैव। अत्र कः खलु ज्ञानोपायः स्यादिति।

न तावत् प्रत्यक्षप्रमाणेन सम्भवति। तस्य बाह्यान्तराभिमतत्वात्। तत्र बाह्यप्रत्यक्षस्य सम्प्रयुक्त ज्ञान जनकत्वेन सत्यपि प्रसरसंभवे भूतभविष्यत्कालिक ज्ञानासम्भवेन सर्वोपसंहारवत्याः व्याप्तेः दुर्ज्ञानत्वात्। न च व्याप्तिज्ञानस्य सामान्यगोचरतया व्यक्त्योरविनाभावाभाव प्रसङ्गात्। नाप्याभ्यान्तरिक प्रत्यक्षेणापि सम्भवति चेतसो बहिरिन्द्रियाधीनतया बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः। तथाचोक्तमपि।(१)

नाप्यनुमानं व्याप्तिज्ञानोपायं कल्पयितुं प्रभवेत्। यद्यनुमानेन भवता व्याप्तिः निर्णीयेत तदा व्याप्तिसम्पादन तत्परानुमानायानुमानमपेक्ष्यते। एवं तत्र तत्राप्येवमित्यनवस्था दोषस्य प्रसंगात्।

कणादमतानुसारेण शब्दस्यानुमान एवान्तर्भावतया नापि शब्दः व्याप्ति ज्ञानोपायं वक्तुमलमेव। वृद्धवाक्य मर्यादां कक्षीकृत्य तदन्तर्भावेऽपि वृद्धव्यवहाररूप लिंगस्यावगति सापेक्षतया प्रागुक्त दूषण लङ्घना जंघालित्वात्। एवं धूम ध्वजयोरविनाभावस्य पुरातनकालत एव सत्तयेति वचनमात्रे मन्वादिवद् विश्वासाभावाच्च।

अविनाभावात्मक व्याप्तिमजानन् तद्भिन्न विषयवस्तु समवलोक्य नानुमानं प्रभवेत्। अतएव स्वार्थानुमान कथायाः कथाशेषत्व प्रसङ्गतया परार्थानुमानस्य कथा दूरतएव परिहृता।

इयमनवस्था दोषकथा विभिन्नस्वभावा। यास्तु साधारणेयं दोषकथा वीक्षतीति। किमपि वस्तुतत्त्वं तदाऽऽश्रित्य सम्पादयितुं चेष्टते तदात्माश्रय दोषो भवतीति। उभय वस्तुनोरेकस्यापरामाश्रित्य सम्पादयति चेत्तदाऽन्योन्याश्रयः समापतति। विभिन्ने खलु वस्तुनि चक्रवत् परिवर्तमानो दोषः चक्रकः। तर्कावधिपर्यन्तं निरवधिकतया चक्रवत् परिवर्तमानो दोषोऽनवस्था। किन्त्वियमनवस्था बीजाङ्कुरस्थले नैव दोषावहा। (२)

उपमानादिकं दूरादेवाऽपास्तम्। संज्ञासंज्ञि सम्बन्धादि बोधकत्वेनानौपाधिक संसर्गावबोधकत्वाऽसंभवात्। यतो हि - उपमितिकरणमुपमानम्। संज्ञा संज्ञि सम्बन्ध ज्ञानमुपमितिः।

किञ्चोपाध्यभावो वा व्याप्तिरित्यपि नितरां दुरवगमः। कथंनु उपाधीनां प्रत्यक्षत्व नियमाऽसम्भवतया प्रत्यक्षाणामभावस्य सत्यपि नि

(१) "सर्वदर्शन सङ्ग्रह" उपाधि लक्षण विचार:"
"माधवाचार्य"

(२) "मुक्तावली" "उपाधिनिरूपण" विश्वनाथ

(३) "तत्त्वचिन्तामणि" उपाधिप्रकरण"
"गँगेशोपाध्याय"

नितान्तम

प्रति- तएँ प्रत्यक्षतया एवमप्रत्यक्षाणामभावस्य सत्यपि प्रत्यक्षतया अभाव ज्ञानं प्रतियोगिज्ञानस्य सापेक्षतया तत्र तत्रानुमानस्यावश्यतयोक्त दूषणकलङ्कपङ्कप्रक्षालनस्य विवदमानत्वात्। (१)

चार्वाकाणां तात्पर्यमिदमाभाति यदुपाधिहीनत्वमेव व्याप्तिलक्षणमुच्यते तदा सर्वप्रकारेणोपाधिरहितत्वेन भाव्यम्। यथाभावज्ञानं प्रतियोगिज्ञानसापेक्षं तद्वत् उपाधिज्ञानमन्तरा न ह्युपाध्यभावं वेत्तुं शक्नुयात्। उपाधीनां प्रत्यक्षतया तदभावस्य प्रत्यक्षं सुस्पष्टमेव। किन्त्वप्रत्यक्षोपाधीनां विरहः सदाऽप्रत्यक्ष एव। तस्मादप्रत्यक्षोपाधिज्ञानसम्पादनाय पुनरप्यनुमानमेव सदाऽपेक्षेत। पुनस्तत्रानुमाने समापतत्येवोपाधिहीनसम्बन्धः। अनुकूलतर्काय पुनः व्याप्तिज्ञानं शरणमित्यतः समुल्लिखितशृङ्खला निरवधिकैव प्रतीयते तस्मादनवस्थादोषदुष्टत्वकलङ्कपङ्कजिहीर्षन् साधनाव्यापकत्वे सति साध्यसमव्याप्तिरित्येवोपाधिलक्षणं सदा स्मर्तव्यम्। तदुक्तञ्च —

अव्याप्तसाधनो यः साध्यसमव्याप्तिरुच्यते स उपाधिः।
शब्देऽनित्ये साध्ये सकर्तृकत्वं घटत्वमाश्रवणं च ॥
व्यावर्तयितुमुपात्तान्यत्र क्रमतो विशेषणानि त्रीणि।
तस्मादिदमनवद्यं समासमेत्यादिनोक्तमाचार्यैश्च ॥(२)

शब्दोऽनित्यः कृतकत्वादित्यत्र सकर्तृकत्वं घटत्वमाश्रावणत्वोपाधित्रयम् व्यावर्तयति त्रीणि विशेषणानि क्रमतो नितामुपात्तानि।

पर्वतो वह्निमान् द्रव्यत्वात्” अत्र द्रव्यत्वेन साध्यत्वेनास्ति समव्याप्तिः। अर्थात् परस्परं व्याप्यव्यापकभावापन्नमिदं वीक्षतीति। वह्नित्वेन साध्यत्वे धूमादि हेतौ पारस्परिकव्याप्यव्यापकभावतया विपर्ययं व्याप्तिः।

तथाचोपाधिलक्षणं व्याजहार —

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत् तस्य निष्कर्षोऽयं प्रदर्श्यते ॥(३)

तथाच साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठाभावप्रतियोगित्वं साधनाव्यापकत्वम्। पर्वतो धूमवान् वह्निमत्वात्” अत्रार्द्रेन्धनसंयोग उपाधिः। तथाच यत्र धूमस्तत्रार्द्रेन्धनसंयोगोनास्त्ययोगोलके आर्द्रेन्धनसंयोगाभावात्। अतएव तत्र साधनाव्यापकत्वं संगच्छते। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् आर्द्रेन्धनसंयोग उपाधिः। मान्यास्तु —

(ब) ''खण्डन खण्ड खाद्य'' ''श्री हर्ष'' उपाधिलक्षण-निरूपण''

''बार्हस्पत्य सूत्रम्'' ''चार्वाक दर्शन''

समा समाविनाभावावेकत्रस्थौ यदा तदा ।
समेन यदि नो व्याप्तः तयोर्हीनोऽप्रयोजकः ॥ १॥

अनेन मान्यवचनेन स्पष्टमाकलितं जायते यन्नितान्तमेकसार्वकालिकत्व तया समव्याप्तिरुच्यते। यथा पृथिवी गन्धवती गन्धवत्वात्॥ अत्र गन्धवत्व सामानाधिकरण्यं पृथिवीत्वस्य गन्धवत्त्वस्य च एवं पृथिवीत्व सामानाधिकरण्यं गन्धस्य गन्धवत्त्वस्य च सत्तया ~~[illegible]~~ समत्वं स्पष्टमेव। वह्निमान् धूमादित्यत्र तु धूमसामानाधिकरण्यस्य वह्नौ सत्यपि विद्यमाने नैव वह्नि सामानाधिकरण्यं धूमे इत्यतः स्पष्टमेव वैषम्यम्।

एवञ्च विध्यवसायानन्तरमेव निषेधाध्यवसायस्य विद्यमानत्वेनोपाधिज्ञाने सञ्जाते तदभावविशिष्टसम्बन्धात्मक व्याप्तिज्ञानं वा भवीति। उपाधिज्ञानस्य व्याप्तिज्ञानाधीनतया परस्परमन्योन्याश्रय दोषो वज्रलेपायते। तस्मादविनाभावस्य दुर्बोधतया नानुमानस्य प्रामाण्यम्। किंच धूमादिज्ञानानन्तरमेव वह्न्यादि प्रवृत्तिरिति प्रत्यक्षमूलतयैवावगम्यते। धूमादि साहचर्य वैलक्षण्येन क्वचित् फलप्रतिलम्भस्तु मणिमन्त्रौषधिवत् प्रतिभाति। अतएवान्वय व्यतिरेकयोः व्यभिचारित्वेन कार्यकारणभावस्य नैव प्रामाण्यमभ्युपगम्यते। अस्मादेव कारणात् मणिस्पर्शवैलक्षण्येन नहि केनापि कल्याणमयवस्त्वार्यं नितान्तमैश्वर्यं प्राप्येत किन्तु स्वभावादेव। रोगादयोऽपि कदाचिन्नैसर्गिकगत्यैव निवर्तन्ते। किन्तु लोकव्यवहारसिद्धोऽयं पन्थाः वीक्ष्यतीति। काकतालीयन्यायेन अनया पद्धत्या सम्पद्यमानकार्यं समीक्ष्य कार्यकारणभावमङ्गीकुर्वते। तद्वत् वह्निधूमयोः कार्यकारणभावस्य लोकव्यवहारसिद्धत्वेऽपि नैव प्रामाण्यं मन्यन्ते चार्वाकाः।

न चादृष्टस्याऽनिष्टत्वे जगद्वैचित्र्यस्याप्याकस्मिकत्वमापद्येत इति वाच्यम्। स्वभावादेवोपपत्तेः। तदुक्तञ्च —

(अनात्मवाद २१) अग्निरुष्णोदकं शीतं समस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः॥

अतएव जगद्वैचित्र्यमपि स्वभावादेव प्रवर्तते। नात्र कारणान्तरमपेक्षते। वह्नौ नितान्तमुष्णत्वं जले शैत्यं वायौ समशीतोष्णत्वं केन चित्रितं? तस्मात् स्वस्व स्वभावादेव सर्वं सम्पद्येत। नात्र नास्मै प्रयोजनाय कार्यकारणभावावकाशः। तेन चार्वाकाणां तत्त्वमीमांसा स्वप्रकृत्या विलक्षणैव प्रतिभाति। पृथिवी जल तेजो वायव इमानि तत्त्वानि चार्वाकेण स्वीकृतानि। एतेषां चतुर्णां तत्त्वानां माणविकतत्त्वमेव जगतो मूलं कारणम्। एतेभ्यः शरीरेन्द्रियाणि नितान्तमुत्पद्यन्ते। परमेतानि कथमुत्पद्यन्ते तन्न वेवेत्ति चार्वाकः। ईश्वर ईश्वरकारणप्रतिषेधेनाऽस्य जग

"भारतीय दर्शन शास्त्र" प्रकरण "चार्वाक दर्शन"
"डा० राजेन्द्र प्रसाद"

(२) "सर्वदर्शन" "माधवाचार्य"

"भारतीय दर्शन" "डा० देवराज"

गतः कस्यापि चेतन तत्त्वस्य सत्त्व व्यतिरिक्ततया कुतोऽयं संसारः चार्वाक विचारदृष्ट्या स्वभावादेवेत्युदीर्य भूतचतुष्टयानां संकलनमात्रमेव व्यनक्ति चार्वाकः। अतएवोत्पत्तौ तद्रहस्य बीजं वेत्तुं नैव मानवबुद्धिः शशाक। तस्मात् चार्वाकाणां सम्यक् प्रकारेण विज्ञापयितुं तद् विडम्बना मात्रम्। पृथिव्यादि चतुष्टय भूतानां सम्मिश्रणेनैव शरीरमुत्पद्यते। एवं शरीराद् व्यतिरिक्तः कोऽप्यात्मा नैव सन्तिष्ठते। चैतन्य मात्मनां धर्मः। किन्तु चैतन्यस्य सम्बन्धः शरीरेण विद्यमानतया शरीरमेवात्मेति मन्तुं ~~समुत्प~~ समुद्यतोऽभवति। शरीरचैतन्ययोः सम्बन्धः प्रकारत्रयेण प्रतिपाद्यते तद् यथाहि ——— (१)

विद्यमाने खलु शरीरे चैतन्यमुदेति। विनष्टे चैतन्यमपि वि~~नश~~ नश्यति। अन्नपानोपयोग वैलक्षण्येन शरीरे चैतन्यमुत्पद्यते। अतः चैतन्यं व्यवहर्तुं शरीरमेवापेक्षते नत्वात्मानम्।

"अहं स्थूलः" "अहं कृशः" इत्याद्यनुभवात्मक ज्ञानं जगतीतलेऽस्मिन् प्रतिक्षणमेव सम्पद्यते। तस्मात् स्थूलत्वस्य कृशत्वस्य च सम्बन्धः चैतन्येन सह शरीरे निष्पद्यते। वैद्यक शास्त्र प्रमाणान्याकलय्य चैतन्यस्य भौतिकेन सह संसर्गः नितरां सत्यमाभाति। ब्राह्मी घृतोपयोगेन संस्कृत कुमार शरीरे प्रज्ञा शक्तिः नितान्तमेधते। वर्षती सद्वा दृश्यन्ति अत्यल्पेनैव कालेन लघवः कीटाभावः प्रतिभान्ति। अमूनि ~~प्रमाण~~ प्रमाणानि नितरामासाद्य शरीरे चैतन्यमुत्पद्यते। तेन चैतन्य विशिष्टः कायः पुरुष इति देव गुरूणां सूत्रं युक्तियुक्तं प्रतिभाति। अस्मादेव कारणात् शरीरचैतन्य स्वीकारः तर्कसम्मतः। अयमेव चार्वाकाणां सुप्रसिद्ध चैतन्यवादः। यं खलु भूत चैतन्य वादं कक्षीकृत्य चार्वाकाणां घण्टाघोषः प्रसिद्धिमालभते। तथा चोक्तम्

जडभूत विकारेषु चैतन्यं यत्तु दृश्यते। (२)
ताम्बूल पूग चूर्णानां ~~योग~~ योगाद्राग इवोत्थितम्॥

तावदिदं विचिन्त्यतामत्र कथं भूतेषु चैतन्यमुपजायते? चार्वाकोऽयं लोकव्यवहारसिद्धानुभवमवलम्ब्योत्तरयति यत् मद शक्ति साधक द्रव्येषु नाममात्रमपि मादकता शक्तिर्नावलोक्यते किन्तु मयौ कुतः मादकत्वं समागच्छति। अनेनावगम्यते कस्यापि विशिष्टपदार्थस्य सम्मेलनेनावस्थाविशेषे विशिष्टोदयः नितरामौत्सर्गिकः। नहि तत्र कारणान्तरमपेक्षते। तस्मात् भूतस्य विशेषावस्थायां समष्टितया चैतन्योत्पत्तिः सुतरां स्वाभाविकी। किण्वादिभ्यो मद शक्तिवत् विज्ञानमपि प्रवर्तते। अतएव चैतन्योत्पत्ति विनाश साधनतया शरीरमेवात्मेति चार्वाकः। (३)

समीक्षा

(१) "चार्वाक दर्शन" "डा० रामनाथ"

(२) "वाल्मीकि"

(३) "षड्दर्शन समुच्चय" श्री हरिभद्रसूरि"

चार्वाकाणामात्मतत्त्वसन्दर्भे विभिन्नानि मतानि समुपस्थाप्यन्ते। तत्र केचनेन्द्रियाणां तद्रूपे मनसामेवात्मत्वं व्याचक्रुः। परमात्मनः सत्ता तु शब्दानुमानाभ्यां निष्पद्यते। भागवती श्रुतिस्तु एकस्वरेणैव व्याचक्षते यत् परमात्मतत्त्वमेव संसारोत्पत्ति स्थिति विनाशमूलम्। किन्तु श्रुतौ प्रामाण्यमनङ्गीकुर्वन् चार्वकः परमात्मनः सत्तां शब्दप्रामाणमाकलय्य मन्तुं नैव समुद्यतो भवति। किन्तु वैदिकदर्शनं अनुमानप्रमाणेनैव परमात्मनः सत्तां मनुते। यदि नाम घटः कार्यं विद्यते चेत्तदा तस्य कर्ता कुम्भकारोऽवगन्तव्यः। एवं रीत्या जगदपि कार्यं तदा तस्यापि कश्चिद् कर्ता विद्यत एव। नास्मदादीनां तत्कर्तृत्वं सम्भवति अनवस्थापातात्। परन्तु चार्वाकस्तु नानुमानस्य प्रामाण्यं भजते येन परमात्मनः सत्तापि स्वीकार्येति। तेन शब्दानुमानयोः मिथ्यात्वमङ्गीकुर्वन् चार्वाकः स्वभावादेव जगतः वैचित्र्यं प्रवर्तते इत्यभणत्। नातः परं चार्वाकाय शब्दानुमाने नितां नितान्तं वा काप्यपेक्षा। (१)

आदिकाव्यस्यायोध्याकाण्डे जाबालिर्नाम ब्राह्मणः रामं प्रतीत्थं नितान्तमाचचक्षे यत् स्वर्गोपमं राज्यं परित्यज्य कण्टकाकीर्णकठिनीकृतोऽयं पन्थाः नैव पुरुषार्थ्यं श्रेयस्करः। देवेन्द्रनन्दनवन विशालं नैसर्गिक सुखभोगलालसोपक्षणे नास्ति तव कृते सङ्कोच इति मौर्ख्यमेव तवाधियाम्। पितुः श्राद्धमुपपादयतां जनानां व्यर्थमेव प्रयासः। अतः परलोककल्पनां समुपकल्प्य श्राद्ध कल्पना जाल प्रसारस्तावत् धूर्ततामेव शोभते। प्रत्यक्षमुपेक्ष्य परोक्ष भावनाकलनमेव त्वादृक्षाणामेव शोभते।

किन्तु समुल्लिखित वचनेन जाबालिमहामुनेः सत्यपि चार्वाकानुयायित्वे रामं प्रति जगाद जाबालिः सत्यमिदं वचः तावकीनं शोभते राजन्। किन्तु त्वादृक्षाणामेव लौकिक सुखभोग लालसा पाण्डुरत्वं च कास्ति। (२)

यदि नाम वायवः शरीराणां चेष्टत्वमाकलयन्ति तदा व्यर्थमेव कल्पनं तदाऽऽत्मनः। शरीरे दावानलस्य प्रज्वलितांशः भुक्तान्नं पचति चेत् व्यर्थमेव कल्पनं तदात्मनः। पाञ्चभौतिक सङ्घाते विनष्टे कन्यां तावदात्मा कमनुधावति। अनेन कथोपकथनेन स्पष्टमाकलितं जायते यत् चार्वाकाणां विचारवैशिष्ट्यं सुतरां नितान्तमादिकाव्ये लोचनगोचरायते।

(३) हरिभद्रसूरिकृत षड्दर्शनसमुच्चयस्यान्तिमखण्डे चार्वाकमतानि प्राप्यन्ते। लोकायतिकानां विचारे नास्ति कोऽपि सर्वज्ञता सम्पन्नः। पृथिवीजलतेजोवायवः प्रत्यक्षप्रमाण संवलिताः। तत्रैव सङ्घाते चैतन्यमुपजायते। अतएव प्रत्यक्षप्रमाणमपास्यादृष्टादिकल्पनं नितां

(৭) " ব্রহ্মসূত্র শাঙ্কর ভাষ্য ভামতী " (অবতরণ প্রকরণ"
বাচস্পতি মিশ্র "

"অর্থশাস্ত্র" "কৌটিল্য"

मौर्ख्यमेव।

(१) ब्रह्मसूत्र शाङ्करभाष्य भामत्यां पूर्वपक्षतया चार्वाकाणां पूर्वपक्षः समुत्थापितः श्रीमद्वाचस्पतिमिश्रमहाभागैः। कौटिल्यस्यार्थशास्त्रेऽपि चार्वाकाणां पक्षः कौटिल्येन समुत्थापितः।(२)

एतावता चार्वाकाणां विचारपक्षस्य प्राचीनत्वं स्पष्टमेव। नात्र प्रेक्षावतां विचारभेदः।

अनेन चार्वाकाणां ज्ञानमीमांसां तत्त्वमीमांसामपि वस्तुगत्या समीक्ष्य स्पष्टं जायते नास्ति किमपि प्रत्यक्षातिरिक्तं वस्तु वीवर्ति। अनयैव पद्धत्या मानवजीवनकर्तव्यानि विशदं समीक्ष्य स्वसिद्धान्तं निर्ममौ।

विभिन्न दार्शनिकास्तु मानवमात्रेभ्यः धर्मार्थकाममोक्षप्रभृतीन् नितान्तमुपादेयतयाऽऽचचक्षिरे। एवं मानवमात्रेभ्यः नितरां पुरुषार्थतया प्रस्तुतविषयान् प्रत्यपादयन्। परं चार्वाकस्तु चरमपुरुषार्थाय नैव विश्वासयोग्यतां लभते। मीमांसकस्तु वेदविधानानुष्ठानं कर्तव्यतया समुपदिशति। तदेव मानवमात्रेभ्यः कर्तव्यम्। कर्यतु वेदप्रतिपाद्ययागाद्यनुष्ठानं सम्पाद्य शरीरवियोगानन्तरं जीवः पारलौकिकसुखं भुङ्क्ते।

परन्तु चार्वाकस्तु पारलौकिकसुखं नैव मनुते। अतएव पारलौकिकसुखस्य स्वर्गस्य प्राधान्यं स्वीकृत्य तन्मूलकविभिन्नक्लेशजालानि सदा समभ्युपगम्य तत्र द्रव्यव्ययतया यज्ञानुष्ठानसम्पादनमेव व्यर्थतामाकलयति। प्रस्तुतप्रसङ्गसन्दर्भमनुसृत्य चार्वाकः वैदिकयज्ञानुष्ठानं समालोचयामास। यज्ञानुष्ठानं शिक्षयद्भ्यः नितान्तमपशब्दं प्रायुङ्क्त। ते वचनमिदं नितरामाचक्षते यत् कपोलकल्पितपारलौकिकाभ्युदयाय जीवविशेषं निहत्य यागसम्पादनं शठत्वातिरिक्तं नान्यदीयं किमपि वस्तु वीक्षतीति।

ज्योतिष्टोमयज्ञे निहिताः पशवः वास्तविकं स्वर्गं प्रापयितुं क्षमन्ते चेत्तदा स्वयमेव कथं न हन्ति तं यजमानम्। यदि नाम कोऽपि महानुभावः तावदिदमाचक्षते खलु कृतं श्रद्धया श्राद्धं विलक्षणान्येव फलानि प्रयच्छति। एवं श्रद्धया कृतं श्राद्धं मृतजन्तवे तृप्तिं विधत्ते तदा प्रशान्तप्रदीपे तैलप्रदानं कथं न प्रकाशशिखां सम्पादयति। परन्तु नैतादृशी घटना क्वचिदपि समुपलभ्यते। तस्मात् प्रशान्तप्रदीपे तैलाधिक्य ~~प्रदाने~~ प्रदानेनापि तस्य ज्वालावलिः नैव कदापि वर्द्धते। एतावता स्पष्टोदाहरणेन मृतजन्तूनां तृप्तये श्राद्धकल्पना निराधारैव। दानादिकमपि स्वर्गस्थित पुरुषाणां नैव कदापि तृप्तिं जनयति। अमुया पद्धत्या श्राद्धादिविधानस्यानौचित्यं नैस

(ग) ।।-चर्वाक स्कूल ।।

सर्गिकमेव। अतः चार्वाकाः वेदविधानस्य मौर्ख्यं संसेद्धुं विविधानि दृष्टान्तानि समुपस्थापयन्ति। तस्मात्ते स्पष्टमाचक्षते किल धर्माधर्मौ निरर्थकावेव विद्येते। तत्फलकल्पनं दूरे जायताम्। तेन वेदविधानं प्रचण्डपाखण्डपण्डितानां वञ्चनकेलिलोलानां प्रलापमात्रमेव। अतः प्रत्यक्षमेव प्रमाणमिति घण्टाघोषः चार्वाकाणाम्। नात्र कश्चन विवादावसरः समुपसर्पति। तेन पारलौकिककस्यापि सुतरां वितथैव। तत् सुख कल्पनापि सुतरां व्यर्था। परपक्षप्रतिषेधकल्पनापरायणो हि चार्वाकः वेदविधानकल्पना पाखण्डनिरतानां वञ्चनकेलिलोलत्वमात्रमाकलयति। प्रतिक्लेशनिकेतनं तावदिदं भोगायतनं शरीरमेवोपजायते। यावत्कालपर्यन्तं शरीरमिदं वरीवर्तीति एवं विभिन्नप्रकारकसंकटजालानि नितरामाकलयन् जीवः नितरां सदा प्रवर्तत एव। अतएव देहपतनानन्तरमेवात्यन्तिक दुःखनिवृत्तिः बोभवीति। तेन मरणमेवापवर्गः। एतादृश ~~विलक्षण~~ विलक्षणमोक्षावस्थायां जीवस्वरूपमासादयति। अतएव——

"आत्मनः स्वरूपेणावस्थितिर्मोक्षः" इति प्रतिपादनमपि पाखण्डनिरतानामेव शोभते। चार्वाकाणां विचारदर्शने नैतादृशं वचनं समुपपद्यते। यतो हि देह एव तावदात्मा। तदनन्तरं सञ्जाते देहपाते ऽस्मिन्नात्मतत्त्वाभावे नैव कस्यापि स्वार्थं लभते कोऽपि।

यदात्मा देहपातानन्तरं विनश्यति तदा स्वस्वरूपे स्थितिमत्त्वं कथं को वा प्राप्नुयात्। तेन कस्यापि नित्यपदार्थस्य सत्त्वं नैव मनुते चार्वाकः। अतएवेयं मुक्तिः नितरां भ्रममूला। तेन चार्वाकाणां विचारे किन्तावज्जीवनलक्ष्यं सन्तिष्ठते। अर्थकामावेव तेषां लक्ष्यतया परिगणितौस्तः। काम एव प्रधानपुरुषार्थः। तेनार्थोऽपि परमपुरुषार्थ एव।

अतएव समेषां कृते जीवनोद्देश्यं तावदैहिकसुखमेव। लौकिकसुखं जीवनस्य चरमलक्ष्यं तस्य प्राप्तिः नितरामर्थकामाभ्यां जायते। तस्मादर्थकामावेव पुरुषार्थौ विद्येते।

चार्वाकाणामाभाणकं सार्वजनीनमाभाति। तेन यावज्जीवेत् सुखं जीवेत्। द्रव्यविरहावस्थायामपि केनाप्युपायेन द्रव्याण्यादाय घृतं पिबेत्। महतानन्देन भोगविलासमाकलयन् आपूपकं भक्षयेत्। ऋणपरावर्तनचिन्तासन्तानवितानमपि चेतः नैव दुनोति। भस्मीभूते शरीरे जीवकल्पना सुतरां प्रमाणरहिता। तेन चार्वाकाणा ~~माभाणकं~~ माभाणकं लोके सुतरां प्रसिद्धिमावहति।

यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥ (७

(१) ''चार्वाक दर्शन'' वलदेव उपाध्याय''

(२) कौटिल्य अर्थशास्त्र''

(३) वर्णिका भागुरी लोकायतस्य'' पातन्जल महाभाष्य''

तस्माद् मुदितमनसा भोजनं भुज्यताम्। घृतं निपीयताम्। विषयभोगलालसया नितरां भोमुज्यताम्। कान्ताकुटिलकाटाक्षलोलापाङ्गेनोपरम्यताम्। इदमेव जीवानां चरमलक्ष्यम्। दुःखास्पदतया नैव सुखं त्याज्यम्।

कण्टकाच्छन्नमत्स्यान् कण्टकपरिहारसुखेनादत्ते। तथा पलालपरित्यागसुखेन धान्यान्यपि नितान्तमादत्ते। अनयैव मर्यादया दुःखास्पदसुखमपि दुःखपरित्यागेन स्वीकार्यम्। अतएव दुःखभयादेव सुखानां परित्यागः मूर्खाणां सिद्धान्तः। किं जगतीतलेऽस्मिन् मृगाः सन्तिष्ठन्ते किं तेन व्रीहयः नोप्यन्ते। भिक्षुकाः विद्यन्ते तदा स्थाल्यो नाधिश्रीयन्ते। दुःखोपसृष्टं विषयसंयोगोत्पन्नं सुखं किं परित्याज्यम्। ~~किं तुषोप~~ किं तुषकणोपहितान् व्रीहीन् जिहासति हितार्थी। अस्मादेव कारणात् सभोगविलासं वाञ्छन् मनुष्यः सर्वदा सुखप्राप्तये तमेवान्विषति। तस्मात् तदर्थं महता प्रयासेन भवितव्यम्। नरकस्वर्गावपि धरायामेव विद्येते। सुखानां प्राप्तिः स्वर्गः दुःखानां प्राप्तिरेव निरयः। तेन सांसारिकसुखवाद एव चार्वाकानुसारं समेषां प्रधानो ह्येयम्।(१)

पौरस्त्य दर्शनस्येतिहासे विशुद्धभौतिकवादात्मकदर्शनं चार्वाक ~~नाम्ना~~ नाम्ना व्यवहृतम्। दर्शनमिदं बार्हस्पत्यमाचक्षते। भौतिकदर्शनं तदेव विद्यते यस्मिन् संसारस्य मूलभूततत्त्वानि जडात्मकान्येव प्रतिपादितान्येव विद्यन्ते। भौतिकवादिनः जडतत्त्वात् भिन्नं किमपि चेतनतत्त्वं नाङ्गीकुर्वते।

हिन्दुदर्शनपरम्परानुसारं स एव नास्तिकः यस्तावत् वेदे प्रामाण्यं नाङ्गीकुरुते। चार्वाकाणां विचारपक्षप्रतिपादनाय नास्ति कोऽपि स्वातन्त्र्येण ग्रन्थः समुपलभ्यते। परन्तु भारतीयदर्शनसाहित्ये चार्वाणां पूर्वपक्षः प्राप्यते सोऽपि प्रायः बृहस्पतिनाम्ना प्रचलितः।

चार्वाकाणां विचारोल्लेखस्तु प्राचीनसाहित्यस्य कतिपयस्थाने नितरां समागतोऽस्ति। कौटिल्यस्यार्थशास्त्रेऽपि लोकायतपक्षस्य चर्चा तर्कमूलकदर्शनेन सह समागच्छति। अतएव— (२)

॥सांख्यं योगः लोकायतं चेत्यान्वीक्षिकी॥ ~~स्मद~~ प्रस्तुतदर्शनप्रतिपादयिता बृहस्पतिः लोके महतीं ख्यातिं प्राप। अतएवेदं बार्हस्पत्यसूत्रं बृहस्पतिसूत्रं वेति प्रतिपादयति।

भागवतः पतञ्जलेः महाभाष्यस्य भागुरीनाम्नि टीकायां लोकायतपक्षस्योल्लेखः नितरां दृश्यते। तत्राच महाभाष्यम् - (३)

एवं प्रबोधचन्द्रोदयनाटकस्य द्वितीयेऽङ्के इत्थमभणत् यत् खलु बृहस्पतिः स्वसूत्रं निर्माय चार्वाकायादासीत्। तस्य विस्तृत

(१) "प्रबोध-चन्द्रोदय"

"तत्त्वोपप्लव" "शान्तिरक्षित"

"कठोपनिषद्" "१-२६"

"शाङ्कर भाष्य भामती"

व्याख्यानं कृतवान् चार्वाकः। तद्ग्रन्था वाचस्पतिना प्रणीय चार्वाकाय समर्पितम्। तेन शिष्योपशिष्य द्वारेण बहुली कृतं तन्त्रम्।(१)

शान्तिरक्षित तत्त्वसङ्ग्रहे पुरन्दरनाम्नः विचारकस्य नितामुल्लेखः लोचनपथे पथिकायते। अनुमान प्रामाण्यस्य व्यावहारिक सत्तां स्वीचकार। अनेके विद्वांसस्तु वचनमिदं प्रतिपिपादयिषन्ति यत् किल तत्त्वोपप्लवनाम्नि ग्रन्थे तत्पक्षमाकृष्य नितान्तं वैशद्येनावर्णयत्।(२)

ऋग्वेदेऽपि चार्वाकाणां विचारपक्षस्योल्लेखतया तस्यप्राचीनत्वं प्रत्यक्षसिद्धमेव। तथाच ——

न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे॥ (३)

एतावता वाक्यप्रबन्धेन स्पष्टमाकलितं जायते यच्चार्वाकाणां दर्शनस्य प्राचीनत्वं युक्तियुक्तम्। तथाच ——

"नचाहं कृशः स्थूलो गच्छामीत्यादि देहधर्म सामानाधिकरण्यदर्शनात् देहावलम्बनोऽयमहङ्कार इति साम्प्रतम्" (४)

तेन चार्वाकाणां विचारपक्षे नैव नित्यात्मवादावसरः समापतति। तेषां सिद्धान्तास्तु इत्थमवगन्तव्याः:—

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता॥
पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते॥
मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम्॥
~~गेहस्था~~
गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्।
गेहस्थकृतश्राद्धेन पथि तृप्तिरवारिता॥
स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।
प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते॥
यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिवेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥
यदि गच्छेत् परं लोकं देहादेव विनिर्गतः।
कस्माद् भूयो न चायाति बन्धुस्नेहसमाकुलः॥

(ब) "चार्वाक्य दर्शन सूत्र" "माधवाचार्य"

"चार्वाक दर्शन" डा. "देवराज"

"अनुमानप्रामाण्यव्यव

ततश्च जीवनोपायो ब्राह्मणौ विहितास्त्विह।
मृतानां प्रेतकार्याणि नत्वन्यद् विद्यते क्वचिद्॥
त्रयो वेदस्य कर्तारो भण्ड धूर्त निशाचराः।
जर्भरी तुर्फरीत्यादि पण्डितानां वचः स्मृतम्॥
अश्वस्यात्र हि शिश्नं हि प्र पत्नी ग्राह्यं प्रकीर्तितम्।
भण्डैस्तत्परं चैव ग्राह्यजातं प्रकीर्तितम्॥
मांसानां खादनं तद्वन्निशाचरसमीरितम्।
चतुर्भ्यः खलु भूतेभ्यः चैतन्यमुपजायते।
।किण्वादिभ्यः समेतेभ्यः द्रव्येभ्यो मदशक्तिवत्॥ (१)

एभिश्चार्वाकसूत्रैः वैदिकदर्शनानि नितान्तमसत्यसंवलितानि प्रतिभान्ति। स्वर्गापलोककल्पाप्रलापः धूर्तानामेव शोभते। पौरस्त्यदार्शनिकानां ज्ञानराशिर्वेदः नितान्तपाखण्डनिरतानां कपोलकल्पनामात्रम्। वेदविधानसम्पादनचतुराणां वञ्चनकेलिलोलानां यज्ञानुष्ठानं वञ्चनमात्रमेव। ज्योतिष्टोमयज्ञीयपशुवधविधानजायमानस्वर्गादिकल्पनायाः नितान्तमनौचित्येन वेदस्याप्यनौचित्यम्।

गृहस्थकृतश्राद्धानुष्ठानमपि नैव तृप्तिप्रयोजकम्। अन्यथा गच्छतां जन्तूनां पाथेयकल्पनमपि निस्सारमेवेति चार्वाकपक्षः। तस्मात् प्रेतकृत्यानि व्यर्थतामाकलयन्ति। जर्भरी तुर्फरीत्यादि शब्दान् वेदे पर्यालोच्य वेदस्य धूर्तपण्डितप्रलापालपितत्वेन नास्ति वेदे प्रामाण्यम्।

~~अश्वशिश्न~~ अश्वशिश्नस्य पत्नीग्राह्य विधानसम्पादनमवेक्ष्य तत्कर्तृत्वं भण्डानां शोभते। तस्मात् चतुर्भ्यः भूतेभ्यः शरीरे चैतन्यं स्वाभाविकमेव। समेतेभ्यः ~~किण्वेभ्यः~~ किण्वादिभ्यः द्रव्ये मदशक्तिवत् शरीरे चैतन्योत्पत्तिः नितरां नितान्तं श्रेयसीति चार्वाकः। नातः परं शरीरादतिरिक्तः कोऽप्यात्मा नैवाऽऽस्ति। अनावश्यकत्वात्। प्रमाणतर्काभ्यां शून्याच्च। तर्हि व्यर्थमेव कल्पनं विभिन्नदार्शनिकसम्मतात्मवादस्य। तेन चैतन्यविशिष्टः शरीरमेवात्मा। शरीरविनाश एवापवर्गः। नातः परं किमपि तत्त्वं विद्यत एव। (२)

स्थापनम्॥ परन्तु ब्राह्मणबौद्धजैनदार्शनिकाश्चार्वाकमतानि छेत्तुं सततं प्रयतमानाः लोचनपथे पथिकायन्ते। नहि प्रत्यक्षप्रमाणमाकलय्य लोकाचाराः तं संसेद्धुं क्षमन्ते। यदि केवलं प्रत्यक्षप्रमाणमनुते ~~मन्यन्ते~~ चेत्तदा परगृहस्थितस्य वस्तुनः लोचनागोचरतया तेषां सत्त्वमपाकृतं स्यात्। देशान्तरगते स्वामिनि तस्याभावं निरीक्ष्य स्वालेनः वैधव्यमङ्गीकर्तुं नैव कापि समुद्यता भवति। अतएवाना

८

यं व्यवहारः लोकसम्मतः। तत्रानुमानप्रमाणाभावविशिष्टं प्रत्यक्षं पङ्गुत्वं लभते। प्रत्यक्षस्यापि प्रामाण्यमाकलयितुं तदा कोऽपि क्षमते यदानुमानस्य प्रामाण्यं प्रतिपद्येत। अन्यथा सत्यपि प्रत्यक्षे लोकसिद्धव्यवहारस्य व्याघातापातः केन वार्येत। अतः प्रत्यक्षप्रामा~~ण्यायानुमा~~ण्यायानुमानस्यापि प्रामाण्यमभ्युपेयम्।

एवं कस्यचिन्महोदयस्य सत्त्वेऽपि गृहे तदभावदर्शनेन बहिःसत्त्वमनुमानेनावगन्तव्यम्। चैत्रस्य क्वचित् सत्त्वेनापि तस्य गृहासत्त्वं कल्पयितुं शक्यम्। अतएव गृहाभावस्य बहिःसत्त्वे हेतुत्वात्। चैत्रस्य गृहासत्त्वेन नैव बहिःसत्त्वं कल्प्यम्। प्रतीतिविरोधात्। यस्य वस्तुनः क्वचिदपि सत्त्वं प्रतीयमानतया तद्देशावच्छेदेन तदसत्त्वमपि प्रतीयेत। न सत्त्वासत्त्वेन विरोधशङ्कालवलेशम्। तस्मात् प्रत्यक्षप्रमाणोपपत्तयेऽनुमानस्य प्रामाण्यमङ्गीकर्तव्यम्। नान्यथा प्रत्यक्षस्यापि प्रामाण्यवैकल्यं समापद्येत।

नानुमानप्रामाण्यमन्तरा प्रत्यक्षस्य प्रामाण्यमाकलयितुं क्षमते कोऽपि कस्यामप्यवस्थायाम्। तेनानुमानस्य प्रत्यक्षमूलकत्वात् लोकव्यवहारसम्पादकप्रागल्भस्य प्रत्यक्षस्य प्रमाणमूलकत्वेनैवानुमानस्य प्रामाण्यं प्रतिपन्नमेवेति श्रेयान् पन्थाः।

कमपि बालं लोचनगोचरीकृत्य तन्नेदीयस्यो तज्जनकासत्त्वस्य प्रत्यक्षतयाऽपि तज्जनकौ नितरामनुमेयौ। प्रत्यक्षप्रमाणमाकलयता चार्वाकेणाऽपि नानुमानप्रामाण्यमन्तरा प्रात्यक्षिकं व्यवहर्तुं नितरामशक्यमेव। तस्मात् प्रात्यक्षिकव्यवहारोपपत्तयेऽनुमानमेव शरणम्। गीर्वाणगुरूणां सहस्रेणापि अनुमानाप्रामाण्यमासेदयता प्रात्यक्षिकोपपत्तये तदिति वक्तुमशक्यत्वात्।

भूतानां चिद्वादोऽपि नानुमानप्रामाण्यमन्तरा निरायासं रक्षक्षुव नैव स्थातुं शक्नुयात्। चार्वाकाणामाद्यासिद्धान्तेन सामाजिकानां पक्षः वैशद्येन नितान्तमस्तव्यस्ततामाकलयेत्। अतः चार्वाकाणां सिद्धान्तः महत्या मार्मिकपद्धत्या विद्वद्भिर्नितरांच्छिन्नः। प्रसङ्गेऽस्मिन् वचनमिदं तावदवगन्तव्यं यत् बार्हस्पत्यसूत्रे नितरामुच्छृङ्खलजीवनस्य चित्रणं क्वचिदपि नैव समुपलभ्यते। यद्यपि गीर्वाणगुरुः चक्रवत् परिवर्तमाने जगतीतले विज्ञापयितुं वैज्ञानिकीं पद्धतिं स्वायत्तीचकार। तेषां व्याख्यानपरिपाटी वैज्ञानिकव्याख्यानुरूपा। तथाप्यनेके दार्शनिकाः लोकानुरञ्जनचतुरोपदेशान् चार्वाकाणां शिरसि निधाय भौतिकसुखवादमाचचक्षिरे। किन्तु वास्तविकीयं वार्ता भिन्नैवास्ते। अतएव तदपो

विद्वांसस्तु ~~तद्विपरी~~ तद्विपरीतमेव भाषन्ते यन्नायं सिद्धान्तः चार्वाकाणां किन्तु पाश्चात्तनीयाः विद्वांसः तान् सिद्धान्तान् व्याख्याय स्वेच्छया चार्वाकाणां विचारपक्षे सदा चिक्षिपुः।

अस्मादेव हेतोः प्रकाश्यास्यै चार्वाकान् निनिन्दुः विभिन्नदार्शनिकाः। अयं खलु निन्दाप्रबन्धः नितरां वास्तविकः नात्र सन्देहावसः प्रसर्पति। एतेषां मूलाधारोऽपि तावदाचारमीमांसा। यस्मिन् दर्शने धर्मश्रेयसोः किञ्चिदपि स्थानं नैवाऽस्ति। एवं पापपुण्ययोः किञ्चिदपि महत्त्वं नावलोक्यते। स्थूलात्मकोऽयं भौतिकसुखवादः मानवमात्रेभ्यः परमपुरुषार्थ एव। नहि तादृक् दर्शनं मानवजीवानां प्रकीर्णरहस्यकन्दानि समाधाय तेभ्यः महान्तमादर्शस्य पन्थानं स्रष्टुं शक्ष्यतीति समेषां दुराशामात्रम्।

अस्मादेव हेतोः चार्वाकाणां मतानि परीक्षितुं नितरामावश्यकमेव। चार्वाकाणां विचारपक्षे भ्रमपूर्णतर्कजालप्रावृट्जलदपटलमलीमसत्वं नैसर्गिकम्। अतएव तत्र दोषावतारः नितामपरिहार्यः। तथापि तद्विचारपक्षवैशिष्ट्याऽऽकलनं सर्वथौचितमेवाऽऽभाति। अनेन चार्वाकाणां विचारपक्षस्य सर्वांशे भ्रमत्वं नैव तर्कसम्मतम्। तेषां व्याख्यानपरिपाटी क्वचिद्देशे विद्यते साधीयसी तथापि पौरस्त्यात्मवादसम्मतपक्षे तत्कृत-विचारचर्चा नितरां वैज्ञानिकी तर्कहीनेति भान्यानां विचारसरणिः।

चार्वाकाणां ज्ञानमीमांसायाः वैशिष्ट्यमिदमेव यदाप्तवचनेषु नितान्तम~~श्रद्धैव~~ श्रद्धैव। गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा। सा खलु विशिष्टसिद्धान्तं जनयति। कस्यापि विशिष्टसिद्धान्तस्य सृष्टिस्तु तर्केणैव प्रभवति।

वास्तविकमविश्वासस्तु कस्याप्यन्धविश्वासापेक्षया दार्शनिकसिद्धान्तं समीक्षितुं मूल्याधिक्यमाकलयति। आप्तवाक्यव्यामोहोद्भ्रान्ता स्वतर्कप्रधानप्रज्ञासाहाय्यमाकृष्य नैव किमपि दर्शनमुदेति। वास्तविकं तर्कोपयोगित्वं प्रदर्श्य चार्वाकाः भारतीयविचारकाय मनोरमपन्थमुत ससर्ज। अनुमानप्रामाण्यं व्यवस्थापयन् चार्वाकः नितरामनवस्थादोषोद्धारनं यथा तार्किकपद्धत्या कृतवान् तां पद्धतिं साम्प्रतिकाः पाश्चात्याः परीक्षितुं तावदागमनानुमानेन स्वीचक्रुः। ~~आगमाना~~ आगमनानुमानं निश्चेतुं व्याप्तिवाक्यस्य सत्यत्वं सुतरामपेक्षते। अतएव समस्तमानवेषु मरणशीलत्वसत्तायाः व्यापकत्वं निश्चेतुं नैव कदापि क्षमते ~~अत~~ अतस्तावत् सन्दिग्ध वाक्यमवलम्ब्यागमनस्य प्रामाण्यमाकलयितुं नैव शक्नुयात्। अनया तर्कप्रणाल्या सह चार्वाकाणां तर्कप्रणा

"नराणान्च नरेन्द्रोऽहम्" "गीता" (१)

(२) "कालीदास"

(३) "शुक्रनीतिः"

(४) "लौकिक मार्गोनुसर्तव्यः"

ली समत्वं स्वीकर्तुं तत् प्रतिपादनं समीचीनमेव।

एवं प्रकारेण चार्वाकः लौकिकसुखमय जीवनस्य कौशलं सृष्ट्वं समेषां चेतांसि नितान्तमाकृष्य विलक्षणपद्धतिं जनयामास। आचार्यप्रवरोऽयं बृहस्पतिः सदाचारशास्त्रं प्रणीय नियमबद्धतयोच्छृङ्खलतामपहाय तज्जीवनसम्पादनपद्धतिं निर्ममौ। मानवजीवनस्याभ्युदयः समाजाभ्युदयमन्तरा नैव कदापि सम्भवति। अतः मानवानां कर्तव्यं यत् समाजानुकूल तथैव स्व जीवनं निर्मातव्यम्।

संसारस्य कल्याणाय समाजस्यानुकूलतया सञ्चालनं परमावश्यकं मत्वा सैव पद्धतिः नितरां स्वीकार्या। अतएव चार्वाकः मानवसमाजस्य नितरामनुशास्तुं राज्ञः परमेश्वरत्वमकल्पयत्। तस्मान्निग्रहानुग्रहकर्तृत्वेन राजा तावदीश्वरः। तेन चार्वाकोऽयमिदमाचक्षते यत् दण्डविधानसम्पादनतयैव मानवाः नैव पशुत्वमाकलयन्तु इत्यतो दण्डविधानस्यौचित्यं नितरां स्वीकृतम्।

अनेनैव हेतुनोच्छृङ्खल जीवनं प्रशमयितुं राजदण्डस्यौचित्यं तर्कसम्मतमेव। अतएव नियमबद्ध सामाजिकजीवनादर्शं परिकल्पयितुं परमेश्वरत्वमाकलयाम्बभूव राज्ञः चार्वकः।(१) आधिभौतिकसुखवादं परिकल्पयन् चार्वाकः मानवानां विशृङ्खलत्वमपाकर्तुं प्रात्यक्षिकदण्डविधानमेव हृदयेन स्वीचकार। प्रत्यक्षानुभूते पारलौकिकसुखे स्वकीयबहुमूल्यशरीरवैयर्थ्यमपाकर्तुं समेषां मानवसमाजानां पुरतः प्रात्यक्षिकसुखमेव नितरामुपदिदेश।

तेषां सामाजिकपक्षस्य व्यवहारमर्यादां कवलीकृत्य तत्प्रतिपादितमार्गस्य व्यवस्थापनं सर्वेभ्यः न्यायसङ्गतमेव। वास्तविकं तु सामाजिकव्यवस्थायाः नियमबद्धतामाकलयितुं राज्ञानुशासनं परमावश्यकं प्रतिभाति।(२)

चार्वाकाणां विचारे एकैव खलु प्रधानविद्या दण्डनीतिः। एवमपरा वार्ता नाम्नी विद्या। या खलु तत्रैवान्तर्भवति। ~~द~~ दण्डविद्यायाः तात्पर्यं केवलं राजशास्त्रमेव। कृषिवाणिज्यं वार्तात्मकविद्यान्तर्गतम्। अस्मादेव कारणात् प्राचीनकालादेव सर्वासु विद्यासु दण्डविद्या वार्ता च विद्या प्राधान्यमाप्नुते।(२) कौटिल्योऽपि सूत्रमिदमुल्लिलेख। अयमेव बृहस्पतिः किं चार्वाकाणां सिद्धान्तं प्रणिनाय। आहोस्वित् कोऽप्यन्यः। चार्वाकाणां लौकिकमार्गानुसरणमेवाभीष्टम्।(३)

बहुजनहिताय बहुजनसुखाय मार्गः चावाकाणां शोभते। अस्मादेव हेतोः चार्वाकाणां विचारसरणिः लौकिकमार्गमनुसर्तुं समुद्यता जायते। भारतीय दार्शनिकविचारपक्षमासाद्य वास्तविकं चार्वाकः

(१) नास्तिको वेदनिन्दकः॥ - मनुः॥

॥ भारतीय दर्शन ॥ ॥वलदेव उपाध्याय॥ २

॥ भारतीय दर्शन॥ ॥डा॰ देवराज॥ ३

समग्रतया नास्तिक एव। नहि चार्वाकः वेदं मनुते। अतएव ते प्रत्यक्षवादिनः। यस्तावदिन्द्रियागोचरपदार्थं नैवाङ्गीकुरुते। इन्द्रियगोचरतया सर्वे विषयाः प्रामाण्यतया स्वीकृताः। अनेन प्रकारेण सामाजिकपद्धत्या भौतिकसुखं स्वीकुर्वता चार्वाकेण तदेव प्रामाण्यं स्वीकृतम्।

सर्वत्र वैदिकेन चार्वाकः निन्दितः। नैव किन्तु केवलं नितान्तास्यं प्रकाश्य प्रशंसाभाजनत्वं स्वीकर्तुं क्षमते कोऽपि। नैतावता वाक्येन कदापि चार्वाकाणां सामाजिकी व्यवस्था तिरस्करणीया। न च तदान्तिक विद्यमान तथ्य रहस्यं नावहेलनीयम्।(१)

वास्तविकं च वचः प्रतिभाति यत् प्राचीनकाले चार्वाकोऽयं भारतीय दर्शने नितरां वैज्ञानिकः। एतेषां पदार्थनिर्वचनपरिपाटी नितान्तं वैज्ञानिकी वर्ततीति। स्वपदार्थप्रतिपादनपद्धतिं वैज्ञानिकपद्धत्या तर्कनिकषे ~~सं~~ सम्परीक्ष्य प्रामाण्यं मनुते। विश्लेषणात्मकपद्धत्या सर्वान् विश्लिष्य सूक्ष्मानुधावनं यावत् तत्परिकल्प्य तदनन्तरमेव किमपि निर्णेतुं यतते। नहि केवलमन्धविश्वासपरिपाटीमाकलय्य तं पक्षं स्वीकर्तुं समुद्यतो भवति। नैतावद् वचनसन्दर्भसौन्दर्यं कस्मिन्नपि वाक्ये विश्वासयोग्यतामवाप्नोति। चक्षुषी हस्ताभ्यामाच्छाद्य नहि केषां वचनस्वीकारपरिपाटी मान्यत्वीकृता चार्वाकेण।(२)

अतएव वेदविरुद्धपक्षमपि कक्षीकृत्य स्वतार्किकप्रतिभावैचित्र्यबलादेव वैज्ञानिक विश्लेषणप्रणाल्या वचनमिदमभ्युपगम्य प्रस्तुतविचारपक्षान् आकलयामास। परन्त्वाधुनिकवैज्ञानिकापेक्षयाऽयं चार्वाकः नितान्तं संयमशीलः। कथ्यते वैज्ञानिकानां कृते नाचारव्यवस्था लोकाभ्युदयाय बोभवीति। वैज्ञानिकास्तु मानवानां व्यावहारिकजीवने नैतिकविचाराचाराणां महत्त्वं नैव कदाचिदपि स्वायत्तीचक्रुः।

ते जडवादपक्षं नितरामासाद्य भौतिकवासनया स्वात्मानमभिषिच्य न केवलं पारलौकिकसुखमत्याक्षुः किन्तु लौकिकव्यवहारमर्यादायां समावश्यकचारित्रिकव्यवस्थामपि चिच्छेदुः। संसारोत्पत्तौ वैदिकमर्यादामपास्य जडात्मकपद्धतिं कक्षीकृत्य केवलं पाशविकजीवनमेव शरणीकृतम्।

काल मार्क्सोऽपि चार्वाकस्य नैतिकजीवनादर्शं नैव स्वायत्तीकृत्य केवलं भौतिकसुखानुसन्धानतत्परतामादाय समाजस्य प्रतिव्यावहारिकक्षेत्रे तस्य सत्तां स्वायत्तीचकार। तेषां पाशविकविशृङ्खलितजीवनपरिपाटीं करतलीकृत्य परमालम्बनः सत्त्वमुच्छेत्तुं स्वप्रतिभावैशिष्ट्यं प्रादर्शयत्। काल मार्क्सोऽपि सामाजि-

(व) "मा हिंस्यात् सर्वा भूतानि" "वेद"

"वाचस्पति मिश्र"

क वैषम्यमपाकर्तुं नितरामपि वाञ्छन् तन्मौलिकतत्त्वमन्वेष्टुं नैव प्रायतत। किन्तु तस्य वाह्यपक्षं समीक्ष्य तन्निषेधमुखेनैव सर्वान् व्याख्यातुं समुद्यतो भवति। तद्विचारपक्षस्य मौलिकभेदं निराकर्तुं विभिन्ना वैज्ञानिकाः प्रयासनिरताः विद्यन्ते।

परन्त्वयं चार्वाकः वैज्ञानिकानामपेक्षया स्वजीवनप्रणालीं तद्विलक्षणामेवाऽकल्पयत्। अनेनैव हेतुना तेषां विचारपक्षे नैतिकजीवनमहत्त्वं ~~हृदयेनाभ्यु~~ हृदयेनाभ्यनुज्ञाय संयमितजीवनमेवाऽऽकलयामास।

अतएवायं महान् चार्वाकः वेदोपनिषद्स्मृतिपुराणेतिहासग्रन्थान् स्वानुभववैशद्येन समीक्ष्य तन्निषेधवचसा स्वीकारवचसा वा सर्वान् समवधाय तिरस्कृत्य वा तद्विलक्षणामेव निर्वचनप्रणालीं प्रकटीचकार।

चार्वाकोऽयं ऋणं कृत्वा पयो भुङ्क्ष्व न तु मध्विति समादिदेश। एतावता मधुपानं प्रतिषिद्धम्। भावविधानसमागतहिंसाप्रतिषेधवचनस्य समभ्यर्हिततया तदेव वचनमुरीकृतम्।(१) अतएव सौम्यसमाजे तिष्ठन् नितान्तं समुन्नतिं कामयते। नान्यथा कोऽपि समाजः स्वाभ्युदयं विधातुं क्षमते। स्वदुरवस्थामपाकर्तुं सदा श्रेयान् मार्गः समभ्युपगन्तव्यः। एतावता चार्वाकाणां सिद्धान्तः सर्वथाऽप्रामाणिक एवेति नैव वक्तुं शशाक।

प्रत्यक्षमङ्गीकुर्वतां चार्वाकाणां कृते नैवानुमानस्य प्रामाण्यं समावश्यकमिति मत्वाऽनुमानमुच्छेत्तुं सर्वथा तत्परोऽयं केवलं प्रत्यक्षमेव प्रमाणं ब्रूते। प्रत्यक्षमूलकानुमानं प्रतिषेद्धुं स्वचातुर्यं प्रकटयन् यद्यनुमानं नैवानुमन्यते तदा प्रत्यक्षेऽपि सैव गतिः समापतेत्। तस्मादनुमानस्य प्रत्यक्षमूलकत्वात् तदेव प्रत्यक्षमुपपादयितुं सर्वदाऽनुमानस्यापि प्रामाण्यमभ्युपेयम्।

जैनबौद्धादयोऽपि प्रत्यक्षमूलकतयैवानुमानं भजन्ते तावत्। यावत् कालं नानुमानं मन्येत न तावत् कालं प्रत्यक्षपरिकलितमप्यर्थं स्वीकर्तुं शक्नुयादिति निश्चयं प्रत्येमि। तेन प्रत्यक्षस्य प्रामाण्यमुपपातुं समेषां कृते प्रयासस्यावश्यकत्वमवगच्छति चेत्तदाऽनुमानस्यापि प्रामाण्यं स्वीकार्यमेवेति व्यवहारसिद्धोऽयं पन्थाः स्यादित्येव धारयामि।

प्रत्यक्षप्रमाणवादिना चार्वाकेणानुमानखण्डनावसरेऽनवस्थादोषसमाच्छन्नां व्याप्तिमाकलय्यानुमानमुच्छेत्तुं यदभ्यधायि यदविनाभावो व्याप्तिः नितरां दुर्बोध ~~इति~~ इत्यतिस्वल्पीयः। तादात्म्यतदुत्पत्तिकार्यकारणाभ्यामविनाभावस्य सुज्ञेयत्वात्। तथाच ——(२)

''प्रमाणवार्तिक'' ''व्याप्तिपरिच्छेद'' ''धर्मकीर्ति''

(२) उ~~द~~ ''उदयनाचार्य'' ''न्यायकुसुमाञ्जलिः''

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्॥ (७)

प्रमाणवार्तिके व्याप्तिपरिच्छेदे धर्मकीर्तिः व्याजहार यत्— कार्यस्य स्वभावस्य च लिङ्गस्याविनाभावः साध्यधर्मं विना ~~[illegible]~~ नैव जायते। शिंशपावृक्षयोः तादात्म्यदर्शनात्। अविनाभावनिश्चायकौ अन्वयव्यतिरेकौ विति पक्षमाक्षिपति धर्मकीर्तिः यन्नहि तावदन्वयव्यतिरेकेण साध्यसाधनयोः व्यभिचारः दुर्वारणः। भूतभविष्यत् वर्तमानकालेषु अनुपलभ्यमानार्थेषु च व्यभिचारशङ्कायाः निवारणाभावात्।

नन्वत्र तथाविधस्थले भवन्मतेऽपि दुष्परिहर्तव्या खलु व्यभिचारशङ्केति चेत् सत्यम्। कारणमन्तराऽपि कार्यं जायतामि तच्छङ्कायाः व्याघातावधिकत्वेन निवृत्तत्वात्। तदेवाशङ्कनीयं यस्मिन्नाशङ्क्यमाने व्याघातादयो न समागच्छेयुः। अतएव—

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशंका तर्कः शङ्कावधिर्मतः॥ (८)

देशान्तरे कालान्तरे वा साध्यसाधनयोः सञ्जाते व्यभिचारे तदनुमास्त्येव। न चेच्छङ्का चेत् का हानिः किन्तु प्रमोद एव। कथं तु शङ्कायाः व्याघातावधिकत्वात्। अतएव तावदेवाऽऽशङ्क्यं येन ~~प्रवृत्ति व्या~~ प्रवृत्तिव्याघातो न भवेत्।

तस्मात् कार्यकारणभावाभ्यां अविनाभावो व्याप्ति निश्चीयते। तदुत्पत्तिनिश्चय कार्यकारणयोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनत्वात्। अनेनैव पञ्चकनिबन्धनेन धूमधूमध्वजयोः कार्यकारणभावस्यैव गमकत्वात्। नहि धर्मकीर्तिमहोदयस्येदं पञ्चकनिबन्धनं किमपि वैशिष्ट्यमावहति। किन्तु अन्वयव्यतिरेकौ व्यालोड्य पञ्चकनिबन्धन पद्धतिं समुपपादयत्।

नैयायिकास्तु पञ्चावयववाक्येनैव तं व्यवस्थापयन्ति। तदपि च प्रमाणेनाभ्युपेयम्। अन्यथा तस्यैव वैकल्यं समापतेत्।

यद्यत्र चार्वाकः नानुमानस्य प्रामाण्यं स्वीकुर्यात् तदा तं प्रति ब्रूयात् यदनुमाने प्रामाण्यं नाङ्गीकरोत्येतावन्मात्रं स्वीकुरुते आहोस्वित् ~~[illegible]~~ तत्राप्रामाण्ये किमपि साधनमपि स्वीकुरुते। यदि तत्र भवता चार्वाकेणाकुष्मता नैव किमपि साधनमुपन्यस्यते तदाऽशिरस्कं वचनवदिति तदसिद्धेः। नैकाकिनी प्रतिज्ञा प्रतिज्ञातं साधयितुं ~~न~~ शक्या। नानुमानं प्रमाणं भवतीति प्रतिपादयता भवतेति वचन ~~प्रमाणमनभ्युपग~~। प्रमाणमनभ्युपगच्छता स्वशास्त्रे परशास्त्रे प्रामाण्य

॥ ब्रह्मसूत्र शाङ्कर भाष्य भामती ॥ ~~चार्वाक भामती~~
॥ चार्वाक मत समीक्षण ॥ ॥ वाचस्पति मिश्र ॥ (७)

॥ सांख्यतत्त्व कौमुदी ॥ (वा॰ मि॰)

॥ धर्मकीर्ति ॥ प्रमाणवार्तिक ॥

संवलित वचनोपन्यासे मम माता बन्ध्येति वत् व्याघातापातात्। अत एव न्यायसम्मतानुमान शब्दानां प्रामाण्यमभ्युपेयमेव। किन्त्वयं चार्वाकस्तु न्यायसम्मतानुमान प्रामाण्यमुच्छेत्तुं प्रमाणान्तरं कक्षीकुर्वन् शब्दानां प्रामाण्यमपि स्वीचक्रे। अनुमान प्रामाण्योच्छेदाय शब्दस्य प्रामाण्यं कक्षीकुरुते चेत्तर्हि वेदानां प्रामाण्यं कथन्नाभ्युपेयते। तेन वदतो व्याघातापत्तेः। (१)

अन्यच्च प्रमाण प्रमाणाभासं व्यवस्थापयता भवता चार्वाकेण तत्समान सजातीयतयैवेति चोरीकृतं स्वभावानुमानम्। यदि वार्तालापं सम्पादयता येन केनापि महोदयेन सासीरूद्धपुरपूर्तिं सः लोचनगोचरीकृत्य जलमस्ति न वेति सन्देहानन्तरं जलज्ञानं प्रमाणं प्रमाणाभासो वेति निश्चेतुं यथार्थानुभवस्य प्रामाण्यं कक्षीकर्तव्यम्। अत एव तत्समान सजातीय~~त्वात्~~तया निश्चिते जलज्ञाने स्वभावानुमानस्य केनाप्युपायेन स्वीकर्तव्यापातात्। अतः चार्वाकेण परपक्ष शब्दान् समीक्ष्य तत्पक्षमुच्छेत्तुं स्वभावानुमा~~[illegible] न मपेक्ष्यते।~~ मपेक्ष्यते।

एवं परगत विप्रतिपत्तेस्तु वचनलिङ्गे कथयता भवतेति कार्य लिङ्गकानुमानस्योपादेयत्वाच्च। (२) कस्यापि वस्तुनः स्वभावादेवानुपलब्धिं पर्यालोच्य तत्पदार्थप्रतिषेधोऽपि स्वीक्रियत एव। ~~यतस्त्वं~~ यतस्त्वं कातलीकृत्य परलोक मोक्षादयः प्रतिषिध्यन्ते। तस्मादालक परलोक मोक्षादीनां प्रतिषेधतयानुमानानुपलब्धि लिङ्गकानुमानस्य स्वाभाविकत्वात्। तदुक्तञ्च —

प्रमाणान्तरसामान्यस्थितेरन्यधियो गतेः।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्॥ (३)

तथा च तथागतपक्षावलम्बिनः चतुर्विधया भावनया परमपुरुषार्थं कल्पयन्ति। माध्यमिक योगाचार सौत्रान्तिक वैभाषिक संज्ञाभिः ते प्र~~[illegible]~~सिद्धिं गताः। यथाक्रमं तथागत पक्षावलम्बिनः सर्वशून्यत्व बाह्यार्थशून्यत्व बाह्यार्थानुमेयत्व बाह्यार्थ प्रत्यक्षत्वानि स्वीकुर्वते।

यद्यपि भगवान् तथागतस्तु एक एव बोधयिता [illegible]ति तथापि बोद्धव्यानां प्रज्ञाभेदात् तस्य चातुर्विध्यं स्वीचकार। यथा "गतोऽस्तमर्कः" इत्युक्ते जारचौरानूचानादयः स्वेच्छानुसारेणाभिसारण परस्वहरण सदाचरणादि समयमवगच्छन्ति तद्वदिमे तथागतपक्षावलम्बिनः स्वप्रतिभानुसारं तत्पक्षान् यथास्थानं विविच्य स्वस्व पद्धत्या प्रतिपादयितुमारभन्ते। तत्र माध्यमिक शून्यवादं व्यवस्थापयिता नागार्जुनः ख्रीष्टाब्द द्वितीय शतके माध्यमिक शास्त्र

"नागार्जुन" माध्यमिक कारिका – ७-६, (१)

(२) "विवेक-चूड़ामणि"

"राहुल सांकृत्यायन" "तथागत दर्शन" ३

प्रणीय शून्यवादं प्रणिनाय। तदनुसारं संसारोऽयं सदा शून्यः। नास्ति कस्यापि सत्ता प्रतीयते। अतएव द्रष्टृ दृश्यं दर्शनं सर्वमिति स्वप्नसमानतया ऽऽभाति। तद्यथा- सत्, असत्, सदसत्, असन्नासत्, इत्यात्मक विलक्षण-चतुष्कोटिभिः तथागतपक्षावलम्बिनः पक्षैः विलक्षणैर्वा ऽऽभाति। व्यवहारे प्रतीयमानानां वस्तूनां नितान्तमसत्त्वेन शून्यत्वमेव बौद्धस्य ध्येयम्। किन्तु तस्य पृष्ठभूमौ तादृशी विलक्षणा सत्ता प्रतीयते। या वत्वौपाधिकी एव मविकल्पा च। अतएव माध्यमिककारिकायां वचनमिदं समुट्टङ्कितवान् यत्—

न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्।
चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥ (१)

अद्वैतवेदान्तव्याख्याता श्रीमच्छङ्कराचार्योऽपि ब्रह्मतत्त्वनिरूपणावसरे प्रस्तुतरीतिं स्वीचक्रे। तस्य ब्रह्मणः शक्तिर्मायेति कोटित्रयशून्या। अतएवेत्थं वर्णाण खलु —— (२)
सन्नाप्य सन्नाप्युभयात्मिका नो मायेति। तस्मात् केनेत्थमभाणि-
यत् —

वेदो मतो बुद्धकृतागमो मतः,
प्रामाण्यमेतस्य च तस्य चार्हतः।
बौद्धा मतो बुद्धिफले तथा मते
यूयं च बौद्धाश्च समानसंसदः॥ (३)

अयमेव नागार्जुनः ~~ख्रीष्टस्य~~ ख्रीष्टाब्दस्य द्वितीयशतके शून्यवादसिद्धान्तं व्याख्यातुं प्रतिबद्धो बभूव। दाक्षिणात्योऽयं ब्राह्मणवंशीयः बौद्धधर्मस्य दीक्षां जग्राह। एतेषां लोकोत्तरप्रतिभासम्पन्नोऽयं कल्पनाबाहुल्येन, प्रकर्षपाण्डित्यप्रगल्भतया च तन्त्रमर्मज्ञतयाऽपि विपुलां कीर्तिं समस्त दार्शनिकजगतीतले नितरां प्रसिद्धिं प्राप।

महानुभावोऽयं तथागतदर्शनस्य माध्यमिकशास्त्रं वा माध्यमिककारिकां प्रणैषीत्। या खलु माध्यमिककारिका सप्तविंशति प्रकरणेषु विभक्ता विद्यते। शून्यवादस्य प्रतिष्ठा विपुलकीर्तिश्चि नितान्तमाभिर्-चकास्ति। ग्रन्थस्यास्य महती वृत्तिः प्रज्ञाप्रदीपनाम्नी चन्द्रकीर्तिमहाभागेन प्रणीता प्रसन्नपदाभिधेया महत्त्वातिशयं धत्ते। नागार्जुनशून्यवादपक्षमाकलय्य आर्यदेव-चन्द्रकीर्ति शान्तिरक्षिप्रभृतयो दार्शनिकाः शून्यवादं व्याख्याय तद्यशोलतिकां दार्शनिकजगतीतले रोपयिष्ट। प्रात्यक्षिकजगतः भिन्ना खलु पारमार्थिकी सत्ता नितरां विद्यमाना परन्तु सा सर्वदाऽवर्णनीया। लौकिकपद्धत्या तस्या वर्णयतया शून्यत्व व्यपदेशः। किन्त्वयं शून्यवादः नास्त्यभावाल-

"नागार्जुन" मध्यम कारिका"

"मध्यम कारिका" "नागार्जुन"

कः। अभावस्तु सापेक्ष शब्दः। कस्यापि पदार्थस्य तत्स्वरूपं निर्वक्तुं चतस्रः कोटयः प्रयुज्यन्ते। अस्ति, नास्ति, तदुभयम्, नोभयञ्च। परं परमार्थतत्त्वं निर्णेतुं नानेन चतुःकोटि साहाय्येन कदापि क्षमते। अतएव मनसा वचसा वा परमार्थतत्त्वस्य नितान्तागोचरतयाऽनिर्वचनीयत्वमेव स्वीकुरुते। अनेनैव हेतुना शून्यत्व व्यवहारः।

तथागत दर्शने अनिर्वचनीय शब्दं चतुःकोटि विमुक्तत्वेन सदा प्रयुङ्क्ते। किन्तु वेदान्त दर्शने सदसद्भ्यां विलक्षणः। विशेष सिद्धान्तं प्रतिपादयितुं सदा शून्यं प्रायुङ्क्त। हीनयानस्याचार विषयक मध्यम प्रतिपदानुरूपं तत्त्वमीमांसा विषये माध्यमिक सिद्धान्तं परिपुष्णान्ति। एतेषां विचारानुसारं नैव किमपि वस्तु ऐकान्तिकं सत्, नचैकान्तिकमसत्। अतएव सदसद्भ्यां विलक्षणमेव। तेन शून्यत्व व्यपदेशः माध्यमिकानां कृते। शून्यमिदं तावदभावात् भिन्नम्। यतोहि अभावस्य कल्पना सापेक्षा। किन्तु शून्यमिदं सदा निरपेक्षम्। शून्यमिदं परमार्थतत्त्वं व्यनक्ति सौगतः। आध्यात्मिक मध्यम मार्गस्योद्भावकतया माध्यमिक शब्देनायं दर्शन व्यवहारं प्रायुङ्क्त। (१)

माध्यमिक दार्शनिकेन चन्द्रकीर्ति महाभागेनेत्थं प्रत्यपादि यत् वस्तुनः द्वे तत्त्वे विद्यते। एकः भावात्मकः, तदपरः अभावात्मकश्च। यत्तावत् सदा वर्तमानतया परिलक्ष्यते सोहि भावात्मकः। यः खलु वर्तमानतया नैव प्रतीयते स एवाऽभावात्मकः। तस्मात् वस्तुनो नैव भावः एवमभावो वा। तेन शून्यत्व व्यपदेशः।

अयमेव शून्यवादः नागार्जुन महोदयानां शून्यवादः दार्शनिक जगतीतले विपुलकीर्तिं लभते। शून्यमिदं सदाऽपेक्षतत्त्वमेव। समस्तोऽयं नानात्मक प्रपञ्चः अस्यैवात्मतत्वस्य विवर्तः। परमतत्त्वस्यैव सत्ता सर्वतोभावेन मन्तव्या। तत्स्वरूपं नितान्तमवर्णनीयम्। अतएव तत्त्वमिदं न सत् नवाऽसत्। अथवोभयमिदं तावत् किम्बोभाभ्यां तद्भिन्नमेव। अतएव तत्त्वमिदं शून्यात्मकमेव तथागत दर्शने व्यवहाराय कल्पते। (२)

ऐतिहासिक गवेषणात्मक तत्त्वमाकलय्य भगवतः तथागतस्य द्वे रूपे प्राप्येतेतिहासस्य मुखपृष्ठे। एकं धार्मिक रूपं तदपरमाध्यात्मिकरूपञ्च। यत्रखलु आध्यात्मिक रहस्योद्घाटनस्याऽनावश्यकत्वं स्वीकृत्य जनकल्याणाय

‘‘वलदेव उपाध्याय’’ ‘‘बौद्धदर्शन’’

(२) ‘‘वौद्धदर्शन’’ आचार्य नोन्द्र देव।

(३) आचार्य नोन्द्र देव तथागत दर्शन’’

ववोधर्न –

सरल पद्धत्याऽऽचार तत्त्वानि व्याचचक्षे। तदपरदार्शनिकपक्षस्य सिद्धान्तं करतलीकृत्य बौद्धतत्त्वविवेचकाः भगवतः तथागतस्याचारशिक्षान्तःकोटिप्रविष्ट सूक्ष्म सिद्धान्तान् तर्कनिष्णातधिया नितान्तं वैशद्येन समीक्ष्य बौद्ध धर्मस्य दार्शनिकपद्धतिं स्पष्टं चक्रुः। इमे द्वे रूपे तात्त्विक विचारदृष्ट्या तार्किक प्राञ्जल भाषया वा स्व प्रतिभाबलादेव समालोच्य स्व पक्ष मचीचकासन्। (१)

अस्य धर्मस्य प्रवर्तयिता भगवान् तथागतः नितान्तं प्रख्यातकीर्तिः विख्यात एवेति नाल कथन शङ्कावतारः। (५०५) वैक्रमात् प्राक् शाक्यगणाधिपस्य राज्ञः शुद्धोदनस्य माया देव्याः गर्भतः माधव पूर्णिमायां गौतम बुद्धः जनिं लेभे।

ऊनविंशतिवर्षादारभ्य पञ्चविंशतिवर्षपर्यन्तं नितान्तमरण्यानि पर्वत प्रदेशान् परिभ्रमन् शारीरिक दुःख ज्वालाप्रदीप्त किरणानि प्रसह्य ज्ञान सुधा धवल मकरन्देन स्वात्मानमभिषिञ्चन् नैवाऽबाधित त्रिकाल सत्य पर प्रकाश पुञ्जजालानि नितरामाकलयामास। परन्तु तावतापि नैव भगवान् बुद्धः बुद्धत्वमासादयामास।

नितरामायातः पञ्चविंशतितमे वर्षे स्व प्रज्ञाप्रकर्षबलादेव गौतमः “उरुवेल नाम्नि स्थाने आर्यसत्य प्रत्यक्षानुभूतिमासाद्य (४७१) वैक्रमाब्दतः प्राक् माधव पूर्णिमायां बुद्धत्वमासादितवान्। (२) अयं भगवान् बुद्धः सर्वप्रथमः सारनाथ नाम नगरे पञ्चभिक्षून् पुरस्कृत्य नितरामुपदिदेश धर्मचक्रं परिवर्तितवान्। गणराज्यस्यादर्शं नितान्तमाकलय्य भगवान् तथागतः भिक्षुभ्यः संघं प्रचक्रे। नैसर्गिक दुःख जालेभ्यः सद्यो हर्तुं धार्मिक शिक्षां जनसाधारण भाषायां प्रादात्। (४२६) वैक्रमाब्दतः प्राक् माधव पूर्णिमायां अशीति वैक्रम संवत्सरे मल्लगणतन्त्रस्य राजधान्यां कुशीनगरे निर्वाणमप्राप्नोत्। (३)

भगवतः तथागतस्योपदेशरहस्यानि विज्ञातुं नितरामावश्यकं विद्यते यत् खलु अध्यात्मशास्त्रस्य मार्मिकरहस्यानि नैव तर्क साहाय्येन ~~[illegible]~~ भगवतः तथागतस्य लक्ष्यं नासीत् किन्तु क्लेश बहुल प्रपञ्चात् दुरुद्धर्तुं सदाचार मार्गस्याववो तेषां प्रधानोद्देश्यम्। शिष्योपशिष्यैः पृष्टा ध्यान विषयकप्रश्नान् नितरामाकर्ण्य शान्तभावमाकलनेनैव तद्रहस्यं विज्ञायते।

(१) हिस्ट्री आफ पाली लिटरेचर " "डा० विमल-चरण "

हिस्ट्री आफ इण्डियन लिटरेचर " भाग दूसरा "
" डा. विन्टरनित्स "

कतिपये विषये भगवान् तथागतः स्वशिष्यान् प्रोवाच यत् नहि प्रश्नोत्तरेण तत्समाधातुं कोऽपि क्षमते किन्तु स्वानुभव परीक्षामाकलय्य तत्समाधानमपेक्षते। (श्रावस्ती विहार प्रसङ्गे विभिन्नशिष्य वृन्देन शाश्वताशाश्वतयोः जीवशरीरभेदाभेदयोः सन्दर्भे तावदजिज्ञासि यत् लोकोत्तरज्ञानायात्यन्तिक दुःख निवृत्तये च साधकाभावेन नितान्तमव्याकृतोऽयं विषय इति भगवता तथागतेन प्रत्यपादि।

दृष्टान्तमेकं प्रददता भगवता तथागतेन यत् कापि व्यक्तिः विदग्ध वाण बिद्धा सती दुःख दावानल ज्वालाकुलापि चिकित्साय प्रवर्तमानेन बान्धवेन तन्नामगोत्र वर्णसन्दर्भे पृच्छनेनापि तन्निवारयितुं शक्या किमिति। तथा विषय दावानल ज्वालाकुलस्य भवरोगिणः नितान्तमीदृश्येव गतिः। अतएव तादृक्षाणां कृते नाध्यात्ममपेक्षते किन्तु स्व कर्तव्य मार्गे स्व विधेयस्याचरणमेव तावदुचितम्। कर्तव्य शास्त्र सन्दर्भे भगवान् बुद्धः सत्यस्योद्घाटनं स्व सूक्ष्म विवेक बुद्धया सम्पादितवान्। (१)

संसारे जीवनमदः दुःखदावानल ज्वालाकुलितमेवाऽऽस्ते। दुःख कारणान्यपि ~~सन्तिन्त~~ सन्तिष्ठन्त एव। दुःख दावानलज्वालाकालेभ्यः ~~सद्योमु~~ सद्योन्मुक्तिः नितरामावश्यकी। दुःख निरोधाय मार्गोऽन्वेष्टव्यः। यद्यपि तथागतानां विचारपक्षे सत्यान्यनन्तानि विद्यन्ते तथापि सर्वस्मादपेक्षया सत्यचतुष्टयमेव सर्वश्रेष्ठमस्ति। तस्मात् स्व प्रतिपादित विधानानुसारं सर्वोत्कृष्ट सत्यमिदं नितान्तमाकलयितुं विद्वांस एव सदा प्रयतन्ते। अविवेकिनस्तु केवलं जायन्ते म्रियन्ते च। दुःखाकुलं जगत् प्रतिक्षणं नितान्तमनुभवन्नपि सत्यं ज्ञातुं नैव क्षमते। (२)

अनेनैव हेतुना चिकित्साशास्त्रवत् मोक्षशास्त्रस्य चतुर्व्यूह कल्पनं नितान्तं साधीयः। वैद्यक शास्त्रस्य समत्व प्रतिपादनाय भवरोग व्यथिताय जनाय महाभिषक् संज्ञां लभते ॥ "भैषज्य गुरुवैदूर्य प्रभाराज सूत्रमपि" ॥ चीन जापान प्रभृति देशे बौद्ध सिद्धान्तस्य महत्त्वं वैशिष्ट्येन वैशद्येन वा महत्त्वं विद्यते।

॥तथागतस्याचारशिक्षा॥

भगवतः तथागतस्याचार प्रधान शिक्षायां दार्शनिक सिद्धान्त विकासस्य प्रधानतया द्वौ पक्षौ विद्येते। तत्रैकः खलु संघातवादः तदपरः सन्तानवादश्च। भगवान् तथागतस्तु उपनिषत्प्रतिपादितात्मवादमस्य प्रधानतयाऽवगत्य तमेव वादं साधारणभाषया व्यवहारभाषया वा समाजाय सम्यक् समुपदिदेश। ~~उपनिषत्प्रतिपाद~~ उपनिषत्प्रतिपादितात्मवा

~~देरस्यं~~ दावागमनमेव तथागतानां प्रधानोद्देश्यमासीत्। सकलदुष्कर्मजन्य दुष्प्रवृत्तिमूले आत्मवादस्यैव कारणत्वमभ्युपगम्यात्मनः स्वातन्त्र्येण नैव सत्तां स्वीचक्रे। ते मानसिकानुभवं स्वीकृत्य विभिन्नामपि प्रवृत्तिं स्वीचक्रिरे। अतएवात्मनः संघातात्मिकतया नैव सत्तां स्वायत्तीचकार। अतएव तथागतानां विचारे आत्मा मानसप्रवृत्तेः पुञ्जमात्रमेव। प्रस्तुतप्रवृत्तिसंघातात्मिकतया नान्यत्र तस्य प्रत्यक्षरूपतामाकलयति। तेन तथागतानां साम्प्रतिक मनोवैज्ञानिक सिद्धान्तसमत्वं नितान्तमनुकुरुते आत्मवादसंघातः। यः खलु मानसिकप्रवृत्ति मूलकावस्थां स्वीकृत्य तदेकीकरणात्मकाभिन्नं नितरामात्मतत्त्वं मन्तुं नैव समुद्यतो भवति।

अयं तावदात्मा नामरूपात्मकः। इन्द्रियेभ्यः वस्तुतत्त्वानि अनुभवितुं स्वस्वरूपं निरूपयितुं प्रवर्तते। यद्गुरुत्वमवलम्बते एवं यत्स्थानं रुणद्धि तदेव रूपं तथागतानां सम्मतमित्यभिधीयते। तस्मात्जलतेजोवायवः एवं तज्जन्यानि शरीराणि रूपपदवाच्यतामाकलयन्ति। नास्त्यवलम्बते यद्गुरुत्वं नापि किमपि स्थानं रुणद्धि तदेव नामात्मकं द्रव्यम्। शरीरमनांसि नितरामधिकृत्य एवं मानसिक शारीरिक प्रवृत्तिमाकृष्य प्रवर्तमानमेव नामरूपपदवाच्यतामाकलयति। अतएव भौतिक मानसिक प्रवृत्तीनां समुच्चयमात्रमेवात्मा। तत्र रूपस्यैकत्वेऽपि नाम्नः भेदात् तस्य चातुर्विध्यम्। वेदना संज्ञा संस्कार विज्ञान भेदात्। तस्मात् एतेषां पञ्चस्कन्धानां पुञ्जमेवात्मा व्यनक्तीति तथागतः।

भूतभौतिकशरीराणि रूपसंज्ञामाददते। साधनमेव संज्ञात्वसंज्ञां लभते। ततः सुखदुःखस्यौदास्यमेव वेदनेति। अतीतानुभवमुक्त्या तद्स्मृतेः कारणात्मकमानसिकप्रवृत्तिः संस्काराः। तथाचैतन्यं विज्ञानपदवाच्यत्वमभिधत्ते। विज्ञानसंज्ञास्कन्धेषु निर्विकल्पकसविकल्पकप्रत्यक्षव्यवहारवत् भेदव्यवहारं स्वीकुर्वते। यत्किञ्चिद्रूपं निर्विकल्पकप्रत्यक्षमेव विज्ञानम्। तथा नामजात्यादि योजनाविशिष्टज्ञानं संज्ञेत्युच्यते। अयमेव पञ्चस्कन्धः तथागतदर्शने सम्मत नितान्तप्रसिद्धिभाव इति। ७)

तथागतानां सिद्धान्तं कक्षीकृत्य भदन्त नागसेनः तथागतात्मस्वरूपवर्णने यवनाधिपतिं मिलिन्दं सुन्दरोपमया हार्येनेच्यमवोधयत् खलु नागसेनः राजानं पप्रच्छ प्रचण्डमार्तण्डमण्डलमभिव्याप्य समागच्छतः किमस्य दण्डस्य रथपदवाच्यत्वं वा तदक्षस्य। आहोस्वित् चक्रस्य किंवा तदन्यस्यवा। किंवा प्रत्यवयवविशिष्टेष्व रथः व्यवहारः, अथवा तदवयवे रथत्वव्यवहारः। अनेन दृष्टान्तवाक्येन नागसेनः राजानं प्रत्युवाच किल पञ्चस्कन्धा

ह्यवयवातिरिक्ततया नितरामवयविनः सत्ता लोचनगोचरतया इत्थं पञ्चस्कन्धान् स्वीकृत्यैव व्यवहारदशायामात्मत्वव्यवहारः। किन्तु नैवात्मनः वास्तविकी सत्ता वरीवर्तीति। अस्यैवाज्ञातात्मतत्त्वस्य पारलौकिकसुखोत्पादनेच्छया वैदिककर्मकाण्डप्रपञ्चमनुसरन् वैदिकः नितरामुपहासास्पदमेव। यथा गुणवर्णादितत्त्वमजानन् जनकल्याणभावनया प्रेरितःतदुपाकृतिं धत्ते। तद्वत् वैदिककर्मकाण्डविधानसम्पादनप्रगल्भः केवलं पारलौकिकसुखभावनयैवात्मतत्त्वमजानन् तज्जनितसुखमुपेतुं प्रयत्नवान् एव दृश्यते। अयमेव तथागतानां संघातवादः।

तथागतानां त्रिपिटिकानुसारं तावदयमात्मा जगदपि सर्वथाऽनित्य एव। अस्य कालिकसम्बन्धः क्षणद्वयपर्यन्तं नैव सन्तिष्ठते। पञ्चस्कन्धोऽयं बौद्धानुसारं क्षणद्वयपर्यन्तं सामान्यतया नैव ~~स्व~~ धे विद्यते। सोऽपि प्रत्यक्षणं परिणाममात्रमासादयति। अनया पद्धत्या द्वावपि जगज्जीवौ परिणामशालिनौ स्तः। जलप्रवाह दीपशिखोदाहरणाभ्यां सन्तानवादसिद्धान्तं विशदीकृतवान्।

यथा जलप्रवाहे स्नाति कोऽपि पुरुषः, तदपरदिने तदेवानुभूयमानजलं सन्तिष्ठते। अनेनैव प्रकारेण दीपशिखायामप्यभिन्नत्वं स्वीकार्यम्। नागसेनोऽपि पयसो विकारस्य दृष्टान्तं प्रदर्श्य तत्त्वमिदं मनोरम पद्धत्या प्रादर्शयत्। पयोदोहनानन्तरं दधिरूपतया परिणमते पयः। दध्यनन्तरं नवनीतं ततः घृतं जायते। अत्र विभिन्नविकासद्भाववस्तुनि एकत्वमपलपितुं नैव क्षमते कोपि। अनेनैव प्रकारेण कस्यापि वस्तुनः प्रवाहे एकावस्था जायते तदनन्तरमेव तदपरावस्था नितान्तं विलीयते। एवं क्रमेण कस्यापि प्रवाहस्यावस्था विशेषे क्षणवैषम्येन ~~[illegible]~~ एकस्यलयानन्तरं तत्क्षणानन्तरमेव तदपरा समुत्पद्यते। इयमेव प्रक्रिया आत्मनः सन्दर्भे वरीवर्तीति।

एकस्य जन्मनः चरमविज्ञानानन्तरमेव झटिति द्वितीयजन्मनः प्रथमविज्ञानमुत्तिष्ठति। अनया प्रणाल्या समस्तानुभवात्मकं जगत् प्रतिक्षणं परिणमते। अतएव वास्तविकं जगतीतलेऽस्मिन् एकत्वं दुर्लभमेव। एतावता भगवतः सिद्धान्ते विपरीतद्वयपक्षस्य समन्वयप्रयासः नितरामवलोक्यत एव। तत्रैका परिपाटी सत्तायां विश्वसिति तदपरपक्षस्तु तदसत्तां कक्षीकुरुते। परन्तु नागार्जुनः तथागतानुसारं सत्यसिद्धान्तः तदुभयदिशि लोचनगोचरायते। जगतः वास्तविकं रूपं स्वीकुर्वन् तस्य परिणामात्मकपक्षं तावदाकलय्य व्याख्यां कुरुते।

जगतीतलेऽस्मिन् परिणाम एव सत्यम्। किन्तु परिणामाभ्यन्तरे कस्यापि परिणामिनः सत्ता नैव सत्यं प्रतिभाति। भगवतः तथागतस्य सं

दार्शनिकजगतीतले विचारवैलक्षण्यमिदं बहुमूल्यं वरीवर्तीति।

पाश्चात्यधारायामपि परिणामसत्यसिद्धान्तः तथागतप्रादुर्भावानन्तरं दृष्टिगोचरो भवति। यूनान देशस्य प्रसिद्धतमः दार्शनिकः "हेरीक्लीट्स" महोदयस्तु सिद्धान्तमिमं व्याजहार।

~~फ्रेञ्च देश स्य~~ फ्रेञ्च देशवास्तव्योऽयं दार्शनिकः बर्गसाँ महोदयः ("क्रियेटिव इवोल्युशन" नाम्नि ग्रन्थे आधुनिकजगतः सिद्धान्तं मनोरमपद्धत्या व्याख्याय स्वविपुलकीर्तिमचीचकासत्।

भगवान् तथागतस्तु स्वप्राज्ञिकोहापोह प्रबल वैलक्षण्येन तत्त्वमिदं नितरामनिर्वचनीयतया व्याख्याय तस्याव्याकृतत्वमपि स्वशिष्यान्प्रतिपादयामास। एवं व्यर्थवाक्जालप्रगाढान्धकारपटलैः तत्त्वमिदं नितान्तमव्याकृततया स्वशिष्याय व्याचक्रे। परन्तु तथागतानन्तरं तथागतपक्षावलम्बिनः भावतः तथागतस्योपदेशस्यान्तस्तले प्रविश्य विशेषसूक्ष्मविद्वत्तापूर्णसिद्धान्तांसदाऽ~~न्विषु~~न्विमेषुः।

तथागत दार्शनिक सिद्धान्त तत्त्वानि चतुर्षु विभागेषु विभज्य प्रतिसम्प्रदायं विभिन्नसिद्धान्तवाक्यानि सदाऽलीलिखत्। अतएव तथागतानां चत्वारोहि सम्प्रदायाः सामान्यतया विद्यन्ते। तद्यथा —

बाह्यार्थप्रत्यक्षवादः वैभाषिकानाम्।
बाह्यार्थानुमेयवादः सौत्रान्तिकानाम्।
विज्ञानवादः योगाचाराणाम्।
शून्यवादः माध्यमिकानाम्।

अमी चत्वारः सम्प्रदायाः स्वसिद्धान्तपक्षमाकलय्य व्यवहारशीलायां पारमार्थिकतत्त्वं निरूपयितुं प्राभवन्त। स्थूलादारभ्य सूक्ष्मानुधावनपर्यन्तं बाह्याभ्यन्तरिकसमस्तवस्तूनां स्वतन्त्र्येणाऽस्तित्वमाकलय्य बाह्यवस्तु व्यावहारिके जगति नापलपितुं शक्नुमः। तस्मात् बाह्यार्थस्य प्रत्यक्षरूपतया सत्यत्वमङ्गीकुर्वतां बौद्धानां वैभाषिकत्वव्यवहारः। तदपरस्त्वाचार्यः बाह्यार्थस्य प्रत्यक्षयोग्यत्वं नाङ्गीकृत्यानुमेयवादं स्वीचक्रे।

बाह्यार्थं भौतिकजगतः नितान्तं मिथ्यात्वमङ्गीकृत्य विज्ञानवादं ब्रूते। तदपरे माध्यमिकाः शून्यस्यैव पारमार्थिकतया सत्यत्वमभ्युपेत्य शून्यवादसंज्ञां लभन्ते। तत्र बाह्यार्थप्रत्यक्षवादिनः वैभाषिकस्य विचारपक्षानुसारं स्वेन्द्रियादिभिः जगत् प्रत्यक्षीकृत्य तस्य बाह्यार्थसत्ता नितरामवश्यमेव स्वीकर्तव्या। आलोकमभ्यन्तेऽपि चेतसः सत्ता स्वतन्त्रेण स्वीकार्या। बाह्यवस्तूनां सत्ता सदा चित्तनिरपेक्षा। स्वकीयेन्द्रियसाहाय्येन बाह्यपदार्थस्य सत्ता प्रत्य

क्ष रूपेणैवावगन्तव्या ।

वाह्यार्थानुमेयवादिनः सौत्रान्तिकस्य विचारे समस्तस्य वस्तुनः वाह्यसत्तावश्यं स्वीकार्यैव । किन्तु तेषां ज्ञानं नेन्द्रियेण प्रत्यक्षीकर्तुं शक्नुमः । यतोहि सर्वे पदार्थाः क्षणिकाः विद्यन्ते । तदा सर्वेषां क्षणिकत्वेन प्रत्यक्षायोग्यत्वमेव समीचीनम् । यस्मिन् क्षणे कोऽपि पदार्थः तत्सामीप्यं भजतेस्तदा स एव पदार्थः प्रथम क्षणे प्रादुर्भूय तत्काल एव विनश्यति । केवलं तदुत्पन्न संवेदनात्मकज्ञानमेवावशिष्यते । प्रत्यक्षानन्तरमेव सर्वेषां वस्तूनां ज्ञानं समुत्पद्यत एव । अनेनैव हेतुना सञ्जातज्ञानेन वाह्यार्थाः सदानुमातव्याः । अतएव वाह्यपदार्थसत्तायाः प्रत्यक्षायोग्यतया सदानुमानयोग्यतां लभन्ते । अयमेव सौत्रान्तिकानां वाह्यार्थानुमेयत्व सिद्धान्तः । सौत्रान्तिकानां विचारपक्षेऽस्मिन् चेतसाकारत्वेन परिणततयाऽनुमीयन्ते वाह्य पदार्थाः तैः । सर्वेषां क्षणिकत्वात् । अतः तथागतपक्षावलम्बिनः सर्वास्तित्व ~~बाह्यमपि स~~ वादोऽपि संगच्छत एव । तावदिदं पार्थक्यमुभयोः । एतेषां विचारपक्षे वाह्यार्थसत्ता सदा चित्त निरपेक्षा, परन्तु सौत्रान्तिकानां विचारानुसारं चित्तसापेक्षा खलु वाह्यार्थसत्तेति ।

विज्ञानवादिनः विचारानुसारं नितरामियं व्यवस्था नैव ज्यायसी प्रतीतीति यतोहि विज्ञानवादिनः नैव वाह्यार्थसत्तां स्वीकुर्वते । कथं वाह्यार्थसत्ता चेतसि समुत्पन्नाकारेण ज्ञानेनैवावगम्यते । अतः परिस्थित्यामस्यां तज्ज्ञानस्य सत्ता स्वयमेव मन्तव्या । अयमेव तत्र सिद्धान्तः क्षणिकविज्ञानवादिनः । यदि नाम तावत् वाह्यार्थसत्ता ज्ञाने पर्यवतिष्ठते तदा ज्ञानस्यैव वास्तविकी सत्ता कथन्न स्वीक्रियेत । अतः विज्ञानमेव तावत् परमार्थः । तेन विज्ञानस्यैवास्तित्वं स्वीकुरुते । इदमेव विज्ञानतत्त्वं विभिन्ननाम्ना व्यवहरति विज्ञानवादी । चेतनक्रियया सम्बद्धतया तावदिदमेव विज्ञानं चेतनतया व्यवहृतम् । एवं मननक्रियया सम्बद्धतया विज्ञानमिदं मनस्त्वेन व्यवहृतम् । समस्तविषयान् सकासाद्य विज्ञानशब्देनायं व्यवहर्तव्यः । आलयविज्ञानमपि विज्ञानस्यैवापरो भेदः विज्ञानवादः योगाचाराणाम् ।

माध्यमिकास्तु नैव वाह्यार्थमङ्गीकुर्वते । तेषां विचारे ह्यस्या शून्यमेव परमार्थः । नात्र शून्यशब्दः केवलाभावात्मकः । किन्तु अनिर्वचनीयत्वं द्योतयति । कोटिचतुष्टयभिन्नं विलक्षणमेवातः परमार्थतया शून्यत्वेन व्यपदेशः । अनया पद्धत्या केचन तथागतपक्षावलम्बिनः वाह्यार्थसत्तां मन्यन्ते । तदपरे वाह्यार्थसत्तां अनुमानेनैव स्वीकुर्वते । तदितरे विज्ञानमात्रमेव कक्षीकुर्वते । केचन सर्वान् पक्षान् विहाय शून्यवादमेव मन्वते । इमान् तथागतपक्षान् मनोरमभाषया केचन विद्वांसः हृदयाह्लादकतया व्याचचक्षिरे । तद्यथाहि—

॥तथागत दर्शन॥ (१)

(२)॥बज्रशेखर॥

॥बौद्ध दर्शन॥ डा॰ राधाकृष्णन॥

॥मातृसेन॥ प्रथम शतक॥

मुख्यो माध्यमिको विवर्तमखिलं शून्यस्य मेने जगद्-
योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभङ्गुरं च सकलं वैभाषिको भाषते ॥ (१)

वज्रशेखराणां दार्शनिकपद्धत्या शून्यवाद एव साधीयान्। किन्तु तथागताचारस्य तान्त्रिकक्रियाकलापाधिक्यतया तदेव बाहुल्यं भजते। तथा च —

दृढं सारमसौशीर्यमच्छेद्याभेद्यलक्षणम्।
आदाहि अविनाशी च शून्यता वज्रमुच्यते ॥(२)

डा॰ राधाकृष्णन् महोदयानां विचारदृष्ट्या भगवतः तथागतस्य सिद्धान्तः नितान्तमुपनिषदां सत्यस्य पुनः प्रतिपादनमेव। उपनिषत्प्रतिपादित सिद्धान्तस्य स्वप्रतिज्ञावैशिष्ट्येन नवीनशैल्या प्रतिपादनमेवाऽस्ति। नान्यदीयस्य कस्यापि वस्तुनः। ईसातः प्राक् षष्ठशतके समस्ते संसारे ~~धार्मि~~ धार्मिकव्यवस्थायां महती क्रान्तिः जागरिता। चीनप्रदेशे कन्फ्युशियस विचारस्य प्रचारः, यूनानधरायां पाइथागोरस विचारोदयः, भारते बुद्धमहावीर विचारोऽपि महतीं ख्यातिं प्राप। भगवान् तथागतस्तु यथार्थसिद्धान्तस्य प्रतिपादनं नैव चक्रे। स्वानुभवसन्दर्भे सर्वथा मौनमेवाऽऽकलितम्। (३)

भगवतः तथागतस्याष्टांगिकमार्गः वैदिकधर्मस्य प्रतिरूपमेव। उपनिषदां दयाऽहिंसा दान तपांसि प्रभृतयः स्वशिष्येभ्यः तथागतेनाष्टाङ्गिकप्रतिरूपतया प्रदाऽभाणिषत।

प्रथमशतके मातृसेनः तथागतं भगवन्तमवर्णयत्। रागद्वेषग्रस्ताः मित्रवत् व्यवहर्तव्याः। दुष्टेऽपि पुरुषे मितौ गुणोऽन्वेष्टव्यः। दिव्यमाकलयता भवता तथागतेन कण्टकाकीर्णानि महान्त्यरण्यानि पद्भ्यां पारयमाणेन निर्वाणसहायानि व्रतानि स्वीकृतानि।

राहुल सांकृत्यायन विचारे भगवतः तथागतस्याष्टांगिकमार्गः ~~बौद्ध~~ बौद्धदर्शनस्य मूलं विद्यते। संसारस्य दुःखदावानलजालमुच्छेत्तुं एमेषां ऋते सदाष्टाङ्गिकमार्ग एव ज्यायान् पन्थाः। तथा च तथागतस्य वचः —

॥ अनित्य दुःख अनात्म ॥ एतस्मिन् तथागतसूक्ते तेषां दार्शनिकविचारः समाहितो भवति। ~~भगवान्~~ तथागतस्य दार्शनिकतत्त्वानि त्रिषु विभागेषु विभज्य व्याख्यातवान्। स्कन्धायतनधातुभेदात् तस्य त्रैविध्यं वीक्षतीति। तत्र स्कन्धस्तु रूपवेदनासंज्ञासंस्कारविज्ञानभेदात् पञ्चविधः। तत्र पृथिव्यप्तेजोवायूनां भेदात् रूपाणि चतुर्वि-

चाः -

धानि विद्यन्ते। विज्ञानं चेतनैव। सुखदुःखानामनुभव एव वेदनोच्यते। अभिज्ञानं संज्ञा, संस्काराः वासना, वेदना संज्ञा संस्काराणां पारस्परिक सम्पर्केणैव विज्ञानं जनयति। चक्षुः श्रोत्र घ्राण जिह्वा कायमनसां भेदात् षट् इन्द्रियाणि विद्यन्ते। एवं तेषामिन्द्रियाणां विषय भेदानाकलय्य द्वादश प्रकारकमायतनम्।

बाह्यार्थानुमेयवादिनः वैभाषिकस्य विचारपक्षमाकलय्याऽयं वितेनैव प्रस्तूयते। विज्ञानवादिनः विचारानुसारं विज्ञानवादमात्रं सत्यम्। नान्यद् किमपि वस्तु। संसारे बाह्य वस्तूनि वस्तुतः चेतसः प्रत्यय मात्रत्वं भजन्ते। अतएव बाह्यवस्तूनि चेतसामभिव्यक्तयः विद्यन्ते। चेतस एव सत्तामभिव्याप्य तत्तद्वस्तुतया परिणमते।

विज्ञानवादिनः विचारानुसारं तदेव तात्पर्यं संघटते यत् खलु स्वप्नावस्थायां दृष्टवर्तमान वस्तुनः सत्ता बाह्ये लोचनगोचरा भवति। परन्तु नेयं वार्ता वास्तविकी। किन्तु चेतसामाभ्यन्तरे सर्वाणि वस्तूनि जायन्ते। जागरितावस्थायामपि तादृशी व्यवस्था लोचनगोचरा जायते। तेन बाह्यवस्तुनः सत्ता भ्रमपूर्णैव। अयमेव पक्षः बौद्धधर्माचार्येण धर्मकीर्ति महाभागेन स्वीकृतः। ~~घटत्वद्~~ घट तद्ज्ञानयोः नैव पार्थक्यं लोचनगोचरीकरणम्। विज्ञानस्यैव तेषां विचारे सत्यत्वात्। नानोपचारभावनया विशिष्टोयं संसारः मनसां विलासमात्रम्। उपचारस्तु द्वौ प्रकारौ विद्येते। एकस्तत्रात्मोपचारः, तदपरः धर्मोपचारश्च। ~~[illegible]~~ जीवजन्तु मनुष्यादयः सर्वे आत्मोपचारतया कथ्यन्ते। स्कन्धधातु आयतन रूप वेदना संज्ञा संस्कार विज्ञानादयः धर्मोपचारतयोच्यन्ते। एतेषां सर्वेषां सत्ता नैव विज्ञानातिरिक्ता। आत्मापि विज्ञानस्यैव परिणामोऽस्ति।

विज्ञानवादिनस्तु चेतसामष्टौ भेदान् स्वीकुर्वते। वैभाषिकानां विचारे केवलं तस्य षड् भेदाः प्राप्यन्ते। योगाचाराणां विचारे विज्ञाने द्विप्रकारके विद्यते, आलय विज्ञान मनो विज्ञान भेदात्। अस्यां विभागप्रणाल्यां आलय विज्ञानस्य कल्पना विज्ञानवादिनः सूक्ष्म मानस तत्त्व विवेचनं ज्ञापयति। ~~चक्षु~~ चक्षु विज्ञानप्रभृतीनि षट् विज्ञानानि बाह्यवस्तूनां तत्सम्पर्केणैव जायन्ते। द्वारमिदं तावत् विषयज्ञानाय।

योगाचाराणां विचारे विज्ञान विज्ञेययोः पार्थक्यं नितान्तास्पष्टमेव। विज्ञेयस्य कल्पिततया नैव तस्य सत्यत्वम्। संसारेऽस्मिन् नैवात्मा नैव कश्चन धर्मोऽस्ति। ~~परन्त्व~~ परन्त्वनादिकालत एव तेषामुपचारतया परिकल्पिततत्त्व मात्रम्।

विज्ञानपरिणामस्य त्रयो भेदाः प्राप्यन्ते विपाक मनन विज्ञप्ति भेदात्। कुशलाकुशल कामवासनायाः परिपाकतया फलानामभिनिर्वृत्तिर्वि

(৭)॥ নৈশিকা কারিকা॥ - ৭৮॥

रेव विपाकपरिणामः। इदमेव तावदालयविज्ञानमुच्यते। क्लेशोत्पादकधर्मबीजानामालयतया ऽस्यालयविज्ञानत्वव्यपदेशः। चित्तसंज्ञा चेतनादिप्रभृतिभिः समाच्छन्नमिदं तावदालयविज्ञानम्। विज्ञानपरिणामस्य द्वितीयप्रकारः मननम्। सर्वदा मननमात्रं मनसो स्वभावोऽस्ति। आलयविज्ञान मात्रमाश्रित्य मनः प्रवर्तते।

विज्ञानपरिणामस्य तृतीयो भेदः विषयविज्ञप्तिः। चक्षुर्विज्ञानाद्यारभ्य मनोविज्ञानपर्यन्तं षट्पर्यन्तं रूपरसगन्धस्पर्शधर्मोपलब्धयः विषयविज्ञप्तौ समागच्छन्ति। ~~अलोभ~~ अलोभाद्वेषमोहादिभिर्व्यपेता विषयोपलब्धिः कुशलपदवाच्यत्वमभिधत्ते। लोभद्वेषमोहादिभिर्व्याप्तमकुशलपदवाच्यत्वं लभते।

इमे विविध विज्ञानपरिणामाद्यः योगाचाराणां विचारे विकल्पमात्रमादधाति। यतः विज्ञानस्य विविधपरिणामात्मकतया तस्य विकल्परूपत्वम्। विकल्पोऽपि त्रिविधः। आलयविज्ञाने समस्तधर्माणां समस्तोत्पादन शक्तिः नितरां तिरोहिता भवति। आलयविज्ञानेन समस्तस्य वस्तुनः समुत्पद्यमानतया तत्र सर्वबीजत्वव्यवहारः। अनेनैव हेतुना जगतीतले ऽस्मिन् विज्ञप्तिमात्रत्वं सिद्ध्यति। (१)

॥आलयविज्ञान॥

चञ्चलपवनतरंगव्यालोडितः पारावारप्रवाहः स्वतरंगलीलां प्रदर्शयन् नैव कदापि विरमति तथाऽऽलयविज्ञानं विषयपवनचञ्चलतरंगतया चित्रविचित्रात्मकविज्ञानानि जायन्ते। तानि विज्ञानानि नृत्यमानतया स्वव्यापारं प्रदर्शयन्ति। एवं नैव कदापि तानि क्षीयन्ते। अतएवालयविज्ञानं समुद्रस्थानीयम्। विषयास्तु पवनानां प्रतिनिधित्वं सम्पादयन् विज्ञानतरंगप्रतीकत्वं भजते। यथा पारावारतरङ्गयोः नैव पार्थक्यं लोचनगोचरतां याति। तथालयविज्ञानं नैव विज्ञानाकारात् भिन्नम्। तेन वसुबन्धुः सदालयविज्ञानस्य वृत्तिः जलप्रवाहसमत्वं प्रादर्शयत्।

तेनाचार्यवर्येण वसुबन्धुना नितान्तमभाणि यज्जलानां चञ्चलप्रवाहः तृणकाष्ठादिनानापदार्थान् आकर्षयति यथा तथालयविज्ञानमपि पुण्यापुण्यवासनया नितरामाश्लिष्टं सत् स्पर्शसंज्ञावेदनाधर्मादीन् नितान्तमाकर्षयति। अतएवालयविज्ञानमपि संसारे नैव विरमति। आलयविज्ञानं जलप्रवाहवत् प्रत्यजस्रं प्रवहति।

तेनालयविज्ञानं तथागतदर्शने आत्मनः प्रतिनिधित्वं सम्पादयति। यथाप्पुमयोः ~~पार्थक्यं~~ पार्थक्यं स्पष्टमेव प्रतिभाति। आत्मा नितरामपरिवर्तनशीलः, परन्त्वालयविज्ञानं नै

परिवर्तते। आलयविज्ञानं विज्ञानस्य सततं प्रवाहधारां सम्पादयत् सन्तिष्ठते। नास्य चैतन्यधारा कदापि शान्ता जायते। आलयविज्ञानं सर्वदा सर्वत्र सन्तिष्ठत्येव। इयमेवालयविज्ञानानां समष्टिः चैतन्यस्य प्रतीका।

आलयविज्ञानस्य सहायकधर्माः पञ्चधा विभक्ताः। चेतसः विषयस्यैकाग्रता। विषयेन्द्रियव्यापारस्य विज्ञानेन सह संसर्गः। सुखदुःखयोर्भावना। कस्यापि वस्तुनः संज्ञा। एवं चेतना च। या खलु सुखदुःखानां भावनाऽऽलयविज्ञानस्य सहायकधर्माः। मनोभूमौ विद्यमानोपक्लेशेन नैव सुखदुःखानां भावना निर्मां व्यापृता। अतएव तथागतदर्शने विज्ञानस्य विश्वासलीला येन प्रवर्तमाना दृश्यते तदेवालयविज्ञानम्।

अयमेव विज्ञानवादः योगाचाराणां विख्यातोऽस्ति। आलयविज्ञानस्यास्तित्वं विज्ञातुं योगाचाराणामवगमनं नितान्तमपेक्षते। केषाञ्चिन्मते योगस्य तात्पर्यं जिज्ञासया सञ्जायते, एवमाचारस्य तात्पर्यं सदाचारेणैव बोभवीति। अतएव जिज्ञासासदाचाराभ्यां सदा व्यापृततयाऽस्य योगाचारत्वव्यपदेशः समेषामभीष्टः।

वस्तुतस्तु भावतः तथागतदर्शनस्य मूलं तावदुपनिषत्साहित्यमेव विद्यते। कथं तु कर्मकाण्डस्याऽकिञ्चित्करत्वं भवप्रपञ्चस्य मूलेऽविद्यायाः कारणत्वं, रागद्वेषोन्मुक्तये तृष्णायाः विनाशः कर्मसिद्धान्तव्यापकत्वं यथास्थाने तथागतदर्शने उपनिषत् साहित्ये समत्वेन प्राप्यन्ते। कतिपयेसिद्धान्ते सत्यपि समत्वे किन्तु क्षणिकवादोऽनात्मवाद विज्ञान शून्यवाद सिद्धान्तादयः तद्वैपरीत्यमेव भजन्ते। बौद्धजैनादयः नितान्तं प्रौढप्रमाणमाकलय्योपनिषत् सिद्धान्तानां पुनर्प्रतिपादनमेवेति वक्तुं न शक्यमेव।

"क्षणिक विज्ञानवाद"।

क्षणिकत्वपक्षमाकलयता तथागतपक्षावलम्बिनाऽऽचार्येण ~~समस्त~~ ~~समस्तस्य~~ समस्तस्यास्य जगतः पदार्थस्य क्षणिकत्वस्वीकारे व्यवहारपरमार्थयोः तदुपपत्तिः नितान्तं न शक्यैव। वस्तूनां क्षणिकत्वे कस्यापि क्षणिकक्रियायाः फलमन्तैव सा क्षणिकक्रियाऽतीतगर्भे विलीयते। एवमकृतकर्मविनैव तत्फलं यदि भुञ्जीत तदा कर्मणामनावश्यकत्वं समापद्येत। परन्तु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इत्यादि लोकगाथानुसन्धानव्याघातापातभयात् स्वीकारे क्षणिकत्वपक्षे प्राणिनि नितान्तमयोग्यत्वापत्तेः। एवं संसारस्यापि तद्विरहे नैरर्थक्यमाप

(१) ।।किरणावली।। ।।उदयनाचार्य।।

(२) तथागतदर्शन।। ।।माधवाचार्य।।

ध्येत।

भगवान् तथागतस्तु मोक्षं प्राप्तुं तेनैव प्रकारेणाष्टाङ्गिकमार्गंसमुपदिशति। परन्तु क्षीणे कर्मणि: फले मोक्षोऽप्यसम्भवएव। स्मृतिभङ्गेऽपि क्षणवादे निराकर्तुं निर्रा प्रमाणकोटावेव समागच्छति। स्मरणानुभवयोः सामानाधिकरण्येन तद्विषयकव्यवहारस्यापि दौर्लभ्यात्। लणवत् प्रत्यभिज्ञायाः वैयर्थ्यापाताच्च।(१)

अतएव लौकिकशास्त्रीय विचारोभयदृष्ट्या क्षणिकवादः नैव साधीयान्। अतादेव हेतोः हेमचन्द्राचार्यः क्षणिकवादिकक्षीकृत्य तथागतपक्षावलम्बिनः विचारपक्षः महासाहसिकएवेति व्याजहार। क्षणिकवादस्वीकारोत्पन्नविषमावस्थां पर्यालोच्य जयन्तभट्टः न्यायमञ्जर्यां मनोरमपद्धत्या तं निराचकार। अनेन भट्टमहाशयेन भण्यते यत् नात्मा वीक्षतीति किन्तु स्वामिमाकलयितुं किमर्थं चैत्यं वन्द्यते। संस्काराः क्षणिकाः तर्हि किमर्थं विहारलीलामपेक्षते। सर्वाणि शून्यान्येव विद्यन्ते चेत्तदा किमर्थं गुरुभ्य, धनानि प्रयतन्ते। एतावता बौद्धानां व्यवहारोपदेशयोः महद्वैषम्यमवेक्ष्य तस्य दाम्भिकत्वं सुस्पष्टमेव।

तथाप्येते तथागतपक्षावलम्बिनः स्वपक्ष क्षोदंच्छेतुं स्वपक्षप्रतिपादनकुशलाः क्षणिकविज्ञानवादिनः स्वपक्षप्रतिपादनाय स्वचातुर्यमभिभाषन्ते तथाच ~~तत्र~~ नीलपीतादिक्षणानां क्षणिकत्वं सदा सत्त्वेनानुमातव्यम्। यत् सत् तत् क्षणिकम्, यथा जलधरपटलम्। अर्थक्रियाकारित्वस्य सत्त्वस्य नीलपीतादिक्षणे प्रत्यक्षसिद्धतया क्षणिकत्व हेतोरसिद्धत्वस्यैव वक्तुमशक्यत्वात्।

एवं व्याप्यव्यापकवृत्त्या व्याप्यवृत्तिरिति न्यायेन व्यापकक्रमस्याऽक्रमव्यावृत्ततया क्षणिकत्वाभावात् सत्त्वव्यावृत्तेः सिद्धत्वात्। एवमर्थक्रियाकारित्वस्य क्रमाक्रमाभ्यां व्याप्तत्वात्। एवमर्थक्रियायामपि स्थायीपदार्थतः क्रमाक्रमौ व्यवर्तयन्तौ क्षणिकत्वपक्षएव सत्त्वस्य व्यवस्थामूलकत्वमिति सिद्धम्। अक्षणिकत्वस्य विकल्पासहत्त्वेनार्थक्रियाकारित्वाभावात्। तथाच वर्तमानकार्यसम्पादनसमये स्थायिनः अतीतानागतकार्योत्पादनक्षमत्वं नैव सन्तिष्ठते सामर्थ्यस्य क्षेपायोगात्। अन्यथार्थक्रियाकारित्वस्य सामर्थ्यमात्रानुबन्धित्वेन तदपापक्षस्याऽयोग्यत्वात्। शिलाशकलस्यांकुरोत्पादनाऽप्रयोजकत्वात्। एतावता स्थायीपदार्थाः वर्तमानार्थकतयोत्पादसमयेऽतीतानागतार्थक्रियाकारित्वोत्पादनक्षमत्वं स्वीकुर्युस्तदैककालावच्छेदेनातीतानागतकार्यस्योत्पादनक्षमत्व प्रसंगापातात्। (२)

क्रमविशिष्ट सहकारिकारणस्य स्वीकार्यतयाऽतीतानाग

तयोः स्थायित्वेनार्थक्रियाकारित्वं जायतां को दोष इति चेत् सत्यम्। परन्तु व्याचक्ष्माम् भवान् यत् सहकारिणः साहाय्यमुपकुर्वन्ति न वा? यद्यपेक्षते साहाय्यं तदा नैव सहकारिणः कदापि हातव्याः। नापेक्षते तदा नापेक्षणीयाः वैयर्थ्यात्। तस्मात् सहकारिणः कार्योत्पादक्षमत्वेनाऽनावश्यकत्वात्।

यद्यत्र भवन्तः सहकारिणः भिन्नामुपकारकारणत्वं कार्योत्पादे स्वीकुर्वते चेत्तदा किं तद्भिन्नत्वमभिन्नत्वं वा? भेदपक्षं कक्षीकरोति तदाऽऽगन्तुकस्य सहकारिणः अन्वयव्यतिरेकसाहाय्येनापेक्षितस्य कार्योत्पादने ~~कार्य~~ कारणत्व स्वीकारात्। नैव क्षणिकभावस्य कारणत्वम्। कथंतु कार्याणामन्वयव्यतिरेकानुविधायित्वात्। अतएवोक्तञ्च —

वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः॥

किञ्च सहकारिजन्योऽतिशयः किमतिशयान्तरं प्राप्नते न वा? उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गापत्तेः। अतिशयान्तरपक्षे अनवस्थाऽऽपद्येत।

एवं सहकारिकारणैः सलिलपवनादिभिराधीयमानेऽतिशये बीजे बीजान्तरोत्पादकाभ्युपेयतया एवं तस्यापि सहयोगिकारणान्तरापेक्षतयाऽनवस्थापातात्। बीजस्यातिशयाधानपूर्वकतया सहकारिकारणसापेक्ष्यमाधत्ते। अन्यथा सर्वदा तेषां जायमानतयाङ्कुरस्यापि नितान्तमुत्पद्यते। तेनातिशयार्थं स्वीकुर्वद्भिः सहकारिकारणैः बीजस्यातिशयान्तरस्यावश्यकत्वात्। तस्मात् सहकारिकारणसम्पद्यमानबीजगतातिशयस्य सहकारिकारणसापेक्षबीजस्य कारणत्वेऽनवस्थायाः सौलभ्यात्।

एवमन्योपकारः कार्योत्पत्तये नितरामपेक्ष्यमाणेऽपि बीजनिरपेक्षं कार्यं जनयति बीजमपेक्ष्यमाणः सन् कार्यं जनयति वेति। तत्रप्रथमे कार्योत्पत्तौ कारणस्य साहाय्येनैव बीजस्य कारणतया तदभावात् बीजादेरहेतुत्वमेव समापतेत्। द्वितीये अपेक्षितबीजस्य कारणमूलकत्वेन नितरामतिशयस्य तदङ्गीकर्तव्यमेव। एवं क्रमेण तत्रतत्रावस्थायां बीजोत्पन्नातिशये पुनरतिशयानामनन्तपरम्परापर्यन्तं नितरामनवस्थादोषस्य विद्यमानत्वात्।

यदि भावाद्भिन्नोऽतिशयः सहकारिकारणैराधीयते तदैव पक्षः सदाभ्युपगम्यते भवता तदा परस्यातिशयस्य स्थायीभावावस्थाविशेषे प्राचीनावस्थाऽनतिशयात्मत्वेऽवश्यमेव भिन्नोऽन्यश्चातिशयः सम्पद्येत। एवं कोऽप्यन्यो भावातिशयरूपतया समुत्पद्यते। यदि कुर्वद्रूपतयाऽपि सुतरामनुमन्यते तदनेनापि समागत एव खलु पन्थाः मामकीनः। ~~तस्माद्~~

(१) तथागत दर्शन" "धर्मकीर्ति"

(२) तथागत दर्शन" "धर्मकीर्ति"

तस्मादर्थक्रियाकारित्व क्रमेणाक्षणिकस्य दुर्घटत्वमेव। एतवता तथागत क्षणिकवाद विवेचनेन क्रमनियमोहि स्थायिनः अर्थक्रियाकारित्वं नैव सम्भावयामः। अपितु क्षणिकस्यैवार्थक्रियाकारित्वं स्यात्। सलिलपवनादि सहकारिकारणैरतिशयोत्पन्ने जायमाने स्थायिकारणस्य बीजस्य कार्यान्तेऽदृश्यमानतया स्वपूर्वावस्थायामेव सन्तिष्ठते, तस्मादतिशय एव वैयर्थमाकलयेत्। अतएव सहकारिकारण जलपवनानां वैयर्थ्यमेव प्राप्नुयात्। यद्यवस्थान्तरं गच्छेत् तदा क्षणिकत्वमपि समागच्छेत्।७।

अन्यथाऽक्रमनियममर्यादया ऽक्षणिक पदार्थस्य नैवार्थक्रियाकारित्वं घटते। विकल्पासहत्वात्। तद्यथा —

युगपत् सकलकार्याणि सम्पादयितुं प्रागल्भोऽयं स्वभावः कार्योत्पत्त्यनन्तरं तदुत्तरकालमनुवर्तते नवेति ? सत्यमेतत्। प्रथमकालवत् तदुत्तरकालेऽपि तावत् कार्यमापतेत्। किन्तु नैतादृशी वस्तुस्थितिः। कार्योत्पत्तये केवलं कार्यकारणप्रागल्भोऽयं स्वभावः पुनः पुनः नैव क्षमते। एवं नैव द्वितीयः — कार्योत्पत्त्यये समर्थोऽयं स्वभावः तत् सम्पाद्य परावर्तते। अत एव स्वभावस्य स्थायित्वकल्पना नैव साफल्यमावहेत्। कथंतु मूषिकभक्षित बीजस्याङ्कुरादि जननायोग्यात्। अर्थात् मूषिकभक्षितबीजं यथाङ्कुरान्नोत्पादयति तद्वत् स्वभावस्य स्थायित्वं नैव स्वीकर्तुं शक्नुयादिति। तस्मात् क्षणिकत्वसिद्धौ नापि काचन बाधा लोचनगोचरायते।८।

विरुद्धधर्मस्य नानाप्रकारकतया शीतोष्णवत् परस्परं भिन्नत्वं प्रतीयते तद्वत् स्वभावे विरुद्धधर्माणामध्यारोपः जलधरोऽपि प्रतिक्षणं विभिन्नरूपस्यावगमनतया विरुद्धधर्मस्य नानाप्रकारकत्वं संघटते। कथंतु स्थायिनि पदार्थे कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गः तद्विपर्यस्य सिद्धत्वात्। अलन्तु सामर्थ्यासामर्थ्ययोः विरुद्धत्वेन तत्प्रतिपादयितुमशक्यत्वात्। तस्माद् विपक्षे क्रमयौगपद्य व्यावृत्या व्यापकानुपलम्भेन च गृहीतान्वयव्याप्तिकसत्त्वं क्षणिकत्वपक्ष एव व्यवस्थापयतीति सिद्धम्। तदुक्तञ्च — ज्ञानश्रिया —

यत्सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी-
सत्ता शक्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा न सा।
नाप्येकैव विधाऽन्यथा परकृते नापि क्रियादिर्भवेत्,
द्वैधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यति ॥

यदि तावत् कार्योत्पादनं नैव नैमित्तिकं चेत्तदा सहकारिकारणोपकारेण कार्यमुद्भत एव कारणस्याऽनावश्यकत्वात्। तस्मादुभयाभ्यां क्रमाक्रमाभ्यां क्षणिकवादे पदार्थभङ्गप्रक्रिया सिद्धत्येव। तेन बौद्धानां क्षणिकत्वपक्षे नैव शङ्कावतारः।

((योगाचाराणां विज्ञानवादः))

माध्यमिकानां बाह्यार्थस्य शून्यत्वमङ्गीकृत्याऽन्तरिकशून्यत्वपक्षमुच्छेत्तुं बद्धपरिकरोऽयं धर्मकीर्तिः पर्यानुयोगस्य कारणात् यया धियां प्रतिभया समस्तसंसारस्य शून्यत्वमाकलयति सापि खलु बुद्धिः विज्ञानात्मिकेति कथन्न स्वीकुरुत इति व्याजहार। स्वयं वेदनमपि तावदङ्गीकार्यम्। अन्यथा जगदान्ध्यं प्रसज्येत। तथा च धर्मकीर्तिः —

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति।

यया धिया वयं पदार्थान् जानीमः तस्याः धियः सत्त्वं सर्वथाऽवगन्तव्यमेव। अतः विज्ञानस्यैव मन्तव्यतया विज्ञानवाद एव देशान्ते व्यवहृतः। तथैवायं सम्प्रदायः न्यायसिद्धान्तमाश्रित्य प्रावर्तत बौद्धानां दर्शने। लङ्कावतारसूत्रं नितरामस्य सम्प्रदायस्य प्रामाणिको ग्रन्थः।

तत्र बाह्यग्राह्यं नोपपद्येत, विकल्पानुपपत्तेः। अर्थस्तावत् उत्पन्नानन्तरं ज्ञानग्राह्यः, अनुत्पन्नो वा? नहि तत्र प्रथमकल्पः साधीयान्। कथं तु उत्पन्नपदार्थस्य क्षणिकत्वेन स्थित्यभावात्। प्रथमक्षणानन्तरं तस्य विनाशो समुत्पत्तिक्षणे। ज्ञानेनाऽसम्पाद्यत्वेन पदार्थसत्त्वस्य ज्ञानकारणपूर्वकत्वात्। एवं नापरोऽपि अनुत्पन्नस्याविद्यमानत्वात्।

नन्वेवमतीतपदार्थस्यैव ज्ञानग्राह्यतयाऽपि ज्ञानोत्पादनसम्बन्धादेव तस्य तज्जनकत्वात्। वर्तमानतयावभासविरोधाच्च। यदि तावदतीतकालेऽपि पदार्थज्ञानग्राह्यत्वं स्वीकुरुते चेत्तदा वर्तमानदशायां कथं तस्य प्रतीतिः प्रतीतियुक्ता। तदपि न साधीयान् पक्षः। इन्द्रियादेरपि ज्ञानजनकत्वेन ग्राह्यत्वप्रसंगात्। नन्विन्द्रियजनत्वेन ग्राह्यत्वेनापि परमाणुरूपार्थो ग्राह्यः, किमवयविरूपो वा? नास्ति तत्र चाद्यः कृत्स्नैकदेशविकल्पादिना तन्निराकरणत्वात्। नैव प्रथमपक्षोऽपि ग्रहीतुं शक्यः, अतीन्द्रियत्वात्। षट्केन युगपद्योगस्य बाधकत्वाच्च। तथोक्तञ्च —

षट्केन युगपद्योगात् परमाणोः षडंशता।
तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः॥

तस्मात् स्वातिरिक्तग्राह्याभावात् तदस्वरूपा बुद्धिः विज्ञानस्वरूपा स्वात्मप्रकाशिका प्रकाशवत्। तदुक्तञ्च —

नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥

अत ग्राह्यग्राहकयोर्भेदश्चानुमातव्यः। अस्मादेव कारणात् नैव ज्ञानात् आत्मा भिन्नः। एवं ज्ञानात्मनोः नैव पार्थक्यं विद्यते। यद्वेद्यते येन वेदनेन तत्त्वतो नैव भिद्यते यथा ज्ञानात्मा। नीलादयो वेद्यन्ते तैश्च। एवं विषयविज्ञानयोरभिन्नत्वं व्युत्पाद्य सत्यपि भेदे आपत्तयः प्रदर्श्यन्ते। विषयविज्ञानयोः सम्पद्यमाने भेदे

"स०लि० सं०/ ह०-४२"

मिथ्या -

सति नितान्तमधुनाऽभेनार्थस्य सम्बन्धित्वाभावात्। विज्ञानविषयसम्बन्धप्रतिपादकनियमहेतोः तादात्म्यस्याभावात्। तदुच्यते नियामकत्वाच्च। एवमनेन प्रकारेण ज्ञानेन सहार्थस्य सम्बन्धः नियतोऽस्ति। तयोर्मूलं तादात्म्यमेव। विषयविज्ञानयोः पार्थक्येन नैव तादात्म्यं सन्तिष्ठेत्। एवं विषयविज्ञानयोः वैषम्यं नैव तादात्म्येन संसिध्येत्। ग्राह्यग्राहकसंवित्तीनां पार्थक्यावभासः भ्रममूलक एव। यथैकस्मिन् चन्द्रमसि द्वित्वावभासः भ्रमत्वं स्वीकुरुते। ~~[illegible]~~ अनादिरविच्छिन्नप्रवाहभेदवासनैव निमित्तम्। यथोक्तम्—

सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानै दृश्यतेन्दाविवाद्वये॥

अन्यच्च-

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥ (१)

यदि नाम विज्ञानवादिनः बाह्यार्थान् सम्पत्तान् नितामसद्रूपतया भ्रमत्वमेवाङ्गीकुर्वते चेत्तदा काल्पनिकवास्तविकपदार्थे नैव पार्थक्यं स्वीकुर्युः। अतएव विज्ञानवादिनः प्रस्तुतप्रश्नसन्दर्भमवलम्ब्य नितामचीकथन् यत् रसवीर्यविपाकादिसमान भाशा भेदकोपार्जित मोदकानां भवेदिति वेदितव्यम्। वस्तुतस्तु वेद्यवेदकाकारा विद्युतायाः धियः प्रयोक्तॄणां पज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकारतया तिमिराच्छन्नचक्षुषां नाडीज्ञानभेदात् अनादिज्ञानवासनासामर्थ्यात् व्यवस्थोपपत्तेः। तथोक्तञ्च—

अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते।
विभक्तलक्षणा ग्राह्यग्राहकाकारविप्लवा॥

वास्तविकन्तु वेद्यवेदकाकारयोः नैव बुद्धिः किन्तु भ्रमतिमिराक्षुपहतानां ग्राह्यग्राहकयोः नितान्तभाकारसमाच्छन्नत्वं मनुते। अतएव—

तथाकृतव्यवस्थेयं केशादिज्ञानभेदवत्।
तदा यदा न संचोद्या ग्राह्यग्राहकलक्षणा॥

तस्मात् ग्राह्यग्राहकयोः केशादिज्ञानभेदवत् अनादिवासनावशात् अनेकाकारतया बुद्धिरिवावभासते।

पाश्चात्यदार्शनिकप्रत्ययवादः नितान्तं विज्ञानवादमनुकरोति। प्रत्ययवादिनः विचारानुसारं संसारे यावन्ति वस्तूनि लोचनगोचरतां प्रयान्ति तानि प्रत्ययप्रक्षिप्तान्येव विद्यन्ते। प्रत्ययव्यतिरिक्ततया नहि बाह्यार्थः केनापि रूपेण लो

चनगोचरतां याति। तेन समुद्दिङ्कित भावना चतुष्टय प्राबल्यादविल वासना विच्छेद विगलित विविध विषय विनाश विशुद्ध-विज्ञानोदयः प्रभवति। नान्यथा दुराशा मात्रमेव।

किन्त्वन्ये बाह्यार्थानुमेयवादिनः सौत्रान्तिकाश्च बाह्यं वस्तुजातं नास्तीति नैव मन्यन्ते। प्रमाणाभावात्। न च सहोपलम्भ नियम एव तत्कृते प्रमाणमस्तीति वक्तुं शक्यमेव। वेद्यवेद्यकयोर्भेदसाधकत्वेनाभिमतस्य सहोपलम्भनियमस्याप्रयोजकत्वेन विपक्षव्यावृत्तिकस्यानिश्चयात्।

एतावता वचन विन्यास प्रबन्ध कदम्बेन धूमाग्नि संसर्गप्रदर्शन वेलायां वह्न्यभाव माकलयति विपक्षे देशान्तरीयः कालान्तरीयो वा धूमस्तत्र तत्र वा प्राप्यते। किन्तु विपक्षे नैव कदापि प्राप्येत। धूमाग्नि कार्य कारण विनाशमुखेनैव समीचीन तर्कस्य प्रयोजकत्वमुपात्तम्। तद्वत् सति भेदे सहोपलम्भ नियमस्य प्रयोजकत्वात्।

नन्वत्र सत्यपि भेदे सहोपलम्भ नियमस्यैव नैव प्रयोजकत्वं स्यादिति चेन्न। ज्ञानस्यान्तर्मुखतया तयोर्भेदस्य प्रतिभासमानत्वात्। एवं सहोपलम्भ नियमस्यार्थसमाजग्रस्तत्वात्। यतो ज्ञानस्यात्मनिष्ठत्वात् विषयस्य बाह्य वस्तु निष्ठत्वात्। विषयस्य पूर्व क्षणे विद्यमानतया ज्ञानस्योत्तर क्षणे जायमानतया भयोरेक देश वृत्तित्वैकत्वयोरसम्भव ग्रस्ततया सहोपलम्भ नियमन योद्धायाः प्रयोजकत्वात्। किञ्च नीलपीताद्यर्थस्य ज्ञानाकारत्वे ज्ञातुरात्मनः अहम् प्रत्ययवत् बाह्य पदार्थस्यापि तदापत्तेः।

यच्चोच्यते भवता तदा ज्ञानस्य भ्रान्त्या स्व स्वरूपत्वेऽपि नीलाकारोऽपि बहिर्वत् निताभवकुल्पत इति। तथोक्तञ्च-

परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः।
ज्ञानस्याभेदिनो भेदे प्रतिभासोऽप्युपप्लवः।

अतएव बाह्यार्थानुमेय वादी सौत्रान्तिकः योगाचार समर्दं व्यचहारमिदं वचः यत् धियो बोधस्तावदहं प्रत्ययेनैव सञ्जायते। किन्तु बाह्यार्थ पदार्थस्तु इदं प्रत्ययेनैव। यदि समस्त पदार्थस्य धियात्मकत्वं विद्यते चेत् तदाहं प्रत्ययेनैव कर्थ्यते नावकुह्येत्। विज्ञान वादिना तथागतेन कल्पित पक्ष एवोदीर्यते। अनादि वासनया समाच्छन्न विज्ञान भ्रमेणैव बहिर्वद् प्रतीयते। न तु वस्तुगत्या। अर्थात् मिथ्याज्ञान वासनयैवाऽभेदे भेदस्याध्यासः। यथा सत्यपि शंखे धवल

त्वस्य सर्वजनप्रतीतिसमाच्छन्नत्वेऽपि पाण्डुरोगाद्युपहतेन चक्षुषा पीतः शंख इत्यवभासते। तथाहि प्रत्ययस्य ज्ञानस्वरूपतया तदनन्तरत्वं समाच्छाद्य बाह्यत्वमवभासते ऽ~~[illegible]~~नादिवासनाद्युपहततयेति। अतएव सौत्रान्तिकाः बाह्यपदार्थस्य शून्यत्वमेवानुमन्यन्ते। अपितु बाह्यार्थाः बाह्यार्थानुमेयवादिभिरनुमीयन्ते। अतएव सर्वसिद्धान्तसंग्रहे नितान्तमेवमभीभणत्—

नीलपीतादिभिश्चित्रैर्बुद्ध्याकारैरिहान्तरैः ।।

तेन सौत्रान्तिकमते नित्यं बाह्यार्थस्त्वनुमीयते सौत्रान्तिकेन। तन्न। बाह्यार्थाभावे तद्व्युत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेः वैयर्थ्यात्। नहि वसुमित्रो ~~नहि~~ ~~बन्ध्यापु~~ बन्ध्यापुत्रवदवभासते। भेदज्ञानस्य भ्रान्तत्वे विषयविज्ञानयोर्भेदप्रतिभासस्य भ्रान्तत्वेनान्योन्याश्रयप्रसंगात्।

तात्पर्यमिदमाकलितं यत् विज्ञानवादी ज्ञातृज्ञेययोः भेदप्रतिभासं स्वीकुरुते भ्रान्ततयैव। अस्यैव तत्साधनतामाकलय्य ज्ञातृज्ञेययोः भिन्नत्वं मनुते वस्तुगत्या। अस्मादेव कारणात् अभेदप्रतिभासस्य साधनत्वमाकलय्य भेदप्रतिभासस्य भ्रान्तिमूलकत्वं नितान्तमदर्शि सौत्रान्तिकेन।

यदक्षपादीयास्तु लौकिकदृष्ट्या पदार्थस्य भेदप्रतिभासमाकलयन्तः बाह्यवस्तुनोऽपि सत्त्वमङ्गीकुर्वते। अतएवाक्षपादीयेन विदुषा सह नात्राऽस्माकं वैमत्यम्। सौत्रान्तिकवैभाषिकौ आन्तरबाह्यसत्त्वमवागच्छतः। किन्तु तदपरे माध्यमिकाः सर्वेषां शून्यत्वमेव स्वीचक्रिरे। विज्ञानवादिनस्तु केवलमान्तरमेवाङ्गीकुर्वते। नैयायिकास्तु केवलं सर्वेषां सत्त्वं स्वीकुर्वन्तोऽपि बाह्यपक्षमेव स्वीचक्रुः।

~~[illegible]~~ एवंच विषयविज्ञानयोर्भेदप्रतिपादनाय यद्धेतुवाक्यमाचक्षते तदपि न साधीयान् पक्षः। गोमयपायसीन्यायेनाभासत्वात्। यथा गोमयं पायसं गव्यात्" अत्र गोमयस्य पायसत्वं संसिद्धुं प्रतिपादितगव्यत्वहेतोरप्रयोजकत्वात्। ~~ओ~~ अतएवानुमाने हेत्वाभासत्वं संगच्छत एव। बहिर्वदिति वदता बाह्यग्राह्यत्वमेव स्वीक्रियते। तस्मात् भवदीयबाणा एव भवन्तं प्रहरेदिति।

ज्ञानात् भिन्नकालस्य प्रतिपाद्यतया सर्वेषां क्षणिकत्वेन ज्ञानस्यापि क्षणिकत्वं कृत्वा विषयस्यापि क्षणि

कत्वं सिद्ध्येत्। अतः ज्ञानवेलायां नितान्तमर्थस्य ग्राह्यत्वमनुपपन्नमेव। यदि च पूर्वापरक्रम एव सम्पद्यते तदा तत्क्षणावच्छेदेन ज्ञानाभाव एव सिद्ध्यति। अत एवायं संसारभावः नितान्तं युक्तियुक्त एव प्रतिभाति।

इन्द्रियसन्निकृष्टस्य विषयस्योपपाद्ये ज्ञाने स्वाकारसम्पर्कतया तदपरक्षणे समर्पिताकारेण सोऽयमर्थः नितान्तमनुमीयते। एतावता सर्वविषयस्य क्षणिकत्वात् अर्थक्रियाकारित्वप्राबल्यतया तदपरक्षणे स्वाकारसदृशं तदाप घटं प्रस्तौति। पूर्वक्षणविशिष्टघट एव इन्द्रियसम्पर्कं प्राप्य ~~तद्वि~~ ~~बुद्धि~~ ~~[illegible]~~ तदभिन्नक्षणे स्वाकारसदृशं ज्ञानं जनयति।

अनया ज्ञानाकारतया पूर्वक्षणविशिष्टो घटः नितान्तमनुमीयते। अनया पद्धत्या विषयाणां ~~ज्ञानग्रा~~ ज्ञानग्राह्यत्वं सम्भवति। परन्तु सत्यपि सम्भवे अनुमेय एव वास्तविकं न तु प्रत्यक्षम्।

तथोक्तञ्च —

भिन्नकालं कथं ग्राह्यं इति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव च व्यक्ते ज्ञानाकारार्पणक्षमम्॥

तथा च स्थूलानि शरीराणि समवेक्ष्य भोजनमनुमीयते यथा तथा भाषया देशः, सम्भ्रमेण स्नेहः तथा ज्ञानाकारेण ज्ञेयमप्यनुमेयमेव। तदुक्तञ्च —

अर्थेन घटयत्येनां नहि मुक्त्वार्थरूपताम्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥

नहि वित्तिसत्तैव तद्वेदना। यतोहि तस्याः सर्वत्राविशेषात्। यतोहि ज्ञानस्य सत्ता व्यापिका, तस्मात् घटज्ञानपटज्ञयोः नैव पार्थक्यं विद्यते। अतएव वित्तिसत्ता विषयसत्ता च भिन्नैवाग्यते। तत्र सारूप्यं वित्तौ ज्ञाने वा प्रविश्य सद्रूपयितुं घटयेत्। बाह्यार्थसत्त्वमुपपादयितुं यत् यस्मिन् विद्यमाने कादाचित्काः भवन्ति ते सर्वे तदतिरिक्तसापेक्षाः। यथा— अविवक्षति अजिगमिषति वा तदा वचनगमनप्रतिभासाः पुरुषान्तरसापेक्षाः। तथा च प्रस्तुतप्रसङ्गान्तर्गताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलादिरूपतया जायन्ते।

अयमाशयः नीलादिरूपतया प्रत्ययमानाः घटपटादयोहि प्रतीतिविषयतां गच्छन्ति। तावदिदमेव प्रवृत्तिविज्ञानम्। प्रवृत्तिविज्ञानस्याश्रयतयालयविज्ञानमुच्यते। तस्मात् सौत्रान्तिकः तादृशं सिद्धान्तं नितान्तमुच्छेत्तुं प्रयोगादिकं सदा प्रयुङ्क्ते।

योगाचारास्तु नितान्त मद्वैतवादिनः। शुद्धविज्ञानप्रत्ययस्य चैतन्यस्य वा सत्तां स्वीकुर्वते। यद्यपि सर्वेषां कृते धियामेकरूपत्वमेव स्वीकुरुते तथाप्यनादिवासनायाः कारणादद्वितीयमानतयाऽस्य रूपाणि कोवा रोत्स्यते।

विज्ञानवादिनस्तु बौद्धाः तावदवस्थाविशेषभेदेन विज्ञानस्य द्वौ भेदौ स्वीकुरुतः। एकमालयविज्ञानं तदपरं प्रवृत्ति विज्ञानम्। यथा पारावारस्य पवनप्रेरितचञ्चलतरङ्गः नैव कदापि विरमति तथा बाह्यविषयप्रबलप्रवाहवैलक्षण्येनालयविज्ञाने विचित्रतरङ्गोदयः नैव कदापि विरमन्ति। एवं नायं तरङ्गः कदापि क्षीयते। तथाञ्च विज्ञानवादिनः—

तरङ्गा उदधेर्यद्वत् पवनप्रत्ययेरिताः।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न वर्तते॥
आलयौघस्तथा नित्यं विषयपवनप्रेरितः,
चित्रैस्तरङ्गविज्ञानैः नृत्यमानः प्रवर्तते॥

आलयविज्ञानस्य सप्त भेदाः विद्यन्ते। तद्यथाहि—
चक्षुर्विज्ञान श्रोत्रविज्ञान घ्राणविज्ञान जिह्वाविज्ञान कायविज्ञान मनोविज्ञान क्लिष्टमनोविज्ञानभेदात्। इमे विज्ञानवादिनस्तु विज्ञप्तिमात्रतासिद्धौ विज्ञानभेदयक्षमा कल्प्य ~~सम्यक्~~ सम्यक् विवेचयामासुः। तत्रालयविज्ञानं नामाहमास्पदं विज्ञानम्। तेन विज्ञानवादिनः विचारानुसारं आलयविज्ञानस्वरूपमेवात्मेति सुतरामाकलयन्ति। ~~नील~~ नीलाद्युल्लेखि च विज्ञानं प्रवृत्तिविज्ञानं निर्वक्ति। तथाच—

तस्मादालयविज्ञानं यद्भवेदहमास्पदम्।
तस्मात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥

एतेषां विचारे सर्वस्य क्षणिकत्वेनापि आलयविज्ञान ~~सन्तानं~~ सन्तानातिरिक्तः कदापि प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव। मतावत् तदनुसारं वासनापरिपाकप्रत्ययस्य कादाचित्कतया समुत्पद्यते। विज्ञानवादिनस्तु एकसन्तानवर्तिनामालयविज्ञानानां तत्प्रवृत्तिविज्ञानजननशक्तिर्नाम वासना। अहमित्याकारक क्षणिकालयविज्ञानपरम्परा प्रतिजीवानां भिन्नैव। तेनैव प्रवृत्तिविज्ञानं सदा प्रवर्तते। अस्मादेव हेतोः तत्तदालयविज्ञानाद्यातिलयविज्ञानं तत् तद्प्रवृत्तिज्ञानं जनयति। अमुना क्रमेणालयविज्ञाने या खलु प्रवृत्तिविज्ञानोत्पादिका शक्तिः सैव खलु वासना। तस्याश्च स्वकार्योत्पादं प्रति सदाभिमुख्यं भजते तस्य परिणामः।

दुःखं संसारिणस्कन्धाः तेच पञ्च प्रकीर्तिताः॥

वासनायाः क्षणिकत्वात् तत्परिपाकोत्पन्न प्रवृत्तिज्ञानं नैव कदापि लोचनपथे समागच्छति। प्रथम क्षणवर्तिनी वासना तदुत्तर क्षणवर्तिन्यां वासनायां फला। अतः समस्त वासनायाः आलय विज्ञान परिपाकारणतया स्वोत्तर क्षणजायमान वासनायाः परिपाक कारणत्वं स्वीक्रियते। ततश्च प्रवृत्ति विज्ञान जनकालय विज्ञान वर्त्ति वासना परिपाकं प्रति सर्वेऽपि आलय विज्ञान वर्तिनः क्षण पदार्थाः सामर्थ्यं भजन्त एव दरीदृश्यन्ते। क्षणिक वासनायां समस्तायां नैवं विध्वंसानन्तरं विलय इति वक्तुमशक्यम्। आलय विज्ञान सन्तान वर्तित्वाविशेषात्।

समस्त क्षणिक वासनायां समस्तायां तस्य सामर्थ्यस्य विद्यमानतयाऽपि कार्यकाल क्षेपानुपपत्तिः स्यादिति चेत् सत्यम्। किन्तु कादाचित्कत्व निर्वाहाय शब्दस्पर्शरूपरसगन्ध विषयाः सुखादि प्रत्ययफलाः षडपि प्रत्ययाः चतुरः प्रत्ययान् प्रतीत्य नितरां नितान्तं जायन्ते। अनिच्छताऽप्यच्छमतिना चतुरेण स्वानुभवमनाच्छाद्य परिच्छेत्तव्यम्। अन्यथा समस्त जगतीतलस्य सामर्थ्ये आलय विज्ञानवर्ति वासनायाः नितान्त क्षणिकत्वेन कार्यं विज्ञान वादिनः कार्याणां कादाचित्कत्वेन जायेरन् कादाचित्कत्वस्य व्याघातापातात्।

एवञ्च विवेकविलासे तथागत पक्षावलम्बिना बौद्धभिक्षु प्रवरेण स्वसिद्धान्त वाक्यानि नितान्तम्याणि —

बौद्धानां सुगतो देवो विश्वस्य क्षणभङ्गुरम्।
आर्य सत्याख्यया तत्त्व चतुष्टयमिदं क्रमात्॥
दुःखमायतनं चैव ततः समुदयो मतः।
~~मार्गस्य~~ मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च।
पञ्चेन्द्रियाणि शब्दाद्या विषया पञ्च मानसम्॥
धर्मायतनमेतानि द्वादशायतनानि तु।
रागादीनां गणो यस्मात् समुदेति नृणां हृदि॥
आत्मीयात्मीय स्वभावाख्यः स स्यात् समुदयः पुनः॥
क्षणिका सर्वसंस्काराः इति या वासना स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते॥
प्रत्यक्षमनुमानं च प्रमाण द्वितयं तथा।
चतुष्प्रस्थानिकाः बौद्धाः ख्याता वैभाषिकादयः।
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते॥

सौत्रान्तिकेन प्रत्यक्ष ग्राह्योर्थो न वहिर्मतः ॥
आकार सहिता बुद्धि र्योगाचारस्य सम्मता ।
केवलां संविदां स्वस्थां मन्यन्ते मध्यमा पुनः ॥
रागादिज्ञान सन्तान ~~[illegible]~~ वासनोच्छेद सम्भवा ।
कृत्ति कमण्डलु मौण्ड्यं चीरं पूर्वाह्ण भोजनम् ।
संघो रक्ताम्वरत्वं च शिश्रिये बौद्धभिक्षुभिः ॥

आचार्य शङ्करस्तु ब्रह्मसूत्रभाष्ये निगमागमसम्मततया प्रवलतार्किक प्रमाणेन विज्ञान पक्षं चिच्छेद। विज्ञानवादिनः वाह्यार्थाभाव सिद्धान्तं स्वीकर्तुं नैव शक्नुवन्ति। घटपटादि विषयानुभवस्य सर्वजन प्रसिद्धत्वात्। वाह्य पदार्थस्य विज्ञानात्मकत्वेऽपि वाह्यार्थस्य बहिर्वत् प्रतिभासमानत्वात्।

अमुना क्रमेण वाह्यार्थस्य स्वतन्त्र सत्ता स्वीकार्यैव। सादृश्यस्य प्रतीतिरपि तदुभय पदार्थ स्वतन्त्र सत्तायामवलम्बिता। जाग्रत् जातः स्वप्नवत् मायिकत्वं प्रतिपाद्य तत्प्रतिपादनं वास्तविक सत्यतः दूरमेव। स्वप्नानुभूत पदार्थाः सति जागरणे वाध्यते। किन्तु जागर्तिवस्थायां समुपलब्ध वस्तूनां वाधः नैव शोभते देवदत्त वन्ध्या पुत्रवत्। स्वप्न दर्शनस्य स्मृतिरूपतयावबोधः, परन्तु जागरावस्थायां तद्दर्शनं तु समुपलब्धि मात्रम्। तस्मादुपलब्धि स्मरणयोः भेदः स्पष्टमेव। परिस्थित्यामस्यां जगदिदं स्वापजगद्वत् प्रतिपादनं केवलं कपोल कल्पना मात्रमेव।

शून्यवादस्य कल्पनापि नितान्तमतार्किकी। प्रमिति प्रमाता प्रमेय प्रमाणानां तत्त्व चतुष्टय शून्यत्व मुदीर्य तेषामवस्तुत्व कल्पनं नितान्तं हास्यास्पदं विधत्ते। आचार्य कुमारिल भट्टोऽपि श्लोक वार्तिके शून्यवाद सिद्धान्त जालानि स्वतार्किकोहापोहाभ्यां सप्रमाणं पर्यहात्। मल्लिषेणोऽपि स्याद्वादमञ्जर्यां ~~नित~~ नितान्त मति संक्षिप्त वचनेन पक्षमिमं तिरश्चकार।

आत्मनो पञ्चस्कन्धात्मकत्वं स्वीकर्तुं समुद्यताः बौद्धाः कथं निर्वाण पदवीं लभन्त इत्यपि महदाश्चर्यं प्रतिभाति। यत्तावत् स्कन्ध पञ्चकः महान्तं पुण्यमासाद्य तत्वतीतस्यैव वस्तु सम्भवत्। तस्मात् विषम वेलायां पूर्वप्रदर्शित दोषस्य तादवस्थ्यमेवेति श्रेयान् पक्षः। वैषम्यमिदं निराकर्तुं ते वासनामकल्पयन्। पूर्वज्ञानेनोत्तरज्ञाने समुत्पन्ना शक्तिरेव तावत् वासना। अतएव स्याद्वादमञ्जर्यां प्राहुः यत् —
॥ पूर्वज्ञान जनितामुत्तरज्ञाने शक्तिमाहुः वासनेति ॥ प्रत्यक्षतस्तु वा-

सनायाः सम्बन्धः क्षणसन्ततिना नैव युक्तियुक्तः। एवं स्वयमपि वासना निर्विषयैवाभाति।

मृगमदवासनावासितवसन इव पूर्वक्षणादारभ्योत्तरक्षणपर्यन्तं वासितवासनायाः स्वरूपस्य स्थायित्वविरहेण कथं वासनायाः सङ्क्रमणशीलत्वं नितान्तमुपपद्येत। तथापि स्थायिनि वसने सत्वे मृगमदवासना साधीयसी। परन्तु परमक्षणिकानां नितान्तं क्षणिकत्वेन वासनाया कस्तावत् आधारतया प्रतीयेत। अतएव तथागतदार्शनिकानां विषमवेलायां वासनायाः कल्पना तथागतदार्शनिकानामेवाद विभ्रममपाकर्तुं नैव शक्नुयादिति।

आलयविज्ञानं स्वीकृत्य कथं बौद्धास्तद्वदजस्रं नितान्तमात्मानमुपेक्षन्ते। इत्याश्चर्यमेव। किन्त्वात्मनः ~~प्रतिनिधि~~ प्रतिनिधित्वं नितान्तमकलयत् आलयविज्ञानं तत्कार्यं स्वीकुरुते। तथाप्युभयोः सुतरां वैषम्यं स्पष्टमेव। ~~यदि~~ यदि पक्षान्तरमिति वक्तुं नैव शक्नोति कोऽपि बौद्धः। आत्मा तु नितान्तमपरिवर्त्यः। किन्त्वालयविज्ञानं क्षणे क्षणे परिवर्तनं धत्ते। विज्ञानान्तरं तु क्रियाशीलत्वं ~~स्वीकुर्वती नाङ्गीकुर्वती वा~~ स्वीकुर्वत् नाङ्गीकुर्वत् वा ऽऽलयविज्ञानं सततं विज्ञानस्य प्रवाहतन्मयतया तन्मयत्वं स्वीकुरुत एव। अतएव नालयविज्ञानधारा शान्ततामाकलयति। अतएवालयविज्ञानसन्ततिः ~~प्रतिक्षण~~ सर्वत्र विद्यमानैव। इदमेवालयविज्ञानं समष्टिचैतन्य प्रतीकमात्ममवलम्बते। तथाप्यात्मालयविज्ञानयोः पार्थक्यमपाकर्तुं ~~ग~~ गीर्वाणगुरुरपि नैव प्रगल्भतां भजते।

यद्यपि तथागतस्य दर्शनसिद्धान्तमहीरुहस्य मूलभित्तिः नितान्तमुपनिषत्साहित्यमेव विद्यते। अकिञ्चित्करत्वं कर्मकाण्डस्य, यज्ञानुष्ठानविहितहिंसाप्रतिषेधतया वेदवाक्यानां परित्यागः, भवप्रपञ्चमूले नितान्तमविद्यायाः कारणत्वं, तृष्णाविनाशजन्यरागद्वेषात्मकबन्धनान्मुक्तिः कर्मसिद्धान्तव्यापकत्वं सुस्पष्टमेव। तथापि तथागतानां क्षणिकाऽनात्मशून्यविज्ञानवादादयः वैदिकसिद्धान्तमूलमुच्छेत्तुं नैव कदापि सङ्कोचं जगृहुः। तथा चोक्तमपि—

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥

मुक्तकच्छानां पक्षमसहमाना विबुधाः केनाप्युपायेन स्थापित्वमादाय क्षणिकत्वपक्षमुच्छेत्तुं सदेन्त्वमाचक्षते यत् यद्यात्मा स्थायी नास्वीयेत तदा लौकिकपारलौकिकफलसाधनोपा

दानस्य वैफल्यं केन वार्येत। चिन्तमिदं प्रतिभाति यत् मुक्तकच्छानां बौद्धानां क्षणिकत्वविचारपक्षमाक्षिपति दिगम्बरः। समेषां वस्तूनां प्रतिक्षणं परिवर्तनतया कार्यं सम्पादयतां जनानां फलाकलनसमये तद्विरहेण परपुरुषकृतकर्मणः फलं परेणैव भुज्येत। तत्रान्यार्थपक्षः तव्याघातानां साधीयान्। अन्यः करोति तदन्यो भुङ्क्ते फलमिति ~~नितान्तमापद्येत~~। नितान्तमापद्येत। तस्मात् योऽहं प्राक् कर्म अकार्षं सोऽहं तं प्रति तत्फलं भुञ्जे इति। अनेनात्मनः स्थायित्वं सूचयति।

पूर्वापरकालानुयायिनः स्थायिनस्तस्यात्मनः स्पष्टं प्रत्यक्षप्रमाणेनावगमनतया पूर्वापरविभागविकलकालकलावाच्छित क्षणिकत्वपरीक्षकैरर्हद्भिः नैव परिदृश्यते। यद्येवं तावत् भवन्तः स्वीकुर्युश्चेत्तदा प्रमाणवाक्यकदम्बेन समायातं क्षणिकत्वसत्तायाः प्रवाहं नितरां कोऽप्यत्र किं रोत्स्यते। अतएव यत् सत् तत् क्षणिकमिति प्रमाणवाक्येन क्षणिकत्वस्य प्रमिततया तदनुसारि समानसन्तानवर्तिनामेव प्राचीनः खलु प्रत्ययः कर्ता तदनन्तरित उत्तरः प्रत्ययः फलभोक्तेति स्वीकृतः।

एतावता बौद्धानां नितान्तमयमाशयः प्रतिभाति यत् लोकव्यवहारविरुद्धमान्याऽपि प्रमाणवाक्यकदम्बेन परीक्षितेति स्वीकर्तुं गीर्वाणगुरुणा मपि दुष्करमेव। तेन समेषां स्वप्रत्ययसन्तानपरम्परा विलक्षणैव प्रतिभाति। तत्र सन्तानपरम्परायां पूर्वापरभेदेन क्षणिकत्वमापेक्षिकमेव।

मन्यतां तावत् रामप्रत्ययसन्तानपूर्वक्षणे वर्तमानः रामगतात्मप्रत्ययः यदि किमपि कार्यं कर्तुं क्षमते चेत्तदा तत्फलान्यपि तादृशरामगतात्मप्रत्ययोऽवश्यमेव भोक्ष्यते। नात्र कश्चन विवादावसरः समुपसर्पति। अतएव पूर्वापरक्षणेषु कार्यकारणभावस्य नियामकत्वेनैव नातिप्रसङ्गः स्वप्नेऽपि सम्भवति। एकस्मिन्नेव प्रत्ययसन्तानक्षणे पूर्वापरानुसारं कार्यकारणभावः सन्तिष्ठते। यतोहि एकप्रत्ययसन्तानक्षणं तदपरसन्तानक्षणे नैव कारणं भवितुमर्हति। एवं स्वप्रत्ययसन्तानक्षणानन्तरमपि तत्क्षणस्यैव कारणत्वं सम्भवतीत्यतो नापि कश्चन शंकावतारः।

यथा मधुररससम्भालितानाम्रबीजानां परिकर्षितभूमावुप्तानामङ्कुरकाण्डस्कन्धपल्लवानां तद्द्वारा परम्परयैव फले माधुर्यं सम्पद्यते। एवमेव लाक्षारसाभिषिक्तानां कार्पासबीजादीनामङ्कुरादिपरम्परया कार्पासो रक्तत्वमभिगच्छति। तस्मात् पूर्वोक्तवत् कृतकर्मणः फलान्यपि तद्गतपरम्परया तद्गत ~~सन्तान~~ प्रत्ययसन्ता

॥ आहुति दर्शन ॥

मेव कर्तली कुर्वन्ति। तदुक्तम्—

यस्मिन्नेव हि सन्ताने आहिता कर्मवासना।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ (१)

अन्यच्च—

कुसुमे वीजपूरादे र्यल्लक्षाद्यवसिच्यते।
शक्तिराधीयते तत्र का चिन्तां किं न पश्यति॥

एतावता तथागतपक्षावलम्बिना क्षणिकविज्ञानवादिना स्वपक्षसमाधानव्याजमुखेन ~~स्वपक्षोच्छे~~ स्वपक्षोच्छेदक्षोदक्षमं कमनीयं वचः नितरामभ्यधायि। तदपि च कुशकाशावलम्बनमात्रमेव। विकल्पासहत्त्वात्। जलप्रपातगर्त्तायां समापतन् कोऽपि तदुद्दिधीर्षया कुशकाशावलम्बनं कल्पते तद्वत् दोषचञ्चलजलप्रपाते पतन् बौद्धः कुशकाशावलम्बनं कुरुते। परन्तु नानया वाचा निश्चेतनं क्षणिकत्वपक्षमुच्चापयितुमलमेव प्रयासः।

क्षणिकत्वं सम्पादयितुं प्रदर्शित ~~जलधारा~~ जलधारादृष्टान्तेनानेन प्रमाणेन किं क्षणिकत्वं प्रमितं प्रमाणान्तरेण वा? नास्ति तत्र प्रत्ययः। भवदभिमतस्य क्षणिकत्वपक्षस्य क्वचिदप्यलोचनगोचरतया दृष्टान्तासिद्धौ तदनुमानस्यानुत्थानात्। नाप्यपरोऽपि पक्षः स्वसाधनाय प्रगल्भः। पूर्वोक्तन्यायेनैव क्षणिकत्वसिद्धस्य सार्वत्रिकतया सत्त्वानुमानस्य वैकल्यापत्तेः।

अर्थक्रियाकारित्वमेव सत्त्वाङ्गीकारे मिथ्यासर्पदंशादेरप्यर्थक्रियाकारित्वतया सत्त्वापादानात्। अतएवोक्तमपि— उत्पादव्ययध्रौव्यस्यैव सत्त्वमिति प्रतिपादनात्। अनेन तात्पर्यमिदमाकलितं दिगम्बरेण यत् ~~भवदभि~~ भवदभिलषितं क्षणिकत्वं नैव लोचनगोचरायते। परन्तु भवत्प्रदत्तजलधा ~~दृष्ट~~ दृष्टान्तस्य सर्वजनप्रत्यक्षविषयत्वेन दृष्टान्तदार्ष्टान्तयोर्वैषम्यात्।

यद्यपि संसारस्य क्षणभङ्गुरत्वं सर्वसम्मतमेव। अनित्यत्वात्। किन्तु तथागतानां क्षणिकत्वं विलक्षणमेव सर्वेभ्यः। न्यायशास्त्रे क्षणिकत्वं तु केवलं क्षणत्रयावस्थायि। बौद्धानां क्षणिकत्वं तु क्षणवृत्तिमात्रमेव। बौद्धसम्मतक्षणिकत्वस्य नितान्तसूक्ष्मातिसूक्ष्मतया तस्य विभाजनमप्यसम्भवग्रस्तमेव। तस्मात् क्षणिकत्वसम्पादनाय जलधारादृष्टान्तस्याऽनावश्यकत्वमेव। अन्यच्चोक्तप्रकारेण क्षणिकत्वस्य सार्वत्रिकतया सत्तायामपि क्षणिकत्वात् तदनुमानाय शब्दव्यापारस्यापि क्षणिकत्वात् अनुमानस्य वैयर्थ्यमपि

आर्हत “आर्हत दर्शन”

(२) “वीतरांग स्तुति” “सिद्धसेन”

ध्येत। एवं तत्सम्पादनाय प्रकारान्तरोपन्यासस्याऽनावश्यकत्वं सुस्पष्टमेव। तद्यथाहि—

विरुद्धधर्माध्यासस्य सामर्थ्यासामर्थ्यलक्षणाध्यासात् तत्सिद्धिरित्यपि नैव साधीयान्। तेषामनेकान्तवादस्येष्टतया तत्र विरोधासिद्धेः। जैनदार्शनिक सिद्धान्तपक्षमाकलय्य प्रतिपादनेऽपि प्राक् तत्सापेक्षत्वव्यवहारसम्पादनाय स्यात् शब्दप्रयोगमपेक्षते। घटसत्तानुभवसमये देशकालावच्छिन्नत्वमपि तत्रापेक्षत एव। अतएव नेयं घटसत्ता त्रैकालिकी एवं सार्वदेशिका चेति। तत्त्वादियं सत्ता सापेक्षा। नहि द्वौ व्यतया सन्निश्चेतुं क्षमते। स्यादस्ति प्रयोग सम्भावनायां स्वीकुरुते। तेन स्याद्वादसिद्धान्ते सामर्थ्यासामर्थ्य विरुद्धधर्माध्यासयोः किल समावेशे नापि काप्यनुपपत्तिरिति दिगम्बराः। ~~अतएव घटेना~~ अतएव घटे नास्तित्वास्तित्व व्यवहारः तर्कमूलकः। ~~नहि सन्ताव व्यतिरेकेण~~ ~~नहि सन्तानस्व~~ नहि सन्तानि व्यतिरेकेण सन्तान प्रमाणपदवीमधिरोढुमर्हति। ~~यो~~ यतो हि नितरां भाषन्ते बौद्धाः —

एकस्यामेव पर्यायां समुत्पन्नपूर्वक्षणे कर्तृत्वं तदुत्तरक्षणे फल~~भोक्~~ क्तृत्वं नैव कदापि सम्भवेत्। तेन—

सजातीयाः क्रमोत्पन्नाः प्रत्यासन्नाः परस्परम्।
व्यक्तयः तासु सन्तान सच्चैक इति गीयते ॥(१)

नैवमत्र कार्यकारणभावः प्रस्तुतानि प्रसङ्गमुच्छेत्तुमलमस्तीति। नहि शिष्यबुद्धिः उपाध्यायबुद्ध्यनुभूतं कदापि स्मर्तुं शक्नुयादिति। उपाध्यायशिष्ययोः कार्यकारणभाव सम्बन्धस्य विद्यमानतयाऽन्यकृतकर्मणां फलानि नितान्तमन्ये नैव भोक्तव्यानि भवेयुरिति नैव दृष्टं नैव श्रुतं शास्त्रान्तरे क्वचिदपि। तथा च कृतकर्मणां प्रणाशः एवमकृत कर्मणामभ्यागमप्रसङ्गात्। तदुक्तञ्च सिद्धसेन वाक्यकारेण—

कृतप्रणाशाकृतकर्मभोग
भवप्रमोक्षस्मृतिभङ्गदोषान्।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ—
(२) न्नहो महासाहसिकः परोऽसौ॥"वी॰स्तु"

तस्मात् उल्लिखितोदाहरणे उपाध्यायानां कृतकर्मणां प्रणाशतया, अकृतकर्मणां फलप्राप्त्या भवनाशतया वा स्मृतिभङ्गदोषतया च प्रस्तुतदोषान् नितान्तमुपेक्ष्य क्षणवादमिच्छन्नहो विपक्षः साहसिक एव। एवंप्रकारेण कुमारिल शङ्कर जयन्त मल्लिषेण प्रभृतयो दार्शनिकशिरोमणयः कृतप्रणाशाकृतकर्मभोग भवभङ्ग मोक्षभङ्ग स्मृतिभङ्ग प्रभृति पञ्चतर्कान् ~~नितरां~~ नितरामादाय बौद्धानां क्षणपक्षं निराचक्रिरे। जयन्तभट्टास्तु उच्चमवोचन् यत्—

शून्यवादे तन्यापि-

न्यायमञ्जरी - जयन्तभट्ट॥

॥स० द० स०॥ पृ०-६॥ "जैनदर्शन"॥

श्रीमद्भागवत- स्कं०-५- अ०-४-६,

नास्त्यात्मा फलभोगमत्र मथच स्वर्गाय चैत्यार्चनं,
संस्काराः क्षणिका युगस्थितिभृतश्चैते विहाराः कृताः।
सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते-
बौद्धानां चरितं किमन्यदियतो दम्भस्य भूमिः परा॥
"न्या० म०" - पृ. ३९"

नैव तावदात्मानं मन्यन्ते बौद्धाः। केवलं फलमेव कामयन्ते। स्वर्गाभिलषितुं चैत्यं वन्दन्ते। संस्काराणां क्षणिकत्वमङ्गीकुर्वते। चिरकालं यावत् विहारमपेक्षन्ते। तद्विपरीतमेवावलम्बन्ते। गुरवे धनानि दापयितुं प्रयतन्ते। अतएव तथागतानां पक्षं समवलोक्य दम्भ इति भाषन्ते। तस्मात् तथागतानां चरितं विद्वज्जनमानसाह्लादाय निर्गौ बोभवीति। (१)

यद्यपि भागवतः तथागतात् प्रागेव जैनधर्माणामभ्युदयः प्रामाणिकैः स्वीकृतः। तथापि दीर्घनिकायगवेषणानुसारं जैनधर्मस्य चरमतीर्थङ्कर वर्धमान महावीरस्य तत्कालीन विख्याततमे षष्ठतीर्थङ्करे निगण्ठनातपुत्त नाम्नोल्लेखः नैव प्राप्यते। किन्तु चतुर्याम संवरस्य राद्धान्तं वर्णनान्तं च नितरामवलोकयामः। अनेन वाक्यकदम्बेन जैनधर्मस्य प्राचीनं नाम $\underset{\text{बन्धन}}{\underline{\text{निगण्ठ}}}$ एवासीत्। यत्तु निर्ग्रन्थशब्दस्य रूपान्तरमिति बलदेवोपाध्यायः। भवग्रन्थि विच्छेदतया महावीरोपाधिरिमं प्रादात्। धर्मेस्मिन् रागद्वेषान् विजित्य यथार्थस्थितिवादिनः सिद्धपुरुषाः नितान्तमर्हत्शब्देनोच्यन्ते। तथोक्तञ्च—

सर्वज्ञो जितरागादिदोषवस्त्रैलोक्य पूजितः।
यथार्थस्थितिवादी च देवोर्हत् परमेश्वरः॥(२)

जयति रागद्वेषान् इति जिनः। जैनास्तावत् स्वधर्मप्रचारकसिद्धाः तीर्थङ्करत्वमाकलयन्ति। यत्तु खलु प्रथमस्तावत् तीर्थङ्करः ऋषभदेव एव प्रतिभाति। एतेषां नितामैतिहासिकत्वमवलम्ब्य पुराणग्रन्थेऽपि चर्चा श्रूयत एव। श्रीमद्भागवतस्य पञ्चमस्कन्धे ऋषभमान्यः श्रीमता वेदव्यासेन वर्णितः। ऋषभदेवोऽयं मनुवंशीय महीपतेः नाभेः पुत्रः। एतेषां विजय वैजयन्ती समस्ते मही मण्डले चकासते स्म। एतेषां पुत्राणां सर्वज्येष्ठः भरत एव। यः जड़भरत नाम्ना प्रसिद्धिमगात्।

अयं खलु जड़भरतः स्वनितान्तमौलिक प्रतिभावैलक्षण्येन प्रथमाधीश्वरतया परमां ख्यातिं प्राप। तन्नामस्वीकृत्य देशोऽयं भारतनाम्ना प्रथितः। तथोक्तञ्च——

३॥ लोकस्य यः करुणायामभयमात्मलोक माख्यन्नमो भगवते ऋषभाय तस्मै॥

(१) "जिन दत्त सूरि" "स० ई० स०"

एवञ्च— अजनाभ,= नामैतद् वर्षं भारतमिति यदाभ्य व्यपदिशन्ति। अयमेव ऋषभनाथः जैनानां प्रथमस्तावत् तीर्थङ्कर इति। ब्राह्मणधर्मेऽपि चतुर्विंशत्यवताराणां नितान्तमुल्लेखः सर्वजनवेद्य एवेति निश्चयं प्रतीमः। जैनधर्मेऽपि चतुर्विंशति तीर्थङ्कराः विद्यन्ते। परन्तु मान्यानामालोचकानां सन्देहविषयः विद्यत एवेति निश्चीयते। किन्तु पार्श्वनाथ महावीराणामैतिहासिकत्वे नास्ति सन्देहः।

विवेचकास्तु पार्श्वनाथस्यैवाद्यप्रवर्तकत्वं मन्यन्ते जैनधर्मस्य। महावीरात् प्राक् सार्द्धद्वय शतके काश्यां सः अश्वसेनस्य गेहे जनिं लेभे पार्श्वनाथः। अयं पार्श्वनाथः त्रिंशत् वर्षपर्यन्तं सांसारिक वैभवमाकलय्य तदनन्तरं स्वर्णोपमराज्यं तिरस्कृत्य भिक्षुजीवनं स्वीचक्रे। कियद्वर्षं यावत् कठिनेन तपसा स्वात्मानं पवित्रीकृत्य रागद्वेषौ विजित्य कैवल्यज्ञानं लेभे। अयं पार्श्वनाथः अहिंसा सत्य स्तेयाऽपरिग्रहैः स्वजीवनोद्देश्यं सम्पाद्य तदनुरूपमाचरितुं प्रायतत। किन्त्वयं महावीरस्तु वैराग्यसाधनाय कृतवस्त्रपरिधानं सन्यासितः तत्याज। तेन श्वेताम्बरदिगम्बरयोः प्राचीनकाल एव विचारवैषम्यं प्रतिभाति।

महावीरस्तु (६५६) वैक्रमात् प्राक् सिद्धार्थकुलमलङ्कृत्य पाणिग्रहणमासाद्य त्रिंशत् वर्षावधिके समये स्वाग्रज नन्दिवर्धनस्यानुमतिं स्वीकृत्य वैराग्यभावनया यतिधर्मं स्वीचक्रे। निरन्तरं त्रयोदशवर्षं यावत् नितान्तमुग्रतपसा कैवल्यज्ञानमवाप्य महावीरः जिनपदवीं लब्धवान्।

महावीरस्य निर्वाणानन्तरं ईसातः प्राक् द्वितीय शतके जैनधर्मः श्वेताम्बर दिगम्बर सम्प्रदायं प्राप्य स्व स्व सम्प्रदाय सिद्धान्तानुसारं स्वपक्षसमर्थनाय कृतप्रयासो बभूव। दिगम्बरसम्प्रदाये धार्मिकोग्रता वैशिष्ट्येनावलोक्यते। परं श्वेताम्बरास्तु मानवानां दौर्बल्यं सौकर्यं विचिन्त्य च कतिपयानुशासन शैथिल्यं स्वायत्तीचक्रुः। दिगम्बराणां विचारे नैव कदापि साक्षात् स्त्री कैवल्यज्ञानं प्राप्नुयात्।

तथाचोक्तम्——

भुङ्क्ते न केवली न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सह ॥ (७)

दिगम्बरास्तु सदा दिगम्बरा एव। नग्ना जिनमूर्तिः पूज्यते सदा दिगम्बरेण। दिगम्बर श्वेताम्बरयोः क्वचिदंशे समत्वेऽपि विचारवैषम्यं स्पष्टमेवाऽऽभाति। दिगम्बराणां विपुलसाहित्यं कालक्रम मर्यादया काल कालेन कवलितम्। किन्तु श्वेताम्बराणां वि

(९) ॥ जैन साहित्येतिहासः ॥

विपुलसाहित्यस्य विद्यमानतया दिगम्बरापेक्षया श्वेताम्बरस्य सर्वांशे प्राधान्यं स्पष्टमेव। जैनदार्शनिकसाहित्यस्यानुशीलनतया एवं पर्यालोचनतया च जैनदर्शनग्रन्थान् कालचतुष्टये विभक्तुं शक्यन्ते।
~~आगम~~ आगमाभ्य मध्यान्तरभेदात्। (१)

॥आगम ग्रन्थ॥

जैनधर्ममूलागमरचनासन्दर्भे श्वेताम्बरदिगम्बरयोः नितरां मतभेदः प्राप्यते। मन्यते दिगम्बरेण यत् पूर्वसंज्ञकमूलागमस्य विलुप्ततया श्वेताम्बराणां निगमरूपत्वे समुपलब्धागमः साम्प्रदायिक एव। ~~स्थूल~~ स्थूलभद्रस्याध्यक्षत्वे षष्ठशतके ईसायाः पाटलिपुत्रे जैनयतिसमितौ जैनागमवचनानि संयोजयामास। परन्तु दिगम्बराः नात्र विश्वासमुपैति। तेषां विचारानुसारं जैनागमग्रन्थाः महता कालदुर्योगेन नेशुः।

जैनागमसिद्धान्तानां संख्याः पञ्चचत्वारिंशत् विद्यन्ते। यत्रैकादशाङ्गानि द्वादशोपाङ्गानि प्राप्यन्ते। दशप्रकीर्णाः षट्छेदसूत्राणि, चत्वारः मूलग्रन्थाः, एवं द्वौ स्वतन्त्रग्रन्थौ चेति दृश्यन्ते। एतेषां तावदागमवाक्यरचनाऽर्धमागधीभाषायां विहिता। एवमनेकान्तवादः जीवसिद्धान्तश्च पुद्गलसिद्धान्तोऽपि दृश्यन्ते।

॥आगम काल॥

जैनदर्शनस्य सुव्यवस्थितावस्था विक्रमस्य प्रथमशतके दरीदृश्यते। अस्मिन् प्रथमचरणे जैनदार्शनिकसिद्धान्तप्रणेषुः उमास्वाती कुन्दकुन्दाचार्य समन्तभद्रादयः। दिगम्बरश्वेताम्बरोभय दृष्ट्या उमास्वाती महोदयोऽयं समादृतः। एवं द्वावपि दिगम्बरश्वेताम्बरौ तमेव सिद्धान्तं मत्वा प्रचलितौ। अनेनैव तत्त्वार्थाधिगमसूत्रं व्यरचि। ग्रन्थस्यास्य वैशिष्ट्यं तावदनेनैवावगम्यते खलु समये समये जैनाचार्याः तमेव सूत्रमधिकृत्य भाष्यं वार्तिकञ्च प्राञ्जलभाषयाऽरीरचन्।
तावदिदं तत्त्वार्थसूत्रं जैनदार्शनिकानां कृते प्रकाण्डभाण्डागारमेवाऽऽभाति। स्वयमपि उमास्वाती महोदयः सूत्रस्यास्य भाष्यं प्रणिनाय। ततः द्रविड़देशीयः कुन्दकुन्दाचार्यः प्रथमशतके दिगम्बराणां उमास्वाती महोदयानां समकालिकत्वेन नैकपन्थे स्वीकायते। जैनानामागमग्रन्थाः व्याख्याताः खल्वनेन महात्मना। एतद् प्रणीतग्रन्थाः जैनदार्शनिकानां कृते सर्वस्वतया मन्यन्ते। तद्यथा नियमसारः, पञ्चास्तिकायसारः, प्रवचनसारादयो प्राप्यन्ते। विषयप्रतिपादनशैल्यां विद्वत्ता दृष्ट्या च प्रस्तुतग्रन्थाः महत्त्वातिशयं लभन्ते। यथा वैदिकदर्शने प्रस्थानत्रयभेदेन त्रयोग्रन्थाः प्राप्यन्ते तथा जैनदर्शनेऽपि प्रस्थान

।।जैन दर्शन।। ।।सं० कि० डा० देवराज।।

त्रय भेदतया प्रस्तुत ग्रन्था: प्रतिभान्ति। समन्तभद्रास्तु जैन दार्शनिकानां कानां कृते सात्यन्तं महत्त्वं लभन्ते। एतेषां समयस्तु विभिन्न विचार भेदेन विभिन्नत्वं लेभे। एतेषां ग्रन्थस्य पर्यालोचनया विज्ञायते विदुषा यत् विक्रमस्य तृतीय शतकमेवास्य समय: विद्वद्भि निश्चित:। स्वामी सामन्तभद्रोऽयं तार्किक वैदुष्यबलात् स्वसमये महतीं ख्याति~~क~~मवाप। एतेषां प्रख्यात तमो ग्रन्थ: नितान्तमाप्त मीमांसा विषयक:।

एवं क्रमेण सिद्धसेन दिवाकर हरिभद्र हेमचन्द्र मल्लिषेण यशोविजय प्रभृतयो दार्शनिका: स्वलोकोत्तर प्रतिभा वैदुष्येण पाण्डित्यप्रदर्शनपरान् ग्रन्थान् प्रणीय जैनदर्शनसिद्धान्त कीर्तिकौमुदीमचीचकासन्। (७)

"जैन ज्ञानमीमांसा"

जैन दार्शनिक सिद्धान्त विचारानुसारं जीवस्तु चैतन्यमेव। ज्ञानमेव तस्य लक्षणं विद्यते। अतएव जीवस्तु निसर्गत: अनन्त ज्ञान विशिष्ट:। परन्तु कर्मणामावरण कारणतया तेषां शुद्ध-चैतन्य रूपं नितान्तमस्माकं दृष्ट्या तिरोहितं जायते। सम्यक्-चारित्राश्रयणेनैव जीव: स्व शुद्ध रूपं प्राप्नोति। अतएव जीव: कैवल्य सर्वज्ञताभ्यां मण्डित:।

ज्ञानं द्विविधं प्रत्यक्षपरोक्षभेदात्। प्रत्यक्षपरोक्ष शब्द व्याख्या नितान्तं विलक्षणा। तदेव ज्ञानं प्रत्यक्षं जायते यदात्मना सापेक्षं जायते। इन्द्रियमनसां सापेक्षतया ज्ञानं परोक्षमेव। अर्थात् यज्ज्ञानप्रत्यक्षे स्वयमेवात्मा कारणं नास्ति तत्र सहायान्तरमपेक्षते। अतएव नास्ति तत्र पारतन्त्र्यम्। तदेवं ज्ञानं प्रत्यक्षमाचक्षते जैनदर्शनम्। एवं यज्ज्ञानं इन्द्रिय मनोभ्यां जायते तदेव परोक्षम्।

उमास्वामी विचारानुसारं परोक्ष ज्ञानं द्विविधं जायते मतिश्रुतभेदात्। इमे द्वे ज्ञाने इन्द्रिय मनोभ्यां साहाय्येन सम्भवति:। इन्द्रियमनसो: सम्पर्केण समुद्भूत विषय ज्ञानं मतिज्ञानम्। स्मृति संज्ञा चि~~न्ताभिविवेक~~ न्ताभिनिबोध प्रभृतीनि चत्वारि ज्ञानानानि मतिज्ञानस्य पर्यायतया गण्यन्ते। सामान्यतया इन्द्रियानिन्द्रि जन्य भेदेन मति: द्विविधा भवति। श्रुतज्ञानं शब्दश्रवणानन्तरं जायते। श्रुत ज्ञानं लौकिक विषयेषु सदा प्रवर्तते। मतिज्ञाने नैव शब्दोल्लेख: किन्तु श्रुतज्ञाने शब्दोल्लेखतया पार्थक्यमुभयो: प्रतिभाति।

अनया ज्ञान विवेचनया प्रत्यक्ष ज्ञानानीति त्रीणि प्रकाराणि विद्यन्ते। तत्र दूरस्थित व्यवधान विशिष्ट पदार्थ ज्ञान~~स्य~~मवधि ज्ञानतयोच्यते। यदा जीव: विशिष्ट सात्त्विक साधन साहाय्येन नितान्तमावरणीय कर्मण: क्षमतया दूरस्थित पदार्थ ज्ञानमपि आत्मन: योग्य कारण

॥षड्दर्शन समुच्चय कारिका॥ -४९

कारणतया समुत्पद्यते तदेवावधिज्ञानं बोभवती। अवधिज्ञानमिदं तावत् जन्मकालत एव विद्यते। तदेव भवप्रत्ययेन व्यपदेश्यम्। यस्मै ज्ञानायानुष्ठान नियम व्रतानि नितरामपेक्षन्ते। तदेव गुण प्रत्यय व्यपदेश्यम्। यदा खलु जीवः परकीय प्रवृत्ति रागद्वेष निरोधक कर्माणि क्षीयन्ते तदा परकीय विचारमेवगन्तुं क्षमते। तदनन्तरमेव पर्याय ज्ञानं भवति। ज्ञानानां समस्तावरणीय कर्मणां क्षयमाकलय्य तदात्मा स्वकीय सर्वज्ञरूपतां नितान्त माकलयति। इदमेव तावत् केवलज्ञानं जैन दार्शनिकानां कृते नितरां साधीयः।

~~परं हेमचन्द्राचार्य~~ परं हेमचन्द्राचार्यस्तु स्वप्रमाण मीमांसायां प्रकारान्तर मनुसृत्य विषयमिमं सयुक्त्या प्रत्यपीपदत्। सामान्यतया जैनन्याय विचारपक्ष माकलय्य त्रीणि प्रमाणानि स्वीकुर्वते प्रत्यक्षानुमानागम भेदात्। तत्र प्रत्यक्ष प्रमाणं सर्वजन वेद्यमेव। नानुमानं चार्वाकाः क्षमन्ते। जैनाचार्यस्तु स्व तार्किक प्रबल प्रमाण माकलय्य लोकव्यवहारायानुमानस्य प्रामाण्यं स्वीचक्रे। जैनागम प्रतिपादित सत्यमेव जैन दार्शनिकानां कृते मूलभित्तिः। परं जैनास्तु ब्राह्मणानां निगमागम वाक्यानां हिंसादिदोष कवलिततया नैव तत्र प्रामाण्यं मन्यन्ते।

((जीवः))

''चैतन्य लक्षणो जीवः'' (२) तेन चैतन्यमेव जीवलक्षणं समायातमिति। संसारस्य समस्त जीवे चैतन्यं केनापि रूपेणोपलभ्यते। प्रति जीवे नैसर्गिकतया ऽनन्त ज्ञान मनन्त दर्शनानि विद्यन्त एव। परं जीवानां तदावरणीय कर्मकारण तया स्वाभाविक धर्मः नोदेति। स्व शुभाशुभ कर्मणां प्रभाव वैलक्षण्येन जीवानां स्वाभाविक गुणो नितरामावरणतया शुभ कार्यानुष्ठानतया ऽऽवरण कर्मणः तिरोधानेन च गुणानां साक्षात्कारः जीवस्य सञ्जायते।

जीवानां दर्शन ज्ञानादि गुण ~~विपुल~~ विपुल तारतम्य तया नितरामनन्त युक्तियुक्तमेव। जीवे शुभाशुभ कर्मकर्तृत्वं तथा तत् कर्मफल भोक्तृत्वमपि सुतरां संसिद्धमेव। जगतः प्रतिभागं जीवानां सत्ता प्रति वस्तु विद्यत एव। कर्माण्यपि सम्पादयति। सुखान्यपि भुञ्जते दुःखानि चानुभवति। स्वयमेव स्वं चकास्ते। जीवस्य नित्यत्वेऽपि जीवः परिणाम शीलत्वं भजते। अयं जीवः शरीरात् भिन्नः। तस्मात् जीवस्य सत्ता प्रतीकस्तावत् प्रबल प्रमाणस्य चैतन्योपलब्धि मात्रम्।

तस्मात् जैन दर्शनं मध्यम परिणाम विशिष्टमेव मनुते। सन्दर्भेऽस्मिन् आत्मनः विभुत्वमङ्गीकुर्वतः वेदान्तिनः, तथा चात्मनः नितरामणुत्वमङ्गीकुर्वतः वैष्णवान् विहाय मध्यम मार्गमेव स्वीकुर्वते जैनाः। जीवस्तु शरीरावच्छिन्नः स्व शरीरपरिमाणं स्वीकुरुते। सः प्रदीपवत् स्व शरीरं चकास्ते। यद्यपि तस्यामूर्तत्वेऽपि प्रदीप प्रकाश इव शारीरिक परिमा

"तत्त्वार्थ सूत्रम्" – पृ-१६" "उमास्वामी"

"जैनतत्त्व मीमांसा"

"तत्त्वार्थ सूत्रम्"

णंसदाऽऽदत्ते। अनेन प्रकारेण विशालकाये तिष्ठन् जीवः विपुलपरिणामं धत्ते। पीपीलिकास्वल्पकायेऽपि जीवः स्वल्पमेव परिमाणं लभते। प्रदीप इव जीवः सङ्कोचविकाशत्वमवलम्बते। अतएवोक्तञ्च——

"प्रदेशसंहारविसर्पाभ्यां प्रदीपवत्" (१)

तात्त्विकदृष्ट्या आत्मनः निराकाररूपितया तस्य ज्ञानं नेन्द्रियाणि कर्तुं क्षमन्ते। परन्तु प्रत्यक्षानुमानाभ्यां तज्ज्ञानं सम्पाद्यम्।

संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे विद्येते। तत्र बोधात्मको जीवः। ~~अबोधात्म~~ अबोधात्मकस्त्वजीवः। तदुक्तञ्च——

~~चिद्~~ ~~चिदचिद्द्वे~~
चिदचिद् द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयं हेयं हेयं च कुर्वतः॥
हेयं हि कर्तृ रागादि तत्कार्यमविवेकिता,
उपादेयं परं ज्योतिः रूपयोगैकलक्षणम्॥ (२)

जीवात्मनः स्वाभाविकचिद्रूपपरिणतिं स्वीकुर्वति ज्ञानदर्शने नितान्तमुपयुज्यते। जीवकर्मणोः परस्परं तत्प्रदेशनिरूपणसम्मिश्रणेनात्मनोऽन्यत्वप्रतिपत्तिकारणं जायते। सकलजीवसाधारणं चैतन्यम्। उपशमक्षयक्षयोपशमवशात् औपशमिकस्य क्षयात्मकतया एवं क्षायोपशमिकभावतया कर्मणामुदयात् कलुषाकारतया परिणत जीवपर्यायविवक्षायां स्वरूपत्वं लभते जीवः। अतएवाचार्यैः——

"औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च" अनेनौपशमिकक्षायिकयोः मिश्रणे एवमौदयिकपारिणामिकभाव एव जीवानां स्वरूपं विद्यते।

एतेन वाचकाचार्याणां नितान्तमयमाशयः प्रतिभाति यज्जीवात्मनः स्वाभाविकचैतन्यावस्थायां यं परिणामं स्वीकुरुते तत्रैव ज्ञानदर्शनयोरुपयोगः सञ्जायते। स एव जीवात्मनः व्यापारस्य वास्तविकः प्रयोगः। [illegible] [illegible] षड्द्रव्यसङ्ग्रहस्य प्रारम्भवेलायां भणितं तेन· यत् विवक्षितपदार्थग्राहकव्यापार एवोपयोगः। चिदचिद् स्वभावात्मनाय ज्ञानदर्शनव्यापारो जीवात्मनः चैतन्यात्मकतया यस्तावत् स्वाभाविकपरिणामः समागच्छति। अस्य परिणामान्तरमेव ज्ञानदर्शने नितान्तमुत्पद्येते। प्रत्यक्षसाकारत्वे ज्ञानं प्रमाणं, परोक्षनिराकारत्वे दर्शनं प्रतिपादितम्। अतएव ज्ञानदर्शनयोरुपयोगः जीवात्मनः लक्षणं जायते। जीवकर्मणोः पारस्परिकावयवसम्मिश्रणेन कर्मणा सहैकात्मकतया कर्मात्मनः पार्वक्रियाविधानाय साधनमुपयुज्यते। जीवप्रदेशो अवयवानां मिथः संयोगः कदाचिद् दृढः प्रतिभाति कदाचित् शैथिल्यञ्च। कदाचिदपि कर्मणः फलं दातुं कर्मणामवयवः जीवाजीवयोः संयोगं शिथिलीकृत्य

तस्मिन्नेव प्रविशति। अनेनैव प्रकारेण कर्मजीवयोः मिश्रणं जायते। अनेनैव व्यवहारेण जीवः स्वावयवकारणतया बन्धनमादत्ते। तावत् कालपर्यन्तं जीवः मुक्तो न भवति कर्मणामवयृतः पार्थक्यं न लभते। तस्मात् सामान्योपायेन कर्मणां पार्थक्येन जीवानामवगमनं सदा दुःखमेव। तस्यामवस्थायां जीवात्मा स्वमिश्रितकर्मणः परमाणोः पृथक्तया ज्ञानविषयत्वं लभते।

तत्रानुदयप्राप्तिरूपे कर्मणामुपशमे सति जीवस्योत्पाद्यमानो भावः सुतरामौपशमिकः। यथा पङ्कः कालुष्यं सम्पादयति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता नितान्तमौत्सर्गिकी ~~बिव~~ वेविद्यते। अतएवार्हततत्त्वानुसन्धानतया रागादिपङ्कप्रक्षालनेन नैर्मल्याऽऽपादकः क्षायिकः। कर्मणां क्षये सति जायमानो भावः क्षायिकः। पङ्कात् पृथक्भूतस्य नैर्मल्यस्य स्फटिकान्तर्गतस्य जलस्य स्वच्छतेव मोक्षः।

~~उभयोः सम्मिश्रणेन~~ उभयोः सम्मिश्रणेन क्षायोपशमिकः। यथा जलस्यार्द्धस्वच्छता। सति कर्मोदये भवन् भाव औदयिकः। सति कर्मणां विनाशे सहजो भावश्चेतनत्वादिः पारिणामिकः। तदेतद्यथासम्भवं भव्याभव्यमेव जीवस्वरूपं वेविद्यते। जैनदर्शने यावत्पर्यन्तं नितान्तमाध्यात्मिकतया तद् विकासाय स्वयं चेतनप्रयासं नाङ्गीकुरुते तस्मात् कालं यावत् सम्यक्दर्शनं नैव प्राप्नोति। सम्यक्दर्शनानन्तरं जीवः मोक्षं वा ~~गच्छ~~ गच्छति। सएव भव्यजीवः। तदभिन्नस्त्वभव्यजीवः। अतएव भव्याभव्यत्वं जीवानां चैतन्यवत् पारिणामिकः। तदपि च चैतन्यं ज्ञानमेव। तत् जीवात्मनः स्वाभाविकम्। न तु तस्य स्वरूपम्। तदुक्तं च स्वरूपसम्बोधने तावदित्थमभाणि तेन—

ज्ञानाद् भिन्नो न नाभिन्नो भिन्नाभिन्नः कथंचन।
ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्तितः।

एतेन ज्ञानाद् भिन्नत्वं एवमपि तद् भिन्नत्वमपि नास्ति। परं प्रश्नोऽयं तावत् नितान्तं नैसर्गिकः। कथमेकत्र भिन्नाभिन्नत्वं सन्तिष्ठेत्। ज्ञानं पूर्वापरीभूतं तावदात्मेति कथ्यते। एतावता स्पष्टमाकलितं जायते खलु चैतन्यं जीवानां स्वभावोऽस्ति। जीवस्या ~~खलु~~ वस्थाविशेषमात्रं तावज्ज्ञानम्। अस्मात् अवस्थावि ~~शेषज्ञाना~~ शेषज्ञानात् जीवस्तु नितान्तमभिन्नोऽस्ति। अतएव भिन्नाभिन्नत्वं जीवस्य। यद्यपि जीवे स्वदृष्ट्या ज्ञानवत्त्वमतएव ज्ञानाभिन्नत्वम्। किन्तु तदपरदृष्ट्याऽज्ञानत्वमेव तेन ज्ञानात् भिन्नत्वमेव संगच्छते। अनेनैव हेतुना ज्ञानप्रवाहस्य पूर्वापरीभूतानां जैनतत्त्वविदां विचारो।

नन्वत्र भेदाभेदयोः परस्परं पीडाणावस्थानात् वास्तविकी अन्यतरस्यैवोपस्थित्या कथं तत्रोभयात्मकत्वं सेत्स्यतीति सत्यम्। न तु वाधकप्रमाणाभावात्। अनुपलम्भ एव वाधके प्रमाणं स्यादिति वाच्यम्। अनुपलम्भाभावात्। कथं तु समस्तेषु वस्तुषु स्याद्वादस्य स्याद्वादिनः विचारे सुप्रसिद्धत्वात्।

स्याद्वादिनः विचारे तावदनेकान्तवादः नितरां वैशिष्ट्यमावहति। नहि कस्यापि वस्तुनः किमपि ध्रौव्यात्मकं रूपं प्रतीत्या प्रतिपन्नमेव। तस्मात् समस्तानि वस्तूनि जगतः नितरामध्रौव्यात्मकान्येव विद्यन्ते। तेन सत्ताऽप्यसत्तासमत्वेनाऽऽभासते। अनेकान्तवादस्य प्रतिपादनतयैव जैनाः भावाभावात्मकसत्तां मन्यन्ते। अत एवात्मनः ज्ञानाज्ञानत्वं संघटते। अनेनैव हेतुना नैवात्मनः ज्ञानस्वरूपत्वम्। ज्ञानं तु नैसर्गिकं तावदात्मनि ~~विद्यते एवे~~ विद्यत एवेति। प्रस्तुतसिद्धान्तमाकलय्य ज्ञानादभिन्नत्वं भिन्नत्वमपि स्वीकुरुते। अतः स्याद्वादिनः विचारे युगपत् भेदाभेदौ नैव प्रतिभातः। तेन स्याद्वादपक्षमङ्गीकर्तुं नैव काचन वाधा दीदृश्यते।

तदपरे स्याद्वादिनः विलक्षणां प्रणालीं स्वीकृत्य जीवाजीवयोः तद्भिन्नमेवं व्याचक्षते। जीवाकाशधर्माधर्मपुद्गलास्तिकायभेदात् तत्पञ्चविधम्। एतेषु पञ्चतत्त्वेषु कालत्रयसम्बन्धिततयास्तीति स्थिति व्यपदेशः। तत्र जीवास्तु द्विविधः। संसारिणः मुक्तश्चेति। भवात् भवान्तरप्राप्तिमाकलयन्तो जीवाः संसारिणः विद्यन्ते। सोऽपि जीवः द्विविधः समनस्कामनस्कभेदात्। तत्र संज्ञिनः समनस्काः, शिक्षाक्रियाकलापादयः संज्ञेत्युच्यन्ते। तद्विधुरास्त्वमनस्काः। त्रसस्थावरभेदेन तस्यापि द्वैविध्यम्। तत्र ~~[illegible]~~ ~~[illegible]~~ द्वीन्द्रियप्रभृतयो चतुर्विधास्त्रसा इत्युच्यन्ते। पृथिव्यप्तेजोवायुवनस्पतयः स्थावरतयोच्यन्ते।

जैनदर्शनसाहित्ये पुद्गलशब्दः कमपि वैलक्षण्यं धत्ते। अयं पुद्गलशब्दः भूतसामान्याय प्रयुक्ते। दर्शनान्तरेतु पुद्गलस्थानीयं तत्त्वं परमाणुना व्यवहृतम्। पुद्गलशब्दस्य व्याख्यायां माधवाचार्येण सम्यता दीदृश्यते यत् पूरयन्ति गलन्तीति वा पुद्गलाः। अनया व्युत्पत्त्या तादृशद्रव्यसंज्ञात्वेन व्यपदिष्टः। पुद्गलस्य द्विरूपे विद्येते एकः खलु अणुरूपात्मकः तदपरः संघातात्मकश्च। पुद्गलस्य सूक्ष्मतम निरवयवांशं विभक्तुं नैव शक्नोति। अत एवास्याणुत्वस्वभावता। अस्यावयवसमूहः संघाततयोच्यते। अनेनैव सङ्घातेन शरीराणि तदवयवाश्च सदा निर्मीयन्ते।

"जैन दर्शन" "तत्त्वार्थ सूत्रम्" "उमास्वाती"

"तत्त्वार्थ सूत्रम्" "पृ. २६"

"तत्त्वार्थ सूत्रम्" -८- २-

"तत्त्वार्थ सूत्रम्" ८-१"

पौद्गलिक पदार्थेषु चत्वारो हि गुणाः प्राप्यन्ते स्पर्श रस गन्ध वर्णादयः। इमे स्पर्श रस गन्ध ~~गन्ध~~ वर्णादयः अणुसङ्घाताभ्यां तत्तद् द्रव्ये प्राप्यन्ते। दर्शनान्तरे गुणान्तरादयोऽपि भौतिकतया परिलक्ष्यन्ते। परन्तु जैन दार्शनिकास्तु नैव भौतिकत्वं स्वीकुर्वते गुणानाम्। तथोक्तञ्च —

"स्पर्श रस गन्ध वर्ण विशिष्टाः पुद्गलाः"।(१)

तेऽपि द्विविधाः — अणवः स्कन्धाश्च। भोक्तुमशक्यास्तावदणवः। ~~द्व~~ द्व्यणुकादयो स्कन्धाश्च। तत्र द्व्यणुकादिस्कन्ध भेदात् अण्वादिरुत्पद्यते। अण्वादि सङ्घातात् द्व्यणुकादयः जायन्ते। क्वचिद् भेद [illegible] सङ्घाताभ्यां स्कन्धोत्पत्तिः।(२)

मिथ्यादर्शनाविरति प्रमाद कषाय वशाद्योग वशाच्चात्मा सूक्ष्मैक क्षेत्रावगाहिनामनन्त प्रदेशानां पुद्गलानां कर्मबन्ध योग्यानामादान मुपश्लेषणं यत्कुरुते स बन्धः। तदुक्तञ्च सकषायत्वाज्जीवः, कर्मभाव योग्यान् पुद्गलानादत्ते सम्बन्धः।(३)

अनेन तत्त्वार्थसूत्र वाक्येन स्पष्टमाकलितं भवति यत् खलु मिथ्यादर्शनाविरति प्रमाद कषाय कारण कूटैः अयमात्मा पुद्गलान् स्वीकुरुते। यस्तावत् पुद्गलः स्व सूक्ष्म क्षेत्रे प्रविशति। एवमनन्त स्थानेषु निवसति। अतएव ~~स्व कर्म~~ स्व पूर्वकृत कर्मणां सूत्र बन्धन योग्यतामाल ~~भते लभते~~ भते। तस्मात् कषाय कारणतया जीवः स्वानुकूल पुद्गलत्वं स्वीकुरुते। तेन वाचकाचार्यः तत्त्वार्थसूत्रे वचनमिदं प्रत्यपीपदत्। "मिथ्यादर्शनाविरति प्रमाद कषाय योगाबन्ध हेतवः"।(४)

~~तत्र प्रकृतिस्थित्यनुभेदात्~~

तत्र प्रकृति स्थित्यनुभव प्रदेश बन्ध भेदात् बन्धश्चतुर्विधः। यथा च निम्बगुडादेस्तिक्तत्व मधुरत्वादि स्वभाव एवावरणीयस्य ज्ञान दर्शनावरणत्वं विद्यते तथादित्य प्रभाच्छादकाम्भोधरवत् प्रदीपप्रभा तिरोधायक कुम्भवच्च। प्रकृतिब~~न्धोऽष्ट~~ न्धोऽप्यष्टविधः द्रव्यकर्मावान्तर भेद मूल प्रकृति वेदनीयः। तथोवाच उमास्वाती वाचकाचार्यः —

"आद्यो ज्ञान दर्शनावरण वेदनीय मोहनीयायुर्नाम गोत्रान्तरायाः" तत्त्वार्थसूत्रम्।

"समीक्षा"

जैन दर्शनस्य मूले विभिन्नानि तत्त्वानि स्वीकुरुते। अतः दार्शनिक बहुत्ववाद समर्थकतया जैन दार्शनिकानां सिद्धान्तः समेषामग्रे समागच्छति। जैन दार्शनिकानां सिद्धान्तस्तु प्रारम्भ कालत एवानेकान्तवादं मनुते। बाह्येन्द्रिया-

(१) "राधाकृष्णन्" इण्डियन फिलासफी" भाग-१
पृ०- ३३४ "

षड् दर्शन समुच्चय टीका (पृ०-२२२)

न्तरिकेन्द्रियाभ्यां नितरामनुभूत जगतः सत्तां स्वीकरोति। केचन दार्शनिकास्तु जगतः सत्ता बाह्येन्द्रिय जन्य ज्ञान जन्या। तदनुसारं चक्षुः यं पदार्थं यद्रूपतया गृह्णाति स एव पदार्थः तद्रूपतया सत्यत्वमासादयति। कुश्चिमतेभ्यां आभ्यन्तरिकेन्द्रियं ग्राह्यविषयं सत्यत्वेन स्वीकुर्वते। परन्तु जैन दार्शनिकास्तु प्रस्तुत विषयमाकलय्य तदुभयो समन्वयं वाञ्छन्ति। तदनुसारं बाह्य जगतः सत्यत्वं प्रमाणयितुं मनसासह बाह्येन्द्रियाणामुपयोगित्वं केनाप्युपायेन नैव न्यूनत्व मवलम्बते। अतएव समालोच्य कर्मा विचारे जैन दार्शनिकानां विचार विन्दुः वास्तविकं वहुत्व संवलित वादमनुकरोति। अनया विचारदृष्ट्या पाश्चात्य दार्शनिकवत् जैन दार्शनिकोऽपि जगतः समस्त प्रदेशे जीवानां सत्त्वमाकलयामास। जगतीतलेऽस्मिन् तत्प्रदेशाभावः नितरामवलोक्यते यत्र जीवः स्वोपस्थित्या नैव सजीवत्वं स्वीकुरुते।

विविध विचित्रतामय विपुल प्रदेश संवलित विश्वस्य प्रतिकोणे जीवस्य सत्त्वं स्वीचक्रे। तस्मादनयैव पद्धत्या जैन दार्शनिकाः स्वोदात्त भावनया नितरां प्रेरिताः सन्तः अहिंसायाः परमाभ्युदयत्व मङ्गीचक्रे। (१)।

जैनं दर्शन तत्त्वविदां महतां नितरां तावदनेकान्तवादः श्लाघ्य प्रयास एव। समस्त पदार्थस्य पारस्परिक सम्बन्धमन्तरा नहि सत्यं ज्ञानं भवितुमर्हति। महान् जैनाचार्य गुणरत्नस्तु पद्यमेकमुद्धृत्य सिद्धान्तमिमं समर्थयामास तथाचोक्तम् —

एकोभावः सर्वथा येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः।
(३) सर्वे भावाः सर्वथा येन दृष्टः एको भावः सर्वथा येन दृष्टः।

येन एकस्य वस्तुनः ~~सर्वथा~~ सर्वथा ज्ञानमाकलितं तेन समग्र तत्त्वानि ज्ञातानि सर्वथा। समस्तानि वस्तूनि नितरामनुभूय व्यवहाराय नितरामुपयुज्यते। तात्त्विक दृष्ट्या नानात्मक सत्तां समालोच्य स्याद्वाद सिद्धान्तं मत्वा तद् सम्भवति। अयं तावदनेकान्तवादः नैव संशयवादस्य रूपान्तरत्वं प्रतिभाति। परन्त्वनेकान्तवादस्य दार्शनिक विवेचनं कतिपयांशे भ्रमपूर्ण एवाभाति।

परं जैन दर्शनं तु वस्तुनः विशेषविषय सन्दर्भे विविध लौकिक कल्पनायाः समन्वयं कर्तुं श्लाघ्यप्रयासं चकार। अतएव तेषां दार्शनिक पद्धत्या नैव दोषाय कल्पते। तस्मात् समन्वय दृष्ट्या जैन दार्शनिक विचार पद्धतिः पदार्थस्य विभिन्न रूपाणि नितरामाक~~स्व~~लय्य समग्रे खलु विश्वे परमतत्त्व पर्यन्तमवश्यमेव तदवगन्तुं प्रायतत। अनयैव दृष्ट्या शङ्कराचार्यः स्याद्वाद पद्धतिमाकल

"माधवाचार्य" ~~आर्हत दर्शन~~" ~~आर्हत~~
"आर्हत दशनम्"

माकलय्य तां खण्डयितुं स्वा शारीरिकभाष्ये तर्कप्रणालीमनुसृत्य तत्साहाय्येनैव सफलप्रयासं कृतवान्। अतएव जैन दार्शनिकानां सिद्धान्तः दार्शनिकविवेचनाय नितान्तमापाततः सदोपादेयः मनोरञ्जकश्चेति। आचारमीमांसा जैन दर्शनस्य महद्वैशिष्ट्यं धत्ते। जैनानां विचारपक्षस्तावत् धर्मरूपतया उदेति। परं क्रमबद्ध दर्शनं तदवान्तर शतके प्राप्नोति। अतएव जैन दार्शनिकाः आस्रव संवरयोः मोक्षकारणत्वमुदीर्य ~~तत्त्व~~ तदेव तत्त्वप्रतिपादनमेव तेषां प्रधानोद्देश्यम्। तथा चोक्तम्—

आस्रवो भव हेतुः स्यात् संवरो मोक्षकारणम्।
इतीयमार्हती दृष्टि रन्यदस्याः प्रपञ्चनम्॥ (१)

परं जैन तत्त्वविदां कृते महत्तीयं त्रुटिः परिलक्ष्यते कर्मफल दातृत्वेन नैवेश्वरसत्तां मनुते। तेनेश्वर विषयक प्रमाणानि तर्कमवलम्ब्य नितान्तं चिच्छेद। तथा चेश्वरप्रतिषेधसमये सविशेषतया जागरूकत्वं नितान्तमवगम्यते। कर्मणः स्वातन्त्र्यं तावदीश्वराध्यक्षत्वविरहे तत्फलान्यादातुं स्वयमेव तत्कारणं स्वीचक्रे। सन्दर्भेऽस्मिन् जैन दार्शनिकाः मीमांसकमतानि नितान्तमवलम्बन्ते। परं मीमांसकाः धर्मव्यवस्थां निर्णेतुं श्रुतिपक्षमेवालम्बन्ते। किन्तु जैनास्तु श्रुतिपक्षमुच्छेत्तुं ~~प्रयत्नान्~~ सदा प्रयतन्त एव।

मानवानां चेतांसि श्रद्धाभक्ति समुन्नत विशेषावस्थायां सगुणोपासनां स्वीकुर्वते। सिद्धपुरुषाय तावदीश्वरस्थानं प्रदाय नैवादृष्टाधायकतया श्रुतिसम्मत पक्षं नैव स्वीचक्रिरे। अतएव जैनाः अर्हदित्यस्य देवत्वमुपकल्प्य मानवानां तावदार्त हृदयानि नितान्तमाश्वासयितुं सञ्जीवनीवत् नितान्तमुपकल्पयामासुः। तेषां विचारपक्षे जीवस्य नैसर्गिकानन्त सामर्थ्यं तथानन्त सौख्यं व्याहार्षुः। मानवमात्राय नितान्तमाशायाः सन्देशं स्वावलम्बनस्य श्लाघ्य शिक्षां दातुं महतीं महत्त्वपूर्णभूमिकां धत्ते।

॥ परमेश्वरस्य जगत्कर्तृत्वव्यवस्थापनम् ॥

किन्तु मन्दमतयः जैना तावदनादेः क्षित्यादिकार्यपरंपरायाः कर्तृत्वं छिन्दन्ति। कार्यत्व हेतुना क्षित्यादौ सकर्तृकत्वं सम्पादयितुं ~~तावदलमेव~~ तावदलमेव प्रयासः नैयायिकानामिति। तस्मादाक्षिपन्ति जैनाः खलु क्षित्यादौ ~~सक~~ सकर्तृकत्वसम्पादने कार्यत्वस्यैवाऽसिद्धेः। सावयवत्वेनापि तत्कल्प्यमान साधनस्याऽसिद्धेयत्वादिति। तदयथाहि—

अत्र जैनतत्त्व विदा जिज्ञास्यते यत् किं सावयवत्वं किम

॥वीतराग स्तुति॥८६।

वयव संयोगित्वम्, अवयव समवायित्वं, अवयव जन्यत्वं, समवेत द्रव्यत्वं सावयव बुद्धि विषयत्वं वा? नाद्ये तत्र प्रथम कल्पः साधीयान्, आकाशादौ अनैकान्त्यात्। नापि द्वितीयः सामान्यादौ व्यभिचारात्। नापि तृतीयः साध्याविशिष्टत्वात्। नापि चतुर्थः विकल्प युगलार्गल ग्रस्तत्वात्। एवं समवेत द्रव्यत्वमित्यत्र समवायेन द्रव्यत्वं विवक्ष्यते किंवा अन्यत्र समवेत द्रव्यत्वं वा? तत्र प्रथम विकल्पे गुणादि समवायवत्त्व द्रव्यत्वयोः सम्भवतया गगनादौ व्यभिचारः। यतो हि आकाशस्य सावयवत्वाभावात्। द्वितीये साध्याविशिष्टत्वात्। शब्दान्तरेषु नित्यमवयवेषु समवायिकारणभूतेषु समवायस्य साधनीयत्वात्। वस्तुतस्तु समवाय एव नास्तीति प्रमाणाभावात्। नापि पञ्चमः आत्मादिनानैकान्त्यात्। अतएव तेषां सावयव बुद्धि विषयत्वेऽपि कार्यत्व विरहात्। आत्मनः निरवयवत्वेऽपि सावयवार्थ सम्बन्धेन सावयव बुद्धि विषयत्वस्यौपचारिकत्वात्। किञ्च तुष्यतु दुर्जन न्यायेन तस्य सत्यपि कर्तृत्वेऽपि किमेकः कर्ता साध्यते, किमनेके वा? नाद्ये तत्र प्रथम कल्पः साधीयान् प्रासादौ व्यभिचारात्। स्थापत्यादीनां पुरुषाणां कर्तृत्वोपलम्भात्। नापि द्वितीयः तावदनेकस्य विश्वनिर्मातृत्वे तत्र पारस्परं वैमत्य सम्भावनायाः नितान्तपरिहार्यत्वात्। अतः सर्वेषां सामर्थ्य समत्वेन सकलजगतः समुत्पत्ति सिद्धौ तदितरस्य वैयर्थ्यात्। अतएववीतरागस्तुतौ निगामित्थमभाणि जैन दार्शनिकेन——

कर्तास्ति कश्चिज्जगतः स चैकः
स सर्वगः स स्ववशः स नित्यः
इमाः कुहेवाकविडम्बनास्युः
तेषां न येषामनुशासकस्त्वम्॥

एवमन्यत्रापि——

कर्ता न तावदिह कोऽपि यथेच्छया वा
दृष्टोन्यथा कटकृतावपि तत्प्रसंगः।
कार्यं किमत्र भवतापि च तक्षकाद्यै
राहत्य च त्रिभुवनं पुरुषः करोति॥

तस्मात् प्रागुक्त कारण त्रितय बलात् तावदावरण क्षये सार्वज्ञस्य युक्तत्वात्। नचास्योपदेष्टृन्ताभावात् सम्यग्दर्शनादि त्रितयानुपपत्तिरिति वाच्यम्। पूर्व सर्वज्ञ प्रणीतागम प्रभवत्वात्, आगमसर्वज्ञ परम्परायाः बीजाङ्कुरवत् अनादित्वाङ्गीकारादिति जैन दार्शनिकानां विचारसरणिः। अतएवोक्तम्——

यथावस्थित तत्त्वानां संक्षेपाद्विस्तरेण वा।

(१) ~~सम्यग्दर्शन सम्यग्ज्ञान~~

"सम्यग्दर्शन ज्ञान चारित्राणि मोक्षमार्गः॥ त० सू०॥ -१।१।

योवबोधस्तमत्राहुः सम्यक् ज्ञानं मनीषिणः॥

जैन दार्शनिकानां सिद्धान्तस्तु संक्षेपतया विद्वद्भिः समुपपादितः। तथाच —

आस्रवः स्रोतसो द्वारं संवृणोतीति संवरः।
प्रवेशः कर्मणां बन्धो निर्जरस्तद्वियोजनम्॥
अष्ट कर्मक्षयान् मोक्षो ऽथान्तर्भावश्च कैश्चन।(१)
पुण्यस्य संवरे पापस्यास्रवे क्रियते पुनः॥
लब्धानन्त चतुष्कस्य लोकागूढस्य चात्मनः॥
क्षीणाष्ट कर्मणो मुक्तिर्निर्व्यावृत्ति जिनोदिता।
सोजहरणा भैक्ष भुजो लुञ्चित मूर्धजाः।
श्वेताम्बराः क्षमा शीलाः निःसङ्गाः जैन साधवः॥
लुञ्चिताः पिच्छिकाः हस्ताः पाणिपात्रा दिगम्बराः।
उर्ध्वाशिनो गृहे दातु र्द्वितीयाः स्युः जिनर्षयः॥
भुङ्क्ते न केवली न स्त्री मोक्षमेति। दिगम्बराः।
प्राहुरेषामयं भेदो महाञ्छ्वेताम्बरैः सह॥

परन्त्वार्हतमतं रामानुजाय नैव रोचते। प्रामाणिकगर्हणात्। न ह्येकस्मिन् वस्तुनि सत्यपि परमार्थे परमार्थसतां युगपत् सदसत्त्वादि धर्माणां समावेशस्याश्रद्धेयत्वात्। क्रिया हि विकल्प्यते न वस्तौ इति न्यायात् परस्पर विरुद्धयोः सदसत्त्वयोः समुच्चयासम्भवे विकल्पासहत्वात्।

यथा उदिते जुहोति एवमनुदिते जुहोति" विकल्पवत् प्रथम वाक्ये हवन क्रियायाः विधीयमानतया सूर्योदयानन्तरमेव क्वचिदपि तद्विधानसम्पाद्यतया युगपत् उदयानुदये तद्विकल्पस्य ऽश्रद्धेय तया ऽत्रापि सत्त्वासत्त्वस्य प्रतीयमानत्वेनोक्त दोषस्याभ्युपगमात्। सत्यमेतत्। परन्तु "अनेकान्तं जगत् सर्वं हेरम्ब नरसिंहवत्" इति दृष्टान्त पर्यालोचनतयाऽपि जगतामनेकत्व व्यपदेशः प्रमाण प्रतीतिभ्यां संवलित इत्यपि वक्तुमशक्यमेव। कथं तु एकस्मिन् देशे गजत्वं सिंहत्वं वा ऽ~~परस्मिन्~~ परस्मिन्नपरत्वमिति देशभेदेन विरोधाभावस्य प्रतीति सिद्धतया एकस्मिन् भाग एव सत्त्वासत्त्वयोः नितामसत्त्वेनानेकान्तत्वासिद्धेः।

नन्वत्र द्रव्यात्मना सत्त्वं पर्यायात्मना तदभाव इत्युभयमप्युपपन्नमिति चेन्न। कालभेदेन कस्यापि सत्त्वमसत्त्वयोः तत्त्वस्वभावात्। अनेन शब्दजालेन ध्वनितं यत् देशकालयोर्भेदेन सदसत्त्वे स्वीकर्तव्ये स्यातामिति सत्यमेव परन्तु नानेकान्त वादिनः सदसत्त्वे नितामेक

॥બ્રહ્મસૂત્ર॥ ॥૨-૨-૩૧॥

कत्र भवेताम्। न चैकस्य त्र्यणुकस्य सापेक्षतया ह्रस्वत्वदीर्घत्वे यथा संगच्छते तथात्र जगतः नितान्तमनेकान्तत्वं नैव संगच्छेत सापेक्षाभावात्। तस्मात् प्रमाणस्याऽसत्त्वेन युगपत् परस्परं विरुद्धे सत्त्वासत्त्वे नैकत्र वस्तौ तद्वक्तुं नितरामुचिते। एवमनयैव प्रणाल्या तदवशिष्टानां भङ्गानां भङ्गोऽवगन्तव्यः।

किञ्च तावत् प्रश्नः प्रष्टव्यः नितरामनेकान्तवादिनं प्रति यदस्य जगतः मूलभूतात्मकः सप्तभङ्गिनयः स्वयमेकान्तोऽनेकान्तो वेति। तत्र नाद्यः संघटते, प्रतिज्ञाव्याघातात्। चरमे विवक्षितार्थासिद्धेः। समेषामनेकान्तत्वे तस्याप्रामाणिकत्वात्। तथा चेयमुभयतः पाशा रज्जुः स्याद्वादिनः।

एवञ्च नवत्व सप्तत्वादि निर्धारणस्य फलस्य तन्निर्धारयितुः प्रमातुश्च प्रमातुः प्रमेयस्य च नवत्वसप्तत्वयोरनियमिततया तन्निर्धारितोऽनेकान्तवादस्यार्हत सिद्धान्तस्य देवानां प्रियत्वमेव। तथा च जीवस्यापि देहानुरूप परिमाणपक्षाङ्गीकारे योगबल सामर्थ्य वैलक्षण्येन योगिना सम्पादित काय व्यूहेषु जीव विच्छेद प्रसंगः। मनुज शरीर परिमाणं कक्षीकुर्वन् जीवः शरीरान्तरतया मातङ्गजदेहं कृत्स्नं प्रवेष्टुं नैव शक्नुयात्। एवं यदा जीवः मातङ्गज शरीरं नितान्तमपास्य पिपीलिका शरीरप्रवेश वेलायां स्व प्राचीन शरीर सन्निवेशाविनाशं प्राप्नुयात्।

प्रदीप प्रभा विशेषवत् उदरवर्ति सङ्कोच विकासमङ्गीकुर्वन् जीवः मनुज मतङ्गजशरीरं प्रविश्य प्रदीपवदिव सविकारत्वेनानित्यत्वमवलम्बयन् कृतप्रणाशाकृताभ्यागम प्रसङ्गः। यतो हि विकारित्वेन सदाऽनित्यत्वमेव सम्पद्येत। तदनन्तरमेव तस्य कप्राप्ति विध्यानौचित्यं संगच्छेत। तस्मात् विनष्टे खलु ~~शरीरे~~ जीवे तत्कृत कर्मणां विनाशोऽपि झटिति सम्पद्येत। तेन विनाश समये कृत कर्म विनाशेन तत्फलमपि विनश्येत्। अतो नैवानेकान्तवादः जीवानां परिमाण वादोऽपि रोचते श्रीमते रामानुजाय।

एवं प्रधानमल्ल निबर्हण न्यायेन जैन प्रतिपादित जीव पदार्थस्य दोषग्रस्तत्वात् अनयैव दिशाऽन्यत्रापि दोषोत्प्रेक्ष्यः। ~~[illegible]~~ ~~[illegible]~~ तस्मान्नित्य निर्दुष्ट वेद विरुद्धत्वात् नैव जैन तत्त्व विदां पक्षः सुतरामश्रद्धेय एव। तदुक्तञ्च भगवता व्यासेन —

॥ नैकस्मिन्नसम्भवात् ॥(२) अतः पक्षमिममादृत्य श्रीमता रामानुजेन जैनमत निराकरण परत्वेन सूत्रमिदं व्यकारि। जैन मत सिद्धान्त सम्मत जीवस्वरूपं नितान्तं विच्छिद्य वेदाप्रामाण्यमपि चि-

(१) "तै० त० उ०" - ३-१-१"
श्वे० उ० - ३-३,

"श्रीभाष्य" "रामानुज" ।२

(३। तत्त्वमुक्तावली" - १-६,

च्छेद। यदि नाम वेदे प्रामाण्यं नाङ्गीकुर्वते तदा जैनसिद्धान्तानुसारमर्हन्मुनिप्रतिपादितानाम वाक्यं कथं प्रामाण्यतयाऽनुमन्येत। अतएव तावदपौरुषेया: वेदा इत्यत्र नैव स्वातन्त्र्यम्। तेन नित्यत्वात् निर्दुष्टत्वाच्च स्वत एव वेदानां प्रामाण्यमभ्युपेयम्। तथाच —

यतो वा इमानि भूतानि जायन्ते ॥ (१) अन्यच्च - ~~द्यावाभूमि~~ द्यावाभूमी जनयन् देव एक: विश्वस्य कर्ता भुवनस्य गोप्ता ॥ नैकस्मिन्नसंभवादित्यपि सूत्रं द्रष्टव्यमित्यनेन जैनतत्त्वविदां पक्षस्य देवानांप्रियत्वमेव निरवोचत् श्रीमान् रामानुज:।

विशिष्टाद्वैतवादिना श्रीमता रामानुजेन स्वविचारदिशा चिदचिदीश्वरभेदेन भोक्तृभोग्यनियामकभेदेन च व्यवस्थिता त्रय: पदार्था: प्रादर्शिषत। तदुक्तञ्च —

ईश्वरश्चिदचिच्चेति पदार्थत्रितयं हरि:।
ईश्वरश्चिदिति प्रोक्तो जीवो दृश्यमचित् पुन:। (२)

अतएव विशिष्टाद्वैतवादिन: स्वविचारपक्षमवलम्ब्येत्थं ब्रुवते यत् हरिरेव तावदीश्वर:। चिदिति जीव:, अयमेव भोक्ता, जगदिदं दृश्यमानं ~~सर्वं~~ तावदचिदिति। तत्र चिद्रूपा: जीवात्मान: निर्मलज्ञानस्वरूपा: विद्यन्ते। ते नितरामसङ्कुचिता: एव ~~भविता~~ मपरिच्छिन्नाश्च। अतएवाऽनादिकर्मरूपा विद्यया नितरामावेष्टिता:। एवं स्वकर्मानुसार ज्ञानस्य सङ्कोच विकास स्वभावता जीवात्मन:। भगवत्प्रतिपत्ति भगवत् पदप्राप्तिरित्यादयो स्वभावा: जीवात्मानाम्। अचिद्वस्तूनां भोग्यभूतानामचेतनतया पुरुषार्थरहितत्वं विकारास्पदत्वञ्च।

परमेश्वरस्य भोक्तृभोग्ययोरान्तरिक नियामकतयाऽवस्थानमेव स्वभाव:। अपरिच्छेद्य ज्ञानैश्वर्य वीर्य शक्ति तेजोप्रभृतिभि समाच्छन्नत्वमेव परमेश्वरस्य। स्वसंकल्पेनैव प्रकृत: सन् ~~चिदचिद~~ चिदचिद्वस्तुतत्त्वे निर्माय स्वानुरूपं दिव्यरूपतया कल्याणगुणगणत्वं परमात्मनाम्। तथाच वेङ्कटनाथेनेत्थं निरटङ्कि यत् —

द्रव्याद्रव्यप्रभेदान् मितमुभयविधं तद्विदस्तत्त्वमाहु:।
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयथा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहु: ॥ ३

अन्यच्च —

तत्र द्रव्यं दशावत् प्रकृतिरिह गुणै: सत्त्वपूर्वैरुपेता-

(१)"तत्वमुक्तावली" १-६,

(२) "मु० उ०" ३-१-१,
"बै० सू०" - ३-२-२०
गीता - २-२०,

"तत्त्व मुक्तावली" ९०"

(४)"श्वे० उ०" - ५-९

"छा० उ०" ८।१२-४
छा० उ०" - ४-३-६:-
प्र० उ० = ४-९

कालो वद्धाख्याकृतिः स्यादणुरवगतिमान्जीव ईशोन्य आत्मा।
संप्रोक्तो नित्यभूति त्रिगुणसमधिका सत्त्वयुक्ता तथैव।
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥१।

प्रस्तुतपद्यमवलम्ब्य वैंकटनाथः पदार्थविभाजनमित्थं चकार। यथा द्रव्याद्रव्यप्रभेदात् द्वैप्रकारके तत्त्वे विद्योते। तत्र द्रव्यमपि द्विविधं जड़ाजड़भेदात्। जड़ोऽपि द्विविधः – अव्यक्तकालभेदात्। एवमजड़ोपि द्विविधः प्रत्यक्पराक् भेदात्। तत्र प्रत्यक् जीव एव। नित्यविभूतिस्तत्र पराक् शब्दव्यपदेश्या।

सत्त्वरजोतमोभिः समाच्छन्ना प्रकृतिः प्रतिपाद्यते। स एव कालतयाऽवगन्तव्यः। अणुज्ञानाभ्यां समाहितः खल्वात्मा। चेतनस्वरूपं तु नितरामीश एव। त्रिगुणसमधिका सत्त्वयुक्ता नित्यविभूतिरि मतिः। ~~प्रस्तुसस~~ प्रस्तुतसन्दर्भव्याख्या तत्त्वमुक्तावल्यां द्रष्टव्या। तत्र चिच्छब्दवाच्याः जीवात्मानः परमात्मनः सकाशाद् भिन्नाः नित्याश्च। तथाच——

(२) "द्वा सुपर्णा सयुजा सखाया" इति। अतएवोक्तं नानात्मानो व्यवस्थातः। एवं तस्यात्मनः नित्यत्वमपि श्रुतिप्रसिद्धमेव।

न जायते म्रियते वा विपश्चि-
न्नायं भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणे।
न हन्यते हन्यमाने शरीरे ॥

तथाच ——

द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥

अनेन जीवात्मनः परमेश्वरात् भिन्नत्वं नानात्वं च नित्यत्वं संसिद्धमेव। तथाचोक्तम् ——

कश्चिद्दुःखी कश्चिदाढ्यः कश्चिदन्यविधः पुनः।
अनयैवात्मनानात्वं सिद्धयत्यत्र व्यवस्थया ॥(३)

यदि नाम जीवात्मनः नित्यत्वं नाङ्गीकुर्यात् तदा कृतप्रणाशाकृताभ्यागमप्रसंगः। तस्मात् नित्यत्वं स्वीकार्यमेवात्मनः। तथाचोक्तम्——

वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते।(४)

"अन्यच्च" आराग्रमात्रः पुरुषः" अणुरात्मा चेतसा वेदितव्यः। एवञ्च- "अथ यो वेदेदं जिघ्राणीति स आत्मा" योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता

"মহাভারতে" "বেদব্যাস" (৭)

"ছা০ উপ০। ৮।৬-৩"

বৃ০ সা০ - ৩।৬।২২,

बोद्धा कर्ता विज्ञानात्मा पुरुषः ॥ अतएव न्यायदर्शनसूत्रे भगवान् अक्षपादः व्याजहार यत् खलु—

रागरहितो जीवः नैव समुत्पद्यते । तेन रागानुबद्ध तयैव देहिनः जायन्ते । एतावता तात्पर्यमिदमाकलितं जायते प्रागनुभूत विषयानुचिन्तनेनैव रागोत्पत्तिः निश्चिता । एवं पूर्वानुभवः तदा संभवति यदाऽन्यजन्मनि विषयसंसर्गवशात् शरीरमाप्ते । स एव जीवः पूर्व शरीरे अनुभूत विषयान् नितरामनुस्मरति । तदनन्तरमेवेच्छति यतते च । इयमेव तावज्जन्मनोः प्रतिसन्धिः । अतएवाऽन्तिम शरीरे प्रथम शरीरादपि सन्धिः । तत्रापि ततो प्रागेवाभिसन्धिः वेदोपनिषत् सम्मता । अनेन प्रकारेण अनादिकालतः चेतनस्वरूपस्यात्मनः सम्बन्धः शरीरेणैव जायत इति निश्चयं प्रतीमः ।

जीवस्याणुत्वमपि श्रुतिवाक्येषु प्रसिद्धमेव । यदि नाम तावत् केशाग्रभागस्य शतांशो भागः शतभागेषु विभक्तः सन् तत्र यथाणुत्वं संगच्छते तथात्रापि जीवस्याणुत्वं सिद्ध्यति । आत्मनोऽणुत्वं चेतसैवावगन्तुं शक्नुयादिति । नान्यः पन्थाः विद्यते तत् सम्पादनाय । तस्य जगतः कर्तोपादानं चेश्वरपदार्थः पुरुषोत्तमो वासुदेव पदवाच्यः । तथा चोक्तम्—

वासुदेव परं ब्रह्म कल्याण गुण संयुतः ।
भुवनानामुपादानं कर्ता जीव नियामकः ॥ (१)

स एव वासुदेवः परमकारुणिको भक्तवत्सलः परमपुरुषः तदुपासकानुगुण फल प्रदानाय स्वलीलावशात् अर्चाविभव व्यूह सूक्ष्मान्तर्यामि भेदेन पञ्चधाऽवतिष्ठते ।

तत्रार्चा प्रतिमा शब्देन व्यवहरति । रामाद्यवतारास्तु विभव पदवाच्यत्वं धत्ते । वासुदेव सङ्कर्षण प्रद्युम्नानिरुद्ध संज्ञक भेदात् व्यूहश्चतुर्विधः । सूक्ष्मं तु समग्र षड्गुणाप~~र्णन्तं~~न्नं वासुदेवाख्यं परमिति व्यपदिशति । तथा चोपनिषद्वाक्यम्—

“सोऽपहतपाप्मा विजरो विमृत्यु र्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः” (२) अन्यच्च=

अन्तर्यामी सकल जीव नियामकः । य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति । तस्मात् अन्तर्यामी सर्वान् जीवान् नियमयति । यस्तावदात्मनि स्थित्वा आभ्यान्तरिकत्वेनैवात्मानं नियन्त्रयति । जीवात्मनः हृदये मित्रवत् अवस्थितः परमात्मान्तर्यामी । अयमेवान्तर्यामी शुभाशुभ कर्माणि प्रवर्तयति जीवात्मानमिति ।

तत्र पूर्वपूर्व मूर्त्युपासनया पुरुषार्थ परिपन्थि दुरितक्षये तदुत्तरोत्तरं तदुपास्ति । तदुक्तञ्च—

वासुदेवः स्वभक्तेषु वात्सल्यात्तत्तदीहितम् ।

"विष्णुपुराण"

"गीता" - ८-१५,

अधिकार्यानुगुण्येन प्रयच्छति फलं बहु॥
तदर्थं लीलया स्वीयाः ~~पञ्चमूर्ति~~ पञ्चमूर्तीः करोति वै।
प्रतिमादिकमर्चाख्या देवतास्तु वैभवाः।
तद्देवं वासुदेवाख्यं परं ब्रह्म निगद्यते॥
अन्तर्यामी जीवसंस्थो जीवप्रेरक ईरितः॥

एवञ्च—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥
स्वभक्तं वासुदेवोऽपि संप्राप्यानन्दमक्षयम्।
पुनरावृत्तिरहितं स्वीयं धाम प्रयच्छति॥

अतएव तावत् स्मर्तव्यम्—

परमात्मा तावत् द्रष्टव्यः द्रष्टा च तावज्जीवः। तेन द्रष्टव्यः श्रोतव्यः, मन्तव्यो निदिध्यासितव्यः॥ इत्याद्युपनिषद्वाक्ये जीवस्तु स्वरूपतः परमात्मनः दर्शन विधानमेव श्रुतिवाक्येन द्रढयति

जीवात्मातु इन्द्रियाधीनतया दर्शन शक्तिं स्वीकुरुते। अतएव तदन्तर्गतो विभुः परमात्मा तावत् द्रष्टव्यः, न तु जीवात्मा। तस्य श्वासप्रश्वास रूपात्। यदा जीवः स्वानि कर्माणि नावलोकयति एवं नैसर्गिकी शक्तिरपि विनश्यति। तदनन्तरमेव जीवः मोक्षं कामयते। एतावता स्पष्टमाकलितं जायते यत् जीवात्मपरमात्मनोः पार्थक्यं संसिद्धमेव।

उपनिषद्विचारपक्षमाकलय्य बोधयनाचार्यसम्पादित ब्रह्मसूत्रवृत्तेः विशालकायत्वमालक्ष्य श्रीमान् रामानुजाचार्यः शारीरिकमीमांसाभाष्यमकार्षीत्। सोयं श्रीमान् रामानुजाचार्यः भाष्यप्रणयनात् प्राक् विशिष्टाद्वैतपक्षमाकलयामास। सन्दर्भेऽस्मिन् विशिष्टाद्वैतीयः सम्प्रदायः विष्णुपुराणमेव सदा स्वीकुरुते।

बोधायनस्तु ब्रह्मसूत्रस्य महतीं वृत्तिं प्रणिनाय। ततः द्रविडाचार्यः तद्वृत्तिभाष्यमपि प्रणैषीत्। ततः सर्वं समीक्ष्य श्रीमान् रामानुजाचार्यः (११३७) ख्रिष्टस्य वर्षे प्राञ्जलभाषया स्वश्रीभाष्यं वैशद्येन नितान्तमलीलिखत्। अतएवात्मा अरे द्रष्टव्यः॥ इत्यनेनात्मनः दर्शनरूपत्वं विधीयते। भवति च भावनाप्रकर्षात् स्मृतेः दर्शनरूपत्वम्। तथा च भगवती श्रुतिः—

नायमात्मा प्रवचनेन लभ्यो-
न मेधया न बहुना श्रुतेन।

''कठोपनिषद्'' २-२३''

''गीता'' - ''१०-१०''
'' ''   ८।२२''   (२)

''बादरायण'' ''ब्रह्मसूत्र ''१-१-२''

''ब्रह्मसूत्रम्'' ''१-१-३''

तै० उ० '' २-१-१''

''माधवाचार्य'' ''रामानुजदर्शन''

यमेवैष वृणुते तेन लभ्य
स्तस्यैष आत्मा वृणुते तनूं स्वाम् ।। (१)

प्रियतम एव नितान्तं वरणीयः। यथार्थं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान् प्रयतत इति भगवतैवाभिहितम् —

तेषां सतत युक्तानां भजतां प्रीति पूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।

अन्यच्च -

।। पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।। (२)

किं तावदिति परमात्मतत्त्वमिति जिज्ञासया प्रत्यपादि यत्- " जन्माद्यस्य यतः " " ब्रह्मसूत्रम् " इत्यादिना सृष्टिस्थितिप्रलयाः विज्ञायन्ते। तद्गुण संविज्ञानो बहुव्रीहिः। अस्य विविध-विचित्र रचनस्याचिन्त्यस्य नियतदेश काल भोग नियन्त्रितस्य ब्रह्मादिस्तम्बपर्यन्त क्षेत्रज्ञ मिश्रस्य जगतः यस्मात् सर्वेश्वरात् अखिल प्रत्यनीक स्वरूपात् सर्वज्ञात् सर्वशक्तेः पुंसः सृष्टिस्थिति प्रलयाः प्रवर्तन्त इति भावार्थः।

नचेत्थं भूते परमात्मनि किं प्रमाणमिति वाच्यम्। शास्त्रस्यैव प्रमाणत्वात्। तथाचोक्तम्- शास्त्रयोनित्वात्। शास्त्रं योनिः कारणं प्रमाणं यस्य तच्छास्त्रयोनि, तस्य भावः तत्त्वं तस्मात्। ब्रह्म ज्ञान कारणत्वात् शास्त्रस्य तद्योनित्वं ब्रह्मणः संगतमेव।

नच ब्रह्मणः प्रमाणान्तर गम्यत्वं स्यादिति वाच्यम्। प्रत्यक्षस्यातीन्द्रियत्वेन प्रवृत्त्यनुपपत्तेः। नच तथापि —
महार्णवादिकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमानेन तत्सिद्ध्यतीति वाच्यम्। तस्य श्रुति कुष्माण्डायमानत्वात्। यतो वा इमानि भूतानि जायन्त " इति।

यद्यपि ब्रह्मणः प्रमाणान्तर गोचरत्वं नैव संगच्छते तथापि प्रवृत्ति निवृत्ति परत्वाभावेनैव शास्त्रं तत्प्रतिपादयितुं शक्यतीति पर्यनुयोग परिहाराय प्रतिपादितवान्। सूत्रमिदं तावत् —
" तत्तु समन्वयात् " " ब्रह्मसूत्रम् " - १-१-४ " तस्मात् तच्छास्त्र प्रमाणकत्वं ब्रह्मणः सम्भवत्येव। कथं तु तत् ~~सम्व~~ समन्वयात्। तेन परम पुरुषार्थ भूतस्यैव ब्रह्मणः नितरामभिधेय तया ऽन्वयादिति ।(३)।०

" समाप्तः चतुर्थपरिच्छेदः "

(१) "मनुस्मृति:"

"अर्थशास्त्र" "कौटिल्य" (२)

(३) "न्याय भाष्यकार:" (वात्स्यायन"

भारतीय दर्शनेषु वस्तुतत्त्व परीक्षण पद्धत्या न्यायदर्शनं सर्वान् अतिशेते। वैदिक दर्शन स्वरूपानुसन्धानाय न्यायदर्शनस्योपादेयता प्रत्यक्ष सिद्धैवाऽऽस्ते। अतएव भगवान् मनुः नितरामिदं प्रत्यपीपदत् - यत् श्रुति सम्मत तर्क साहाय्येन धार्मिक रहस्यमवगन्तुं श्रुति सम्मत तर्क मूलक विद्यायाः वैशिष्ट्यं नैव तिरोहितं केषामिति। तथाच भगवान् मनुः —

~~आर्षोम~~ आर्षं धर्मोपदेशंच वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥(१)

स्मृति घटक तर्क पदेनानुमानात्मिका ऽऽन्वीक्षा विवक्षितेति भाष्यकारोऽभिप्रैति। अयं नितरामान्वीक्षिकी शब्दः कौटिलीयेऽर्थशास्त्रे कौटिल्येनेत्थमभाणि यत् —

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्म विद्यां वार्तारम्भांश्च लोकतः॥

अनेन खलु वाक्येनानुमान प्रमाण व्युत्पादकं शास्त्रमान्वीक्षिकीति नितरामाचक्षते। सेयमान्वीक्षिकी प्रमाणादिभिः पदार्थैः विभज्यमाना सर्वतः वैशिष्ट्यमायत्ते। तथाच —

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्व धर्माणां विद्योद्देशे प्रकीर्तिता ॥(२)

इतासां विद्यानां यानि कर्माणि प्रतिपाद्यानि नितरामग्निहोत्रादीनि- तेषां प्रमितौ न्याय शास्त्रमेवोपायः। एतच्छास्त्र व्युत्पादित तर्क परिशोधितान् हि धर्मान् इतरा विद्याः प्रतिपादयन्ति। एवञ्च सर्व धर्माणामाश्रयः धर्म द्वारेण विद्यानामुपकार इति अर्थशास्त्रे विद्योद्देशनाम प्रकरणे परिकीर्तिता।

तस्मात् भाष्यकारसम्मतेयं खलु न्याय विद्या प्रदीपवत् समस्त विद्याप्रकाशिका। सर्वकर्मोपायं प्रवर्तयिता चेति। समग्र धर्माणामाश्रयः। सार्वजनीनेयं खलु नितरामुपयोगिता न्याय विद्यायाः लोकप्रियत्वे प्राचुर्यं भजते। विभिन्न प्रमाण साहाय्येन वस्तुतत्त्वपरीक्षणमेव न्यायविद्यायाः महोद्देश्यं प्रतिभाति। अतएव समस्त शब्दस्य प्रमाणैरर्थपरीक्षणं न्याय इति विवरणं भाष्ये दृश्यते। एतेन प्रमाण स्वरूप वर्णनेन परीक्षा प्रणाल्या व्यावहारिक रूपतया वा दर्शनमिदं न्याय दर्शन नाम्ना प्रथितं प्राचीनकालतएव।

छान्दोग्योपनिषदि वाकोवाक्य शब्देन न्याय विद्यां सङ्केतयति। अतएवान्वीक्षिकीति व्यपदेशमपि —

(१) ''तात्पर्यटीका'' ''न्यायभाष्य''

(२) ''कल्पतरु व्याख्या''

''छान्दोग्योपनिषद''

अत्र भाष्यकारः —

यत् प्रत्यक्षागमाश्रितमनुमानमन्वीक्षा, तया प्रवर्तत इत्यान्वीक्षिकी न्याय विद्या अर्थात् न्याय शास्त्रम्। समस्त प्रमाण व्यापारादर्थाधिगतिर्न्याय इति वार्तिककारः।

न्याय शब्दः विलक्षणार्थ प्रतिपादन कुशलः विशिष्ट पारिभाषिकमर्थं लभते। तत्राच प्रतिज्ञा हेतु दृष्टान्तोपनय निगमनेत्यादिभि पञ्चावयव वाक्येन न्यायं प्रयुज्यते। "आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपमानमुपनयः" इत्येवं सर्वेषां प्रमाणानां प्रवृत्तिः न्याये।

प्रत्यक्षादि प्रमाण मूलतया प्रतिज्ञादयः पञ्चावयवाः प्रमाणानि विद्यन्ते। तैरर्थस्य लिङ्गस्य परीक्षणं परीक्षा, एवं पञ्च रूपव्याप्तरूपो वा हेतुर्न्यायः। प्रतिज्ञाद्यवयव समूहो वा न्यायः। नीयते विवक्षितार्थसिद्धिरनेन इति न्यायः। तत्राच पञ्चावयवात्मक न्याय व्युत्पादकत्वात् तावदिदं शास्त्रं न्याय विस्तर इत्यादिभिः न्यायशब्द घटितैः ~~पदैं~~ पदैः व्यपदेशं लभते।

तर्कस्तु प्रमाण प्रदर्शित विषये युक्तायुक्त विचारः। स च प्रमाणानामुपकारकः। अयं तर्कः मीमांसा शब्देन व्यपदिश्यते। प्रमासाधन भूतानां प्रत्यक्षादीनामनुग्राहकत्वात् इति कर्तव्यता भवति तर्कः।

तदुक्तञ्च — धा

तत्राच प्रमाणं तत्त्वावधारणाय प्रवृत्तं कारणतया इतिकर्तव्यतामपेक्षते। तर्कश्च प्रमाण विषयं युक्ता युक्त विचारात्मा प्रमा ~~[illegible]~~ णं युक्ते तत्त्वे प्रवर्तमानमनुजानन् प्रमाणमनुगृह्णाति।(१) एवं च तर्कव्युत्पादकत्वात् तावदिदं तर्कशास्त्रं व्यपदिशति। क्वचित् हेतुशास्त्रत्वेनास्य व्यपदेशः। प्रत्यक्षादि प्रमाण चतुष्टय व्युत्पादकत्वात् खल्वस्य शास्त्रस्य प्रमाण शास्त्रमित्यपि व्यवहरति लोकः। अतएव शङ्करभगवत्पादैः पदवाक्य प्रमाणज्ञेनाचार्येणेति व्यासस्य विशेषणमुपात्तम्। तत्र पदं व्याकरणम्, वाक्यं मीमांसा, प्रमाणं न्याय शास्त्रम्।

अतएव —

पदवाक्य प्रमाणाब्धेः परं पारमुपेयुषः।
वाचस्पतेरियत्यर्थो ऽप्यबोध इति साहसम्॥(२)

वाकोवाक्यमित्यपि नितरामस्य दर्शनस्य व्यपदेशोऽस्ति। ऋग्वेदं भगवो ध्येमि, यजुर्वेदं सामवेदमथार्वणं चतुर्थमितिहास
(१) पुराणम्। वाकोवाक्यमेकायनम्, तत्र वाकोवाक्यम् तर्कशा-

"वाचस्पति मिश्र" "सांख्यदर्शन"

"ऋग्वेद" "दशम मण्डल"

स्त्रम्। इति शाङ्करभाष्यम्। वाकोवाक्यम्, इतिहासः, पुराणम्, वैद्यकम्, इत्येतावान् शब्दस्य प्रयोग विषयः। इति भाष्य व्याख्यानावसरे वाकोवाक्य शब्देनोक्ति प्रत्युक्ति रूपो ग्रन्थ इत्युच्यते।
यथा —

किंस्विदावपनं महत्, भूमिरावपनं महत्, इत्यादि। तथाच प्रतितन्त्र सिद्धान्त लक्षण सूत्रे न्याय भाष्ये —

पुरुष कर्मादि निमित्तो भूतसर्ग इति योगानाम्। इति प्रतिपादनात् न्याय दर्शनस्य योग इति व्यपदेशोऽस्ति विज्ञायते। यथा भौतिकानिन्द्रियाणि योगानाम्। इति तत्रत्यं वार्तिकमप्यनुसन्धेयम्।

एतावता प्रमाण वाक्य कदम्बेन विभिन्न विचारचर्चां समालोच्य न्याय विद्यायाः प्रयोजनं नैव तिरोहितं विद्यत इति निश्चयं प्रतीमः। प्रमाण वाक्य कदम्बेन प्रमेय वस्तुनः निरूपणं प्रमाणानां निरूपणमपि न्याय दर्शनस्योद्देश्यं विद्यत इति विदुषां विचारः।

न्याय दर्शनं वस्तुतत्त्वात्मकं वीवर्ति। दर्शनमिदं स्वानुभवाधारमाकलय्य दर्शनस्य विवेचनीयतत्त्वानि ~~[illegible]~~ ~~[illegible]~~ जगज्जीवनाख्यतया सदा व्याख्याति। अनया दृष्ट्या न केवलं जीवतत्त्वं तावदद्वैत सिद्धान्तवत् निष्क्रियं भोग शून्यञ्च। अथ च न केवलं तथागतानां क्षणिक विज्ञान परम्परया जीवतत्त्वं प्रतिभाति। तस्मात् न्याय दर्शन पद्धत्या जीवे कर्तृत्वं भोक्तृत्वं ज्ञानाश्रयत्वं विद्यत एव। जीवानां लक्ष्यं तु नितान्तमपवर्ग एव। अतए ~~[illegible]~~ एवापवर्गस्तु निश्चितं शाश्वतं दुःख निवृत्ति मात्रम्। अनेनैव कारणेन विवेचकानां विचारो न्याय दर्शनस्य दृष्टिकोणः यथार्थात्मकः। अस्मादेव कारणात् दुःख निवृत्तिः मानवजीवने सर्वापेक्षया नितान्तं महत्त्वं धत्ते।

भारतीय विचारकानुसारं दर्शनस्योद्भवः दुःख सम्बन्ध विचारणादेव। न्यायदर्शनस्य लक्ष्यं दुःखनिवृत्तिमात्रम्। स एवाऽपवर्गः। तथा च —
सर्वं हि शास्त्र विषयो न जिज्ञास्येत यदिमाम् दुःखं न स्यात्।

(१) न्याय दर्शन पद्धत्या जगदिदं तावत् सत्यम्। नेदं मायिकम्। समे विश्वस्य प्राणिनः प्रतिक्षणं तद्वदनुभवन्ति यदिदं जगत् नैव मिथ्या। सत्यमिदं वचः प्रतिभाति यत् जगदिदं सदा प्रवर्तते एवं विनश्यति। तथाचोक्तम् —

(२) ।। ऋतं च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ।।

एतावता जगतः मिथ्यात्वं नैव संघटते। जगदिदं नित्यसूक्ष्मातिसू-

।।ও০ ত০।।

क्ष्म परमाणुना निर्मितं ~~सा~~ सत्यमेव। जीवानां तावददृष्टसूत्रमाकलय्य तत्साहाय्येनैव परमात्मा जीवं नियमयति। अतएवेदं जगत् परमाणूनां नितान्तमव्यवस्थितसमूहमात्रं स्वीकर्तुं शक्यम्।

अपरे समालोचकास्तु न्यायदर्शनसन्दर्भे तावदित्थमाचक्षते यत्-यद्यपि न्यायविद्यायाः समुत्पत्तिसमयस्य नितान्तं वेतिहासोऽनाक्रान्ततया प्रमाणाभावान्धकारपटलैः समाच्छन्नतया च तं यथार्थरूपेण विज्ञातुं नैव क्षमन्ते साम्प्रतिकाः समालोचकाः। किन्तु तर्कस्य वास्तविकीं रीतिमनुसृत्य वास्तविकत्वं प्राचीनकालेऽपि साम्प्रतमपि वेत्तुं क्षेमिरे क्षमन्ते।

भगवती श्रुतिस्तु आत्मदर्शनस्य स्वरूपमाचचक्षे, तत्र कतिपय प्रमाणसाहाय्येन तर्कानुकूलमननमपि नितान्तमावश्यकमेव। एतदतिरिक्तोपनिषद्वेलायां राज्ञः विदेहस्याऽऽध्यात्मिकपरिषदि चतुर्भ्यः दिग्भ्यः तावदनेके तार्किकाः तात्त्विकविषयान् विवेचितुं समागच्छन्तिस्म। यस्यामाध्यात्मिकपरिषदि तां समस्यां समादधतिस्म। अतएवोपनिषद्वेलायां तार्किकाः साफल्यमाकलयितुं विभिन्नतर्कप्रधानान् नियमान् समाहृत्य तर्कविद्यायाः प्राथमिकावस्थायां समालोचकाः स्वीचक्रिरे। (४)

संहिता समये तार्किकप्रातिभदृष्टिसूचना नितान्तमुपलभ्यते। यत्र खलु प्रथमा दृष्टिः प्रातिभनाम्ना व्यवहरति। तदपरा दृष्टिः तार्किकीति संज्ञां ~~[illegible]~~ लभते। तर्कप्रधानाचार्या दृष्टिविभिन्ननियमेषु प्रतीयमानविरोधं परिहर्तुं तर्कप्रधानाचारं नितरां व्यवहरतिस्म। एवं श्रौतानुष्ठानसञ्जातविरोधं परिहर्तुं मीमांसाशास्त्रं श्रुतिसम्मततर्कं नितान्तमाद्रियते स्म। अस्मादेव हेतोः भारतीयदर्शनस्येतिहासे मीमांसकानां सर्वप्राथम्येन ~~श्रुतिसम्मते~~ श्रुतिसम्मततर्कस्य व्यवहारकक्षौ समानयनमूलकत्वेन तएव मीमांसकाः नैयायिकपदवीमलभन्। अनेनैव कारणेन मीमांसाशास्त्रीय न्यायं प्रायुङ्क्त। एवं बहुदिवसपर्यन्तं धर्ममीमांसाय न्यायमव्याहार्षीत्। तदनन्तरन्तु श्रौतविषयपरिधिमपास्य धर्मेतरविषयं विवेचितुं न्यायशब्दं प्रयुङ्क्तेस्म।

अमुना कालक्रमेण वैदिककाले तर्कप्रधानविषयाः दृष्टिपथे पथिकायन्ते। यद्युपनिषदां सिद्धान्तस्तु नितरामद्वय सिद्धान्तप्रतिपादकत्वं भजते। तथापि न्यायवैशेषिकमौलिकसिद्धान्तः नैव प्रतिकूलतां स्वीकुरुते। ~~तथापि~~

बृहदारण्यकसिद्धान्तमाकलय्य यदा मनः पुरीतति प्रविशति तदा स्वयमेव सुषुप्त्यवस्थायां नैव ज्ञानमाकलयति। अतएव न्यायवैशेषिकाः द्रव्यसंख्याकल्पनाप्रसङ्गे तावदुपनिषदां विचारपरिपाटीमाकलयामासुः। यतोहि उपनिषद ~~[illegible]~~

(১) বৃহ০উ০ - অ০ - ২ - ব্রা০ - ১ - ম০ - ১৯-২০,

(২) ছা০উ০ - অ০ - ৬,- খ০ - ১২ - ম০ - ১-২,

महाप्रबन्धेषु द्रव्यसंख्या निरूपणं स्पष्टमवलोकयामः। तथाच- अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्तति सहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो महाब्राह्मणो वातिघ्नीमानन्दं गत्वा शयीतैव मेवैष एतच्छेते। अन्यच्च-

व स यथोर्णनाभिस्तन्तुनोच्चरेद्यथाग्नेः क्षुद्राः विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्। (१)

एवं न्याय वैशेषिक सम्मत पदार्थ तत्त्व निरूपण पद्धतिरपि सदोपनिषा नितान्तं गृहीता। तद्यथा—

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति।

स य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान् प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति। (२)

अतएवोपनिषदां प्रस्तुत सिद्धान्तमाकलय्य न्याय वैशेषिकौ यथा तथ्य रूपेण तच्चित्रणं चक्रतुः। तस्मात् न्यायवैशेषिकयोः श्रुतिमूलकत्वं सुसंगतमेवेति नितरां ज्यायान् पक्षः।

॥ न्यायदर्शनस्य प्राचीनत्वम् ॥

न्यायदर्शनं कदोदितं नितरामिति विवादास्पदोऽयं विषयः। छान्दोग्योपनिषदि पठनीय विषये वाकोवाक्य नामविद्याया रुल्लेखोऽस्ति। किन्तु वाकोवाक्य विद्यायाः रूपं कीदृशमासीत् इति निर्णेतुं नितरां दुष्करमेवेति समालोचकानां विमर्शः। अतएव ते न्याय शास्त्रस्येतिहासस्य स्पष्टं रूपं गौतमस्य न्यायसूत्रादेव प्राप्नुवन्ते। परन्तु कस्तावत् न्यायसूत्रं प्रणिनाय। यतो हि तावदितिहास ग्रन्थे क्वच गौतमस्योल्लेखः ~~क्वचिच~~ क्वचाक्षपादस्य। किमत्राक्षपाद एव गौतमः किम्वान्यदीय एव। समस्येयं महती समुच्छ्रिता जायते।

(१) ॥आचार्य विश्वेश्वरस्य तर्कभाषा भूमिका ॥ पृ०-१६-२०,

॥छा० पु० अ० सा० ख० - १-४-५-म०॥

किन्त्वत्र प्राचीन परम्परा नोभयोः पौर्वापर्यं स्वीकुरुते। परन्तु नवीनास्तु तद्विपरीत विचारं व्याचक्षते। (व) न्यायसूत्रस्वरूपसन्दर्भे महान्मतभेदो दृश्यते। प्रो० जैकोबी महानुभावानां विचारानुसारं गौतमसूत्रे तत्त्वमीमांसीयखण्डं कालान्तरे प्रक्षिप्तमिति। अतएव न्यायसूत्रस्य मूलरूपं नोपलभ्यते साम्प्रतम्। परन्तु भारतीय समालोचकानुसारं कौटिल्यात् प्रागेव सूत्रमिदं भगवान् अक्षपादः निर्ममौ। तेनेशातः प्राक् पञ्चम शतके षष्ठ शतके वा न्यायसूत्रं भगवताऽक्षपादेन व्यरचि।

परन्तु वस्तुस्थितिं समालोचयता तावदिदं भणितुं यत् खलु न्यायशास्त्रस्येतिहासः न्यायसूत्रादेव दृष्टिगोचरो भवति पक्ष इति नैव साधीयान्। कथं भारतीय दार्शनिक सिद्धान्तस्य मूलं नितान्तमुपनिषत् साहित्यम्। अस्मादेव हेतोः तत्सिद्धान्तमूलमनुसृत्य न्यायशास्त्रस्येतिहासः उपनिषत्कालादेव प्रारभते।

उपनिषत्साहित्ये न्याय विद्या ~~वाको~~ वाकोवाक्य नाम्ना व्यवहृता। अतः बुद्धजन्मकालतः प्राक् न्याय विद्यायाः विपुल कार्यात्मकेतिहासस्त्ववश्यमेवोपनिषत्कालादेव समेषां लोचनपथे समागच्छति। तथा च—

सनत्कुमारपादपङ्कजमनुसृत्योपदिष्टः खलु नारदः किल—नाम ऋग्वेदो यजुर्वेदो सामवेद आथर्वणश्चतुर्थ इतिहास पुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देव विद्या ब्रह्म विद्या क्षत्र विद्या नक्षत्र विद्या सर्पदेव जन विद्या नामैवैतन्नामोपास्स्वेति। स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति। (२)

अनेनोपनिषद्वाक्येन न्याय शास्त्रस्येतिहासः नितान्तं प्राचीनः। तस्मात् तर्कप्रमाणपांसुलाः विद्वांसः गौतम सूत्रादेव न्याय शास्त्रं विदाङ्कुर्वन्ति तत् तुच्छमतीनां विमर्शः। सत्यपि प्रमाणकुरे गीर्वाणगुरावपि तद्विपरीते नैव प्रामाण्यं गीर्वाण गुरूणां वचसि। अतएव भट्टाचार्याः व्युत्पत्तिवादे एवं प्रत्यपीपदन् यत्—
नहि कश्चिद् विपरीतलोचन युक्तिबलाद् वस्तुसिद्धौ बाधकं भवति। नहि प्रमाणानां सहस्रं गगनकुसुमाय मानत्वं सोढुं शक्नुयादिति निश्चयं प्रत्येमि। एवमादिकाव्येऽपि न्याय विद्यायाः चर्चा कविना वि-

"न्यायदर्शन" "डा० देवराज"

"न्याय वार्तिक तात्पर्य भूमिका" "विन्ध्येश्वरीमहाभाग"

(३) "ब्रह्मसूत्र" २-१-११,

भर्तृहरि- वा० प० - १-२४

ब्रह्मसूत्र शाङ्करभाष्य- २-१-११,

"न्याय भाष्य" वात्स्यायन - पृ० - ३,

मनुस्मृति - अ० - ८-४३,

वेद व्यासः मोक्षधर्मे —
व्या० म० भा० मो० ध०

विहिता। येनोक्तपक्षः दृढो भवति। (१)

केचन इतर्धियस्तु —

यः पठेत् गौतमीं विद्यामिति नितरामादिकाव्यवचनसन्दर्भ सौन्दर्यमाकलय्य नितान्तमाचते यत् न्यायशास्त्रं केषु पुराणेषु निन्दितं तेनाऽस्वीकार्यमिति नितरामास्तिकेनेति कमपि वादमुत्थाप्य तद्विवेचनमकार्षुः।

(२) तत्रानुक्ताः ~~केचनकेच~~ केचन विषयाः प्रसङ्गात्पुनः प्रस्तूयन्ते। तथाच "तर्काप्रतिष्ठानात्" इत्यादि सूत्रेण पुरुषोत्प्रेक्षामात्र ~~निबन्धा~~ निबन्धनानां तर्काणामप्रतिष्ठितत्त्व दर्शनात् तर्को न प्रमाणमिति निर्णायि। तत्र शङ्कराचार्यपादैर्वित्तेण तर्कस्याप्रतिष्ठितत्वमुपात्तम्।३

अन्यच्च —

यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपद्यते ॥

~~अतोऽप्रतिष्ठितत्व~~ अतोऽप्रतिष्ठित तर्कप्रधानं शास्त्रमनादरणीयमिति वेदान्तिच्छायया शङ्का। परन्त्वत्र समाधातव्यम् खलु प्रत्यक्षागमविरोधी यस्तर्कः स एवाप्रमाणम्। यस्तु प्रत्यक्षागमानुकूलः सप्रतिष्ठितत्वादुपादेय एव। अतएव तत्रैव शांकरभाष्य~~म्~~ष्यें नहि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुमिति।(४)

भगवान् मनुरपि वेदशास्त्राविरोधी तर्कः नितरां ~~[illegible]~~ परिहार्यः। न्यायभाष्यकारोऽपि प्रत्यक्षागमाश्रितमनुमानमन्वीक्षेति वदन् आगमानुकूलं प्रत्यक्षाविरोधिनं तर्कमेव स्वशास्त्रव्युत्पाद्यं तर्कं कथयति। यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं सः न्यायाभास एव।(५)

~~आ~~ अतएवाभासरूपतर्कसाम्यं समीचीनतर्केऽऽ~~आ~~रोप्य न्यायशास्त्रदूषणं न प्रामाणिकानां चेतो रञ्जयेत्। यदिनाम तावत् आन्वीक्षिक्यपराभिधानं न्यायशास्त्रमपरिग्राह्यमभविष्यत्तदोल्लिखिताध्येतव्यासु विद्यासु त्रयी निर्विशेषं आन्वीक्षिकीमपि कथं निरदेक्ष्यत् तथाच——

आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः।
त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्॥

अन्यच्च —

तत्रोपनिषदं तात परिशेषं च पार्थिव।
~~मथ्नामि~~ मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्॥

अनेन प्रस्तुतवाक्येनान्वीक्षिक्यनुगृहीत उपनिषदर्थः ग्राह्य एवेत्युवाच। यद्यपि ~~न~~ वेदान्तिनः विरुद्धाः केचिद्देशाः न्यायवि

न्या० पी० -पृ० - ८७" (१)

मी०पा० वेदान्त दोशिकै: -२९,

“बलदेवोपाध्याय”   “भारतीय दर्शन”
डा. राम नाथ”   “न्यायदर्शन”

~~स्तो भवेयुः~~ स्तो भवेयुः तथापि तावतापि तस्य बहिष्कारो न न्याय्यः। उपजीव्यानां बहूनामंशानां सद्भावात्। तदुक्तञ्च ——

यदिवा नाति बहिष्कारो नातीव च परिग्रहः।
सांख्यादिवदियपि स्यात् समाधिस्त्वैष तण्डुलः।
उपजीव्य बहुत्वेन विद्यास्थान निवेशनम्,
विरुद्धांशैक विषया स्थलादिषु बहिष्क्रिया ॥(१)

मीमांसा शब्दस्य युक्तायुक्त विचारात्मा तर्क एवार्थ इति तात्पर्यटीकायाम्। यत् मीमांसाख्यस्तर्कः सर्ववेद समुद्भवः॥ इति प्रमाण वचन प्रदर्शन पूर्वकं समुपात्तम्। तथा च न्याय शास्त्रेऽपि तर्कः व्युत्पाद्यन्ते तथा मीमांसा शास्त्रेऽपि इति कथमनयो पृथग् विद्यास्थानत्वमिति काचिद् आशङ्का समावतति। तथापि न्याय शास्त्रे सामान्यतः तर्कस्य लक्षणं तदङ्गानि तदाभासाश्च व्युत्पाद्यन्ते। मीमांसायां तु विवादास्पदानि वेदवाक्यानि गृहीत्वा तत्तद् वाक्यार्थ निर्णयाय युक्ताः तर्क विशेषाः प्रतिपाद्यन्ते। तावदिदमेव पार्थक्यमुभयोः।

तदुक्तञ्च ——

न्यायाख्ये धर्मविद्यास्थितिपदमुदितं तत्र तत्राप्त शास्त्रे-
तेनैवालं तदन्यद् भवति कुतर्को भीतिमात्र प्रवृत्तेः।
इत्येतन्नानुयोज्यं नय पथ विषयो मानतर्कादि मात्रं-
(२) मीमांसायां तु तत्तच्छ्रुति गति विषयालीति भेदा निरस्याः॥

एवं पद्धत्या सूक्ष्मभेदमाकलय्य सत्यपि विद्यास्थान भेदे उभयत्र न्याय प्रतिपादनमस्तीति शास्त्र द्वयेऽपि न्याय शब्द घटिताः ग्रन्थाः निर्मायिषत। यथा न्यायभाष्यम्, न्यायवार्तिकम्, न्याय भूषणम्, न्यायसार इत्यादयो ग्रन्थाः दरीदृश्यन्ते। मीमांसा शास्त्रेऽपि न्याय माला-न्याय रत्नमाला न्याय सुधादयो ग्रन्थाः सन्ति दृश्यन्ते।

अतएव काल क्रम मर्यादया भारतीय दर्शनस्येतिहासे ग्रन्थसम्पत्त्यनुरोधेन गौतमोपज्ञमिदं न्याय शास्त्रं बहुभिर्ग्रन्थनिर्माणादिभिः महतीं वृद्धिं प्राप्य राजते। विक्रमात् प्राक् पञ्चम शतका दारभ्याधुनातन पर्यन्तं न्याय दर्शनस्य विमलधारा निर्विघ्नतया समागच्छत्येव। (३)

यद्यपि प्राक् वेलायां न्याय वैशेषिकौ स्वातन्त्र्यतया समुत्पन्नौ। किन्तु कालान्तरं प्राप्य वैशेषिकस्य सहायकमेव न्यायशास्त्रमभूत्। तेन न्याय दर्शन सिद्धान्त ग्रन्थे प्रतितन्त्र सिद्धान्ततया वैशेषिकमचीक्लृपत्। बौद्धसमये न्याय वैशेषिकयोः पारस्परिक सम्बन्धः नितान्तमपरिहार्य एव। एकादश शतके शिवादित्यस्तु सप्त पदार्थ निरू-

पण प्रसङ्गे न्याय वैशेषिकयोः समन्वयं चक्रा। न्यायसम्मत षोडश पदार्थस्य वैशेषिक सम्मत षट् पदार्थे समाविष्टतया तद् व्याख्यानं चक्रे। अनेके दार्शनिकास्तु गौतम सूत्रात् कणादसूत्रस्य प्राचीनत्वं स्वीचक्रिरे।

न्याय दर्शनस्येतिहासः नितरामापाततः पञ्च शतोत्तर सहस्र द्वयावधिकः। तत्र विकासस्य धारा तदुभय प्रकारा। तत्र प्रथमा धारा गौतम सूत्रादारभ्य प्रवर्तते। प्रमाण प्रमेय संशय प्रयोजन दृष्टान्त सिद्धान्तावयव तर्क निर्णय वाद जल्प वितण्डा हेत्वाभास छल जाति निग्रहस्थान भेदात् षोडश पदार्था ~~[illegible]~~ स्वीकृताः। यां पदार्थ विभाजन प्रणालीमाकलय्य पदार्थ मीमांसात्मक प्रणालीं निवोचत्। यां पद्धतिं साम्प्रतिकाः “कैटेगोरिकल” प्रणालीं व्यवहरन्ति।

तदपरा प्रमाण मीमांसात्मक प्रणाली श्रीमता गङ्गेशेन प्रणीता। या खलु प्रणाली “एपिस्टेमोलॉजिकल” शब्देन प्रथिता विद्यते। सैव पद्धतिः श्रीमता गंगेशोपाध्यायेन तत्त्व चिन्तामणौ प्रवर्तिता। तत्र प्रथमा प्राचीन न्यायेन व्यपदिष्टा तथा नव्य न्यायेनाभिहिता।

“आत्मतत्त्व”

मानाधीना मेयसिद्धिरिति वचन सन्दर्भ सौन्दर्यमासाद्य मेयसिद्धिरिति प्रतिपादन चतुरेण श्रीमता गंगेशेन प्रमाणादि तत्त्वानि तत्त्वचिन्तामणौ नितरां प्रत्यपादि। नहि प्रमाण तत्त्वमन्तरा प्रमेय पदार्थस्य सिद्धिः क्वाचिदपि दृष्टा। अतएव प्रमेय पदार्थस्याभ्यर्हितत्वेन तत् प्राथम्येन प्रमाणादिपदार्थं निरूपयितुं प्रवर्तते। किन्तु प्रमाणपदार्थस्य निरूपणं केवलं प्रमेय सम्पादनतया। तस्य मेय पदार्थस्य मानायत्तसिद्धिकत्वमिति नितरामौत्सर्गिकमेवेति निश्चयं प्रतीमः।

अस्मादेव हेतोः भारतीय दर्शनं प्रमेय पदार्थेषु आत्मतत्त्वं निरूपयितुं प्रयतते। यद्यपि सर्वेषु दर्शनेषु आत्मतत्त्वं वैशद्येन निरूपितम्। परन्तु न्याय दर्शनस्यात्मनिरूपण पद्धतिः नितरां विलक्षणा। तेन भारतीय दर्शनस्य तावदिदं लक्ष्यं प्रतिभाति यत् तेषां प्रधानोद्देश्यं केवलं आत्मतत्त्व प्रतिपादने विद्यते। उपनिषत्कालादेव भारतीय दार्शनिकाः आत्मज्ञानाय नितरां प्रयतन्ते स्म। तस्मात् “आत्मा वा अरे द्रष्टव्यः” इति सर्वेषां मूल मन्त्रः।

न्याय दर्शने आत्मतत्त्वस्य परीक्षा कया दृष्ट्या कृता विद्यते। ज्ञानेच्छाकृतीनां तावदाधारस्तावदात्मेति। प्रतिसन्धानं स्मरणं प्रत्यभिज्ञानं सुगमात्मनैव सञ्जायते। अतएव

"न्याय सूत्र" "अक्षपादः" "१-१-१०" (१)

"न्याय भाष्यम्" "१-१-३" (२)

न्या० बो० - पृ० - ३४१, (३)
न्या० सू० - ३-१-१,
न्या० वा० ता० - ५०१,

(४) न्या० म० - भा० - २ - पृ० - ६,
न्याय सूत्रं - १-१-१०"

आत्मा द्विविधः जीवात्मा परमात्मा चेति। परमात्मा तावदीश्वरः महेश्वरो वा। जीवस्तु प्रतिशरीरं भिन्नः, विभुर्नित्यश्च।

परमात्मनः नितरामस्तित्वसन्दर्भे शब्दानुमाने प्रमाणे नितान्तमभ्युपगच्छतः। स्वात्मनः ~~सन्देमि~~ सन्दर्भेऽपि शब्दानुमानयोः प्रामाण्यं विद्यत एव। नात्र न्यायविदुषां विवादावसरः समुपसर्पति। परन्तु तावतापि आत्मनः मानसप्रत्यक्षत्वे नैव सामञ्जस्यं स्वीकुर्वते नैयायिकाः। भगवान् अक्षपादोऽपि केवलमात्मनः तस्यानुमानचर्चां चर्चितवान्। किन्तु नैवात्मनः प्रत्यक्षं तर्कप्रमाणाभ्यां प्रतिपन्नम्। (१)

प्रमाणसंप्लवव्याख्यानवेलायां न्यायभाष्यकारः वात्स्यायनस्तु सामान्यतयात्मनः योगिप्रत्यक्षविषयत्वमेवाऽङ्गीकरोत्। किन्तु नैव लौकिकप्रत्यक्षविषयत्वम्। (२)

अनेन प्रामाणिकवचनेन विज्ञायते खलु नैव मानसप्रत्यक्षयोग्यत्वमात्मनः। न्यायदर्शनसमानतन्त्रवैशेषिकदर्शनस्य प्राचीनसाहित्यावेक्षणेन एवं तद्व्याख्याग्रन्थमन्तरैव स्पष्टमाभाति किल न्यायसूत्रस्य समर्थने विद्धः। किन्तु उद्योतकरवाचस्पतिमिश्रास्तु अहमित्याकारकज्ञानविशेषगुणेन सह मानसप्रत्यक्षयोग्यतां स्वीचक्रिरे। (३)

जयन्तभट्टास्तु आत्मनः प्रत्यक्षयोग्यत्वं स्वीकुर्वन्तोऽपि स्वानुभवरहस्यात्मनः सदानुमेयत्वमेव स्वीचक्रुः। (४) आत्मानमनुमातुं भगवान् अक्षपादोऽपि इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि समुल्लिख्य तमेव सिद्धान्तं प्रणिनाय। ~~४~~(५)

यद्यपि ज्ञानमात्रमेवात्मनः नितरामनुमापकं विद्यते तथापि प्रसंगानुरोधात् भगवान् ~~भगवान~~ गौतमस्तु निर्णयात्मकतर्कवितर्कसम्प्राप्तज्ञानमेव हेतुत्वेनाङ्गीकरोत्। अनेनैव हेतुनाऽऽत्मनः तावदनुमानसन्दर्भे वचनमिदं तावत् स्मर्तव्यं यत् हेतुस्तावदयं स्वात्मनः स्वाभाविकतयाऽनुमानाय नैव प्रयुङ्क्ते। किन्तु प्रत्यात्मनः नितरामनुमानाय। ज्ञानेच्छाप्रयत्नादयोऽपि जीवात्मपरमात्मनोः स्वतएवानुमापकाः हेतवः।

यदि नाम जयन्तभट्टानां विचारानुसारं परमात्मनि महेश्वरे सुखसत्ता यदि मान्या विद्यते चेत्तदा सुखादयोऽपि जीवात्मपरमात्मनोः सदानुमापकत्वेन स्वीकर्तव्याः।

अमुया व्याख्यानक्रममर्यादया नितरां वेविद्महे यत् वयं तावत् प्रथमः केनापि माध्यमेन सुखानुभवतया पुनः तदर्थं प्राप्तुं वाञ्छामः। तस्मात् सुखानुभव सुखस्मरणयोः नितरा

(१) "गीता" "वासुदेवः"

"न्यायमञ्जरी" जयन्तभट्ट" प्रमेयप्रकरणम् (२)

मविभाज्य सम्बन्धः कल्प्यः। एतेषां समेषां तत्त्वानां तावदाधारं केवलमेकमेव तत्त्वं साधीयः। नैतादृशं तत्त्वं शरीरं नैवेन्द्रियं वान्यद् वा किमपि। किन्तु तयोः प्रतिक्षणं नैसर्गिकगत्या परिवर्तनात्। शरीरेन्द्रियाणां प्रतिक्षणं परिवर्तनं स्वाभाविकम्। तेन गीतायां प्रत्यपादि वासुदेवन् —— यत्

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥

एतावता भगवद् वाक्येन शरीरेन्द्रियाणि प्रतिक्षणं परिवर्तन्त इति निश्चिनुमः। तस्माच्छरीरेन्द्रियाणां ज्ञानाश्रयत्वं नोचितं विध्यते।

शरीरेन्द्रियाणां विनष्टेन शैथिल्येन चानुभवस्मरणेच्छादयोऽपि तदाश्रयतां भजन्ते। अनेनैव हेतुना किमेतेभ्यः भिन्नं किमपि विलक्षणं तत्त्वं मन्तव्यमेव। सुदीर्घकालेऽपि नितामपरिवर्तितः सन् समुल्लिखितानां त्रयाणां गुणानामाश्रयतया कश्चन पदार्थः सुतरां कल्प्यः। तदेव तत्त्वमित्यात्मा। अनेन प्रकारेण सुखदुःखेच्छाप्रयत्नादिभिस्तावदात्मा विज्ञातव्यः। (ब)

तर्कान् वितर्क्य निर्णयात्मकज्ञानवाचकत्वं ज्ञान शब्दे नहि केवलं ज्ञानसाधारणस्य। निर्णयात्मकज्ञानस्य विश्लेषणेन निम्नलिखित तथ्यानि समायान्ति। कस्यापि वस्तुनः साधारणतय तज्ज्ञानं प्राप्नुमः। तदेव ज्ञानं वैशद्येनाऽऽकलयितुं स्वाभाविकी जिज्ञासा जागर्ति। जिज्ञासामिमां ~~शान्तयितु~~ शमयितुं विभिन्न विचारकाणां प्राञ्जलविचारान् संस्मृत्य चाधीत्य नैसर्गिक एव संशयः समुत्पद्यते यत् किमत्र वास्तविकत्वम्। ततः चरम समये श्रुति मूलक तर्कान् विद्वांसः निश्चिन्वते। तावदिदं विश्लेषणं न्याय सूत्रकृतनिर्णयपरिभाषया नितान्तं समीचीनम्। प्रस्तूयमानेन विश्लेषणेन स्पष्टं वेविद्मः यत् ज्ञानेच्छा संशय तर्क वितर्कादयो हि तावत्यानिवार्यतया सम्भवन्ति। अतएव समेषां तर्काणामाश्रयतया किमप्येकं तत्त्वं सदाऽपरिवर्तिततया मन्तव्यम्। तस्मात् प्रतिपादित वचन कदम्बेन विदाङ्कुर्वन्ति विद्वांसः किल स्वल्पेनैव समयेन परिवर्तनमाकलयतः शा-

।।শ্যা০ স০ সা০।। - ২.১০.৪২,

रीन्द्रियस्य नश्वरभौतिकपदार्थस्य च तदाधारतया विज्ञातुमशक्यात्।

अमुना कारणवाक्येन शरीरेन्द्रियाणां प्रतिक्षणं परिवर्तनतया कोऽपि नित्यपदार्थः तदाश्रयतया कल्प्यः। तदेवात्मतत्त्वमिति निश्चयं वेविद्मः। आत्मनामस्तित्व समर्थनान्तरमपि आत्मनः स्वरूपसन्दर्भे विभिन्नाः प्रतिपत्तयः जायन्ते। भारतीय दार्शनिकानां विचारे आत्मनामस्तित्वं समर्थनापेक्षया तत्स्वरूप निर्धारणमेव नितरां महत्त्वप्रदम्। कथंतु केनापि रूपेणात्मनः सदास्तित्वं विद्वांसः स्वीकुर्वन्त एव विद्यन्ते। अतएवात्मनामस्तित्वं नैव कदापि विवादास्पदं प्रतिभाति। तेन तत्स्वरूप निर्धारणमेव सर्वेषामुद्देश्यं प्रतिभाति

अन्यान्य तत्त्वनिरूपणवत् आत्मतत्त्वस्वरूप सन्दर्भे न्यायदर्शनस्य स्वतन्त्रएव सिद्धान्तः। सिद्धान्तोऽयं तावत् वैशेषिक दर्शनेन सह समत्वमनुकरोति। अतएवात्मनां गुणाश्रयत्वं संगच्छत एव। तेनात्मा नित्यः व्यापकः कर्ता भोक्ता च। तस्मात् ज्ञानेच्छा द्वेष प्रयत्नादिभिः तावदात्माऽनुमातव्यः। अनुमानाय हेतोः सत्तापक्षे सुतरामनिवार्यतयाऽऽत्मनि गुणानामस्तित्वं सिद्धत्येव।

ज्ञानेनैव भावनाख्य संस्कारोऽपि सिद्धत्यात्मनः। धर्माधर्माख्यादृष्टन्तु आत्मन्येव विद्यते। अनेनैव प्रकारेण न्याय दर्शन शास्त्रं गुणानामाश्रयतया आत्मा द्रव्यमेव स्वीकुरुते। न्याय दर्शन पद्धत्या आत्मा नित्यः। इच्छातः प्राक् सुखस्मरणं तस्मात् प्राक् सुखानुभवः नितान्तनिवार्यः। शरीरेन्द्रियाणां तदाश्रयत्वे नव जात शिशुः कथं स्तन्यपाने प्रवर्तेत। किन्तु दुग्धपानेच्छातः प्राक् तज्जायमान सुखस्मरणं तस्मादपि प्राक् तन्मूलभूत सुखानुभवः सदा स्वीकार्यः। आभ्यां हेतुभ्यां मातुः स्तनं समवलोक्य शिशुस्तावत् तज्जन्यं सुखमनुस्मरति। किन्तु वर्तमान जन्मनि सुखानुभवः नैव सम्भवोऽस्ति। अस्मादेव कारणात् न्याय दर्शन पद्धत्या पूर्वजन्म नितरां युक्तिबलात् सिद्ध्यति। तत् पूर्वजन्मनः प्रथमां प्रवृत्तिं समवलम्ब्य तस्मादपि प्राक् पूर्वजन्मनः कल्पनयाऽऽत्मनः नित्यत्वं नैसर्गिकमेवेति ज्यायान् पक्षः। — (१)

आत्मनः नित्यत्वाभावे कर्मणां सिद्धान्तोऽपि झटित्यचिरमेव विनश्येत। कथं त्वात्मना विनाशेन सह तत्राश्रित कर्मणां विनाशोऽपि त्वरि~~का~~तमेव सम्पद्येत। ततः तदाश्रित कर्मविनाशस्यानिवार्यतया चारु तत्त्वज्ञानमन्तरा कर्माण्यपि विनश्येयुः। ~~प्रतिसांवत्~~ प्रतिसांवत्सरिक सृष्टिप्रक्रियादारभ्य साम्प्रतपर्यन्तं जाताः समस्ता जीवानामपि विनाशतां गच्छेयुः। परन्तु नैतादृशी स्थितिरस्ति। परन्तु स्थि

(१) त० - सं० दी० - पृ० - १३,

त० भा० - पृ० - १४९" (२)

न्या० ता० प० शु० - "उदयनाचार्य"

तिस्तु जगतः विलक्षणैव। तस्मादात्मनः नित्यत्वं ~~सर्वात्मनि~~ सदाक्षतमेव। अनेनैव क्रमेण तन्नित्यतयाऽवयवादिरहितत्वमेव तस्य कल्प्यम्। यत्र सावयवत्वं नैव तत्र कदापि नित्यत्वं संगच्छेत। तस्मादात्मा नित्यः निरवयवश्च।

यतोहि आत्मा नित्यः निरवयवश्च तेन तत्र व्यापकत्वमावश्यकमेव। व्यापकत्वं परममहत्परिमाणवत्वमेव। यदि नाम तावत् किमपि द्रव्यं नित्यं विद्यते चेत्तर्हि तस्य तदाऽणुपरिमाणवत्त्वमेव। परममहत्परिमाणवत्त्वमेव। अनयोर्विकल्पयोर्मध्ये तावदात्मनः नैवाणुपरिमाणत्वं संघटते। कथं तु तथात्वे समस्तशरीरस्य विभिन्नावयवे सम्पद्यमानसुखानुभवः नैवात्मनि सम्भवेत्। अतएव तस्य परममहत्परिमाणवत्त्वमेवतस्यावगन्तव्यम्।१।

परन्तु नैयायिकास्तु नाङ्गीकुर्वन्ते पक्षमिमं प्रस्तुततर्कस्यनौचित्यात्। अतएव मान्यास्तु अणुपरिमाणात्मकस्य मनसः नित्यद्रव्यत्वे समस्तशरीरावयवे सुखदुःखाद्यनुभवे तदेव साधनमपेक्षते चेत् तदाणुपरिमाणवत्त्वमेव कथंमानुभवति तावदात्मा। तस्मादात्मनः व्यापकत्वसम्पादनाय अदृष्टाश्रिततर्कं स्वीचक्रिरे।(२)

अदृष्टाश्रिततर्कस्य तात्पर्यमिदमेव खलु न्यायदर्शनपद्धत्या जीवात्मनः कस्याप्युपभोगसाधननिर्माणः अदृष्टमन्तरा नैव सम्भवति। यथा परिस्थित्यामस्यां यदा कोऽपि महानुभावः वाराणसीतः वैद्यनाथं प्रयाति, तत्र गते सति सा व्यक्तिः मिष्टान्नं भुङ्क्ते तदा तद् मिष्टान्ननिर्माणे तस्याः व्यक्तेः नितान्तमदृष्टस्य योगदानः स्वीकार्य एव। अतएव तस्यां वेलायां तद्व्यक्तेः तत्रादृष्टं कल्प्यम्। आत्मनो गुणोऽस्ति तावददृष्टम्। अदृष्टस्य सत्ताऽऽत्मानमन्तरा नितरां निराधारा। अनेनैव हेतुनाऽऽत्मनः व्यापकत्वं युक्तियुक्तम्। (३)

अतएवात्मा कर्ता, ज्ञानेच्छाप्रयत्नानां तावदपरिवर्तनीयपरम्परा सर्वमान्येति समेषां विमर्शः। यद्यप्यात्मा तावत् सुखदुःखानां भोक्ता विद्यते। अतएवात्मा ज्ञानवान् प्रयत्नवान् इच्छावान्। किन्त्वात्मनः स्वतः प्रकाशत्वं नैवाऽस्ति। तत्र जड़त्वमेव। परन्तु यद्यात्मनः ज्ञानाश्रयत्वं स्वीकुरुते कथं तत्र जड़त्वं संगच्छते। तदेव वैचित्र्यं प्रतिभाति। परन्तु न्यायवैशेषिकाभ्यामात्मनि तावदचेतनार्थे नैव जड़त्वं ~~स्वीक्रियते~~ विज्ञायते। किन्तु स्वप्रकाशाभावतया जड़त्वम्। तस्मान्नास्ति किमपि वैचित्र्यमाभाति।

न्यायदर्शनं प्रतिजीवितशरीरेषु आत्मनः भिन्नत्वमेव स्वीकुरुते। न हि नितान्ताद्वैतवेदान्तवत् एकत्वं मनुते। वास्तविकन्तु ज्ञानादिगुणानां नितान्तमेककालिकं वैषम्यं कस्मिन्नात्मनि चैतन्यमुत्पादयति। किन्तु तदभावमेव जनयति।

सर्वं प्रकाराणि एकस्मिन् समये जीवितशरीरे ज्ञानानि जायन्ते। तत्समयावच्छेदेन तदपरशरीरे नैव ज्ञानानि समुत्पद्यन्ते। एकस्यां वेलायां कोऽपि शेते कोऽपि क्रन्दति, चेत् तस्मिन् काले कोऽपि आस्ये प्रकाश्य हास्यं विकासयति। कोऽपि धावति चेत् कोऽपि व्यभिचारे सुखं विन्दति। तस्मात् प्रतिशरीरे आत्मनः एकत्वप्रतिपादनं नैव युक्तियुक्तम्।

तत्रापि विषमायां परिस्थित्यां शरीरभेदेनात्मनः भिन्नत्वे दृश्यमाने तथाऽपि युक्तिबलात् वेदान्तिनः तत्रैकत्वं शोभन्ते। तदप्याश्चर्यमेव।

आत्मत्वाभिसम्बन्धात् आत्मेत्युच्यते। आत्मनः सौक्ष्म्यात् प्रत्यक्षाभावतयाऽपि शब्दाद्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते। वास्यादीनां करणानां कर्तृत्वप्रयोज्यदर्शनात्। शब्दादिषु च प्रसिद्ध्या तत्प्रसाधकतयाऽऽत्मानुमीयते। नहि शरीरेन्द्रियमनसां तत्त्वम्। अज्ञत्वात्। नहि शरीरस्य चैतन्यम्। पटादिवत् भूतकार्यत्वात्। मृते चाऽसम्भवात्। नेन्द्रियाणां करणत्वात्। इन्द्रियाणामुपहतेषु विषयाऽसान्निध्ये स्मृतिदर्शनात्। नापि मनसः तत्त्वम्। करणान्तरानपेक्षित्वे युगपदेव तदालोचनप्रसङ्गात्। करणभावाच्च। तेन परिशेषात् आत्मकार्यत्वात् तेनात्मा समधिगम्यते।

शरीरसमवायिनीभ्यां हिताहितप्राप्तिपरिहारयोग्याभ्यां प्रवृत्तिनिवृत्तिभ्यां रथकर्मणा सारथिवत् यत्नवान् विग्रहस्याधिष्ठाता नितरामनुमीयते। यथा प्राणादिभिः वायुरनुमीयते तथा प्रयत्नादिनाऽऽत्माप्यनुमीयेत। शरीरपरिगृहीते वायौ विकृतकर्मदर्शनात् भस्त्राध्मापयितृवत् निमेषोन्मेषव्यापारादिना नियतेन दारुयन्त्रप्रयोक्तेव शरीरस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वात् गृहपतिरिवात्मानुमीयेत। अभिमतविषयसम्पादनकरणसम्बन्धनिमित्तेन मनः व्यापारादिनाऽऽत्मानुमीयते। गृहकोणकेषु पेलकप्रेरक इव दारकवत् आत्मा सदानुमीयते।

चाक्षुषप्रत्यक्षानन्तरं रसानुस्मृतिमर्यादया रसनक्रियादर्शनात्, अनेकगवाक्षान्तर्गतप्रेक्षकवत् रूपरसानां कश्चिदेको विज्ञायते। तथाच सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मादिभिर्गुणैः गुण्यनुमीयते। नहि सुखदुःखेच्छाप्रयत्नादयः शरीरेन्द्रियगुणाः सन्तिष्ठन्ते। कथं तु अहंकारेणैकवाक्यत्वाभावात्। स्वदेशवृत्तित्वात् एवं अयावद्द्रव्यभावित्वात् बाह्येन्द्रियाणां

"न्यायकन्दली"

छा० पु० आ०- ब ख०- ३- म०-३

ऽप्रत्यक्षत्वात् तथाचाहं शब्देन गम्यतया पृथिव्यादिशब्दव्यतिरेकात् आत्मा नित्यमवगन्तव्यः। =

तेनात्मनां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वसंयोगविभागाः गुणतया सदा गम्यन्ते। आत्मलिङ्गाधिकारे प्राणापानादिसूत्रेण बुद्ध्यादारभ्य प्रयत्नान्ताः षट् गुणाः प्रतिपादिताः खल्वात्मनः। “आत्मान्तगुणानामात्मान्तरेऽकारणत्वात्” सूत्रादिना आत्मान्तरगुणानामकारणत्ववचनात् धर्माधर्मादयः गुणाः विद्यन्तेऽऽत्मनः। एवमात्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः” सूत्रादिना स्मृत्युत्पत्तौ संस्कारस्य कारणात् आत्मन्येव संस्कारस्य प्रतिपादनात्। “व्यवस्थातो नाना” सूत्रादिना व्यवस्थावचनात् संख्यासिद्धिरवगन्तव्या। (१)

“तथात्मेति वचनात्” आत्मनि परममहत्परिमाणम्। सन्निकर्षजन्यत्वात् सुखादीनां तद्विनाशकत्वात् विभागादीनामात्मनः गुणत्वं सुतरां संसिद्धमेवेति श्रेयान् पन्थाः।

अस्मादेव कारणात् भारतीयदर्शनस्य सर्वस्वापेक्षया नितरां वैशिष्ट्यमिदमेव वीक्षतीति। आत्मानमन्तरा सृष्टिप्रक्रिया गतिशून्यैवाऽऽभाति। आत्मतत्त्वमन्तरा शरीरेन्द्रियाणां जडस्वभावतया नैरर्थक्यमेव।

तथाचार्यपक्षः प्रमाणप्रतीतिभ्यां संवलितः। तथाच—

अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो, यदपानिति स अपानोऽथ यः प्राणापानयोः सन्धिः स व्यानः सा वाक् तस्मादप्राण~~न्नम~~न्ननपानन्वाचमभिव्याहरति” (२)

अत्र कन्दलीकारास्तु इत्थं व्याचक्षते यत्—

यस्य तत्त्वज्ञानं परमाभ्युदयाय सदा संयतते। तद्विपर्ययज्ञानं संसारबन्धनं प्रयच्छति। तदेवात्मतत्त्वं प्रतिपादयितुमारभते। आत्मत्वं नाम सामान्यं तेन सम्बन्धात् आत्मेत्युच्यते। सुखदुःखादिसमवायिकारणतावच्छेदकतयाऽऽत्मत्वजातिसिद्धिः।

यद्यपि आत्मतत्त्वस्याऽन्यात्मनि नितान्तमप्रत्यक्षतया स्वरूपतः स्वात्मनि मानसप्रत्यक्षविषयत्वस्य विद्यमानत्वं संघटत एव। तथापि सकलात्मसाधारणानुगतप्रत्यक्षस्य नितान्तमसम्भवग्रस्ततया जातिरूपस्य तदभावात्। अनेकसमवेतत्वघटितजातित्वग्रहेऽनेकव्यक्तिग्रहहेतुत्वस्य सर्वजनसिद्धत्वात् तदर्थमनुमानमेव शरणम्।

नन्वत्र सुखत्वावच्छिन्नं प्रति आत्मत्वेन कारणत्वे मानाभावः, कथं तु सुखदुःखद्वेषभावनाधर्माधर्मान् प्रति क्रम

(১) "ন্যায় কন্দলী" ~~প্রশা~~ "প্রশাস্তপাদ ভাষ্য"

(২) "মুক্তাবলী"

मनुष्यस्य ~~धर्माधर्मनिष्ठ~~ धर्माधर्मनिष्ठ साधनत्वज्ञानानुभवेन विहित निषिद्ध कर्मणः समवाय सम्बन्धेन निमित्तकारणत्वस्यावश्यकतयाऽतिप्रसंगाभावात् भावात्मककार्यस्य स्वसमवायिकारणत्व नियमस्य द्रव्यत्वेन समवायिकारणत्वमादाय तन्निर्वाहादिति चेन्न। कार्यमात्रवृत्ति जातेः कार्यतावच्छेदकत्व नियमात् तादृशकार्यकारणभावस्यावश्यकत्वात्।

नच तावतापि सुखत्वावच्छिन्नं प्रति द्रव्यत्वेन कारणत्वं मायताम्। अदृष्ट निमित्त कारण कल्पनया तद्विरहादिति वाच्यम्। व्याप्य लघुभूत धर्मे सति कारणतावच्छेदके व्यापकधर्मेण कारणत्व कल्पनायाः नितामन्याय्यत्वात्। वस्तुतस्तु चेतसि ज्ञानोत्पत्तिनिराशाय ज्ञानत्वावच्छिन्नं प्रति आत्मत्वेन हेतुत्वस्यावश्यकत्वात्।

नचेश्वरेऽऽत्मत्व जातेः विद्यमानतया कथं न सुखदुःखाद्युत्पत्तिः स्यादिति वाच्यम्। अदृष्टाभावात्। नच कारणतावच्छेदकाक्रान्तत्वस्य स्वरूप योग्यत्वस्य परमात्मनि सत्तया कथं नैव फलानि जायन्त इति वाच्यम्। यत्र यत्र स्वरूपयोग्यत्वं तत्र फलोपधायकत्व नियमस्याप्रयोजकत्वात्। जलपरमाणौ स्नेहानुत्पत्त्या तादृश नियमे मानाभावात्। (१)

नन्वत्रेश्वरेऽदृष्टं कुतो नोत्पद्यते इति चेन्न। मिथ्या ज्ञान कारणाभावात्। मिथ्याज्ञानस्याऽहेतुत्वे च मुक्तात्मनि सदोऽदृष्टोत्पत्तिप्रसंगात्। वेदस्यात्मपदादेः ज्ञानादिमति लक्षणापत्तेः। परे सा जातिर्नास्त्येवेश्वरे प्रमाणाभावात्। नच दशम द्रव्यत्वापत्तिः स्यादिति वाच्यम्। ज्ञानवत्त्वेन विभजनात्। (२)

नन्वत्र दृश्यसत्त्वस्य स्वाकार संवेदन क्षमत्वं तावदेव शोभते यावत् आत्मत्वनाम सामान्यस्य दृश्य सत्त्वं सम्पद्यते। प्रत्यक्षोपलब्धि योग्यमेव बाधकतया तदेव बाधकं विज्ञायते। तस्मादिन्द्रियाप्रत्यक्ष विषयस्यात्मनः शब्दाद्युपलब्धिनाऽवगन्तव्यस्तावदात्मा। यत्करणं सम्पद्यते तत् केनचित् कर्त्रा प्रयुज्यते। यथा वाद्यक्रिया वात्स्यः। तस्मात् चक्षुरादिकं केनाप्यवश्यमेव प्रयोक्तव्यम्। तत्प्रयोक्ता खल्वात्मैव। श्रोत्रान्तर्गताकाशस्य विभुत्वेन नहि साक्षात्सम्बन्धः श्रेयान्। तथापि श्रोत्रगताकाशस्यापि विभुत्वेन अन्तःकरणाधिष्ठान द्वारेण तत्प्रयोज्यत्वम्।

सन्दंशयोगिना हस्तेन तत्संयुक्तं तत्पिण्डमयसः तत्रापि तत्प्रयोज्यत्वम्। चक्षुरादीनां नियतार्थस्य नियत ग्राहकत्वात्।

यच्चात्माऽहं भोक्त्याकारक स्वकर्म प्रयोज्य कार्य कारण सम्बन्ध सम्पादितस्वामित्व रूपं मनसा वेद्यते तेनात्मनः प्रत्यक्षोपलब्धि योग्यत्वं नास्ति तथापि मानस प्रत्यक्ष विषयस्य निराबाध एव। रूपादिषु प्रसिद्धया अनुमीयते सदानुमापकेन हेतुना। शब्दरूपादिषु तत्तद विषयेषु ज्ञानभावइति प्रसिद्धिम्। तथापि ज्ञाता अनुमीयतएव। तथाच ज्ञानं क्वचिदाश्रितं क्रियात्वात् छिदि क्रियावत्। अतएव यत्राश्रितमिदं सएवात्मा।

((क्षणिक विज्ञानवादनिरासः))

अथेदं तावत् पृच्छ्यते यद् ज्ञानमिदं स्वयमेवावगच्छति विषयं वा पराश्रिततया। किमेतस्य नित्यत्वं मन्यते। अथवा प्रतिक्षणं विनाशि वा। यदि नित्यत्वमेवोच्यते तदा संज्ञाभेदस्यैव पार्थक्यात्। यदि प्रतिक्षणं क्षणिकमेव तर्हि प्रतिक्षणभेदात् चिरानुभूतस्य चिरप्रतीक्षित स्मरणमेव नैव सम्पद्येत। अनुभवस्मरणयोः विभिन्न कर्तृकात्।

~~[illegible]~~ यच्चित्त्वमेवाचक्षते यत् कार्यकारणभाव वैलक्षण्यात् पूर्वक्षणे समुद्भूतस्य स्वविनाशोत्तरक्षणे तद्विषयकस्मरणमेव भायात्। फलतः कारणीभूत ज्ञानमेव चिरानुभूत विषयं स्मरति। पुत्रस्य पित्रानुभूत स्मरणं नैव पुत्राय जायते। पुत्र विज्ञानं प्रति पितृविज्ञानस्याप्रयोजकत्वात्।

यच्चापि पितृशरीरं पुत्रशरीरं जनयति चेत् सत्यम्, तथापि तथाभूतस्याऽचेतनात्। तस्मात् क्षणिकत्वपक्षे नास्ति दोष इति वाच्यम्। आत्माभावे कार्यकारण भावस्याऽनिश्चयात्। तेन सर्वतोऽनुमातव्यश्च एवात्मा। अन्यथा विज्ञानोभय कार्यकारणभावस्य वक्तुमशक्यत्वात्। यतोहि यत् समये कारण विज्ञानं वर्तते किन्तु कार्य विज्ञानं तु भविष्यगर्भ कुक्षावेव प्रविशति। कार्य विज्ञानं क्षणे कारण विज्ञान नाशात्। नैव ताभ्यामन्यः कश्चिदेको द्रष्टास्तीति यस्तावत् क्रमभाविनं कार्यकारणभावं प्रतीयात्।

नच यथा विज्ञानं विषयमवगच्छति तथा स्वस्वरूपमपि तावदवगच्छेत्। कारण विज्ञानस्य कारणत्व स्वरूपतया स्वतोऽभिन्नमपि कारणत्वं वेवेत्ति कारणविज्ञानम्। अनेन प्रकारेणोत्तरकालेऽपि सम्पद्यमान कार्यविज्ञानमपि कार्यत्वज्ञानं वाञ्छति। ततोभय विज्ञानाभ्यां वासना विलक्षणवलभुवा विकल्पेनाध्यवसीयत इतिवाच्यम्। अहो कुसृष्टि कल्पनायाः प्रसादात्।

पूर्वोत्तर ज्ञाने स्वकालमात्र नियते कुतः तस्याः कारणमहमस्मी

(१) "प्रशस्तभाष्य किरणावली" उदयनाचार्य"

"किरणावली"

ति कार्यं प्रतीयेत। परस्परं वार्तानभिज्ञत्वात्। कथं तर्हि ताभ्यामगृहीतं कार्यकारणभावं निश्चेतुं शक्नुयात्। निश्चयस्यानुभवमूलकत्वात्।

भवतु नाम पराभिमतमेव ज्ञानम्। प्रतन्वासति पराभिमतं शरीरमिन्द्रियं मनो वा भविष्यति। ज्ञानं प्रति समवायिकारणत्वाभावात्। शरीरेन्द्रियमनसां चैतन्यं वक्तुमशक्यत्वात्। न तावच्छरीरे चैतन्यं कल्पयितुं शक्यम्। घटवच्छरीरस्य भूतकार्यत्वात्। भूतकार्यस्याऽचैतन्यात्। यथा घटः॥ शरीरस्य भौतिकतयाऽचेतनात्।

मृतशरीरे चैतन्याभावात् तस्याऽयावद्द्रव्यभावित्वं निव विवाक्षितमेव। नैव चैतन्यं शरीरस्य विशेषगुणम्, अयावद्द्रव्यभावित्वात्, संयोगवत्। अतएव नास्ति शरीरावयवेऽपि चैतन्यम्। तत्कारणान्यपि तद्वदचेतनानि प्रतिभान्ति। तस्मात् तत्राचैतन्ये कार्येऽप्यचैतन्यमेव। यदि च शरीरावयवे चैतन्यं तदैकस्मिन् शरीरे ज्ञातृबहुत्वञ्च स्वीकार्यमेव। येनैकाभिप्रायेण नियमितप्रवृत्तेरनुपपत्तेः।

एवमिन्द्रियाणामप्यचेतनत्वं नैव सम्भवति करणत्वात्। दण्डवत्। अतएव विनष्टेष्वपि तावदिन्द्रियेषु पूर्वानुभूतोऽर्थः सदा स्मर्यत एव। भावानुभवितरि सदा विनष्टे कथं स्मरणं नितरामुपयुक्तं स्यादिति। तस्मान्नेन्द्रियगुणो ज्ञानम्।(१)

यत्कालावच्छेदेन यद्विषयेण सहेन्द्रियाणां सम्बन्धो नैव समवलोक्यते तत्कालेऽपि तद्विषयो हि सदा तेन स्मर्यत एवातस्मान्नेन्द्रिये विषयानुभवक्षमता नैव लोचनगोचरायते। अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावात्। नैव वैयधिकरण्येनानुभवस्मरणयोः कार्यकारणभावः चक्षुषा दृष्टः। अनेनैव कारणेन विषयेऽपि चैतन्यं नोपयुज्यते। विनष्टेऽपि नैव स्मर्यते तद्विषयः। विषये चैतन्यबाधिकेयं युक्तिः सदा बलीयसी।

इन्द्रियेषु विषयेषु च सत्यपि चैतन्ये अहमिदं रूपाण्यद्राक्षमित्याकारकप्रतीत्या एवमेककर्तृकतया तदुत्पन्नस्यानुभवात्। न चेन्द्रियचैतन्ये विषयचैतन्ये च रूपमद्राक्षं रसमन्वभवं स्पर्शं स्पृशामि गन्धं जिघ्रामीति रूपादिप्रत्ययानामेकैकत्वप्रतिपत्तिसम्भवः। रूपादीनां चक्षुरादीनाञ्च भेदात्।(२)

पूर्वोक्तानुपपत्त्या एवमापत्त्या वा तदाश्रयत्वं मनसः कल्पतां नोक्तदोष इति वाच्यम्। मनो यदि चक्षुरादिविनिर्मुक्तं कारणान्तरमपेक्ष्य रूपादीन् वेवेत्ति तदा संज्ञाभेदमात्रस्यैव विवादग्रहात्। यदपेक्षणीयं मनः यच्च ज्ञानाधिकरणं तदेवात्मा। यदि नापेक्षते कारणान्तरं तदेन्द्रियेषु रूपादिषु आलोचनानि युगपत् प्रसज्यन्ते। कारणस्य

(१) "दिनकरी"

(२) "दिनकरी"

यौगपद्यात्। कारणान्तरमपेक्षते चेत्तदा तस्याणुत्वे सर्वेन्द्रियाणां सन्निधानाभावात् युगपदालोचनानुपपत्तिः। एवमन्यान्तःकरणविरहे युगपत् स्मरणप्रसङ्गात्। स्मृतौ बाह्यकरणानपेक्षणात्। अन्तःकरणमपेक्षते च तत्संयोगस्यैककालावच्छेदेन तत्सामर्थ्यात् क्रमेण स्मृतयः जायेरन्। तस्मादयुगपत् आलोचनस्मृति प्रसङ्गभिया नापि मनसः तत्त्वमित्युप युक्तमेव।

यद्यत्र मनसः कर्तृत्वं स्वीकुर्वते चेत्तथापि रूपादिज्ञानं यथा चक्षुः प्रवर्तयति तथा सुखादिज्ञानमपि प्रवर्तेत। कारणमन्तरा नैव कार्यं समुत्पद्येत। तथासति संज्ञाभेदमात्रतया कर्तुः कारणयोऽपि तत्सिद्धत्वात्।(१)

मनः इतोऽप्यचेतनं मूर्तत्वाल्लोष्ठवत्। अनेन मूर्तत्वहेतुना मनसां चेतनत्वं प्रतिषिद्धम्। शरीरेन्द्रियमनसां नैव ज्ञानं गुणः सिद्ध्यति। एतावताऽऽत्मनः सिद्धौ किमायातम्। ज्ञानं तावत् कार्यमतः तस्य किमपि कारणं भवेत्। तस्माच्छरीरेन्द्रियाणि मनांसि वा नैव समवायसम्बन्धेन कारणानि विद्यन्ते। एवमन्येषु वक्ष्यमाणन्यायेन ज्ञानकारणत्वं प्रति शक्तिर्नास्तीत्यतो परिशेषादात्मकार्यं ज्ञानं सिद्ध्यति। आत्मकार्यत्वात् तेन ज्ञानेनात्मा समधिगम्यत इति।

यत्त्वत्र बौद्धाः नितरामाचक्षन्ते यत् समस्तस्य संसारस्य प्रतिवस्तु क्षणिकत्वेनाश्रयाश्रयिभावाभावात् सर्वमेतदसम्बद्धमेव। बौद्धानामयमाशयोऽस्ति खलु समस्तेषु बीजेषु अङ्कुरजननयोग्यत्वमस्ति नवेति? अस्ति चेत्तदा सर्वदा कुशूलस्थमपि बीजं कथं नाङ्कुरं जनयेत्। परन्तु तन्न भवति। यथा प्रतिपाद्यते च।

नाङ्कुरजननयोग्यत्वं बीजे विद्यते चेत्तदा कथं तर्हि वपितक्षेत्रस्थं बीजं सर्वदाऽङ्कुरं जनयति। अस्मादेव कारणात् अङ्कुराव्यवजायमानपूर्वक्षणे बीजे विलक्षणधर्म एव समुत्पद्यते। तदेव कुर्वद्रूपत्वम्। अनेनैव रूपेण कार्यकारणभावो वाच्यः। अङ्कुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेनैव कारणत्वम् न तु बीजत्वेन। कुर्वद्रूपत्वं चाङ्कुरजनकतावच्छेदकतया सिद्धो जातिविशेषः। स च फलोपधायैक क्षणिकसमर्थबीजमात्रवृत्ति बीजत्वव्याप्यः। तेन कुशूलस्थबीजे धरणिसलिल ~~संयोगादि~~ संयोगादिरूपकारणाभावात् नाङ्कुरं जनयति। तेन कुशूलस्थबीजे कुर्वद्रूपाभावान्नाङ्कुरोदयः।(२)

एतावता कुशूलस्थबीजं क्षेत्रस्थबीजात् भिन्नमिति विज्ञायते। अतो हि क्षणिकत्वपक्षं स्वीकुर्वन्ति बौद्धाः

"आत्मतत्त्व विवेक" क्षणभंग "प्रक्रिया"

"न्यायकन्दली" "क्षणभंगवाद"

कस्यापि वस्तुनः क्षणिकत्वं नाङ्गीकृत्य नहि तत्रार्थक्रियाकारित्वं संघटते। अतएव सत्त्वमर्थक्रियाकारित्वमेव। तस्मात् यत् सत् तत् क्षणिकम्। सर्वाणि वस्तूनि सत्त्वेन क्षणिकान्येव।

यदि ज्ञानं प्रति समवायिकारणमात्मा विद्यते चेत्तदा तस्यापि क्षणिकत्वं विद्यत एव। आत्मनि यदा क्षणिकत्वं तदा नहि कस्याश्रयतां भजेत। तस्मात् आत्मसाधनप्रकारो हि नैव साधीयनिति बौद्धानामाक्षेपः।

अर्थक्रियाकारित्वमेव तावत् सत्त्वम्। तत् अर्थक्रियाकारित्वं क्रमयौगपद्याभ्यां व्याप्तम्। विभिन्नार्थक्रियाकारित्वस्य युगपत् तदुत्पत्तिरेव क्रमः। एवं युगपत् कार्याणामुत्पत्तिरेव तावत् अक्रमः। प्रस्तुतपक्षं परित्यज्य नान्यः कश्चन प्रकारोऽस्ति। परस्परविरुद्धयोरेकप्रतिषेधमन्तरा नान्यस्य विधानं क्वाप्यवलोकयामः।(१)

यद्यत्र वस्तुनः क्षणिकत्वं नाङ्गीकुर्वन्ति तदा नायं क्रमः कार्याणां संगच्छते। यत्र यज्जननयोग्यत्वं दृश्यते तत्कदाप्यवश्यमेव क्षीपते। एवं यज्जननयोग्यत्वं नैव दृश्यते नहि तत् किमपि कर्तुं शक्यते। तस्मात् सहकारिकारणसाहाय्येनैव कार्यं सम्पद्येत। एतावताऽयमभिप्रायः विद्यते यदङ्कुरादिजननयोग्यता बीजे सन्निहिताऽऽस्ते परन्तु सलिलमृत्तिका प्रभृति सहकारिकारणानि तत्र नितरामपेक्षन्ते।

अत्र क्षणिकविज्ञानवादिनः तावदित्थं व्याहरन्ति यत् यदि सहकारिणो भावातिशयं न जनयन्ति चेत्तदा नापेक्षणीयास्ते। अकिञ्चित्करत्वात्। जनयन्ति चेत् तावद् सः व्यतिरिक्तः किं वाऽतिरिक्तः। व्यतिरिक्तत्वं स्वीकुरुते चेत्तदा अन्वयव्यतिरेकाभ्यां कार्योत्पत्तेः प्राक् अक्षणिकस्याऽकिञ्चित्करत्वात्। सत्यपि तदभावात्। सहकारिकृतविलक्षणशक्तिसम्पन्नबीजस्य जनकत्वमुच्यते चेत्तदाऽतिशय ~~स्यातिशि~~ स्यातिशयान्तराधाने किं तावत् साहाय्यम्। यदि चेत् अतिशयान्तरमाधत्ते तर्हि अनवस्थापत्तेः।

यद्यपि सहकारिजन्योऽतिशयः नितरां जायत एव तथापि नैव सः क्षणिकस्य। किन्त्वक्षणिकस्य च। अतएव सहकारिजन्योऽतिशयः नितरामवश्यमेव समुत्पद्यते। एवं च स्वाश्रयीभूतमुख्यकारणादभिन्नत्वमस्ति। कथं तु अनुपकार्यानुपकारकयोः सम्बन्धाभावात्। पूर्वोत्पन्नभावस्य पुनरुत्पत्त्यभावात्। अनतिशयस्वरूपोऽभावः निवर्तते, ~~अन्यथा~~ अन्यथातिस्वरूपः समुत्पद्यते चेत्तथाऽसति क्षणिकविज्ञानवादिनः क्षणिकत्वं संसिध्यत्येव।(२)

नन्वत्र वस्तुनः क्षणिकत्वेऽपि सहकारिभिः किं क्रियते ? नैव-

किञ्चित्तदा किमर्थं तेऽपेक्ष्यन्ते। अन्यच्च को ब्रूते वै ते नितान्तमपेक्ष्यन्ते। कार्योत्पत्त्यव्यवहितपूर्वक्षणे वर्तमानं कारणं अङ्कुरादिकार्याय क्षमते। कारनि न परस्परापेक्षा वेति। यत्तदानीं सहकारिकारणानि सम्भूय कार्यं कर्तुं क्षमन्ते। किन्तु तदानीं नियमिततया ता सामग्र्यः विद्यन्ते अतएव तदानीं समस्तानि कारणानि तत्र सम्मिलन्ति। वस्तूनां स्वभावादेव तेषामुपसर्पणं हेतुनियमः। एवं यत् सत् तत् क्षणिकम्" इति व्याप्त्या च जगतः क्षणिकत्वं सिद्धम्। क्षणिकत्वनियमानुरोधेन चाङ्कुरकार्यं प्रति तद्रूपेण हेतुत्वस्यावश्यकत्वम्। कुशूलस्थबीजादङ्कुरोत्पत्तिनिराकरणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गुरुत्वेन पूर्वोक्ता व्याप्ति स्वीकार्या। तादृशव्याप्तिस्वीकारे कुर्वद्रूपत्वेन हेतुत्वकल्पनस्यावश्यकतया कुशूलस्थबीजे कुर्वद्रूपाभावात् नाङ्कुरोत्पत्तिः। तस्मात् सहकारित्वस्य कारणत्वाकल्पनेन लघुत्वम्।

न च क्षणिकत्वपक्षेऽपि धरणिसलिलसंयोगस्य बीजादेर्वा कुर्वद्रूपत्वेन हेतुत्वं वक्तव्यम्। किन्त्वत्र विनिगमकाभावात्। अतः समस्तस्य सहकारिकारणस्य कारणत्वकल्पनमावश्यकमिति वाच्यम्। अङ्कुरत्वावच्छिन्नं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिकारणस्य कुर्वद्रूपत्वेनैव हेतुत्वात्। कुर्वद्रूपत्वाऽनङ्गीकारे बीजत्वधरणिसलिलसंयोगत्वादीनां नाना हेतुत्वकल्पने गुरुत्वात्।

तदसत्। एतादृशगुरुत्वापेक्षया क्षणिकानन्तपदार्थकल्पनेऽतिगुरुत्वापातात्। किञ्च जगतः क्षणिकत्वे पूर्वकालीनघटाभेदस्य एतद्कालीनघटे विरहेण स एवायं घट इति प्रत्यभिज्ञानुपपत्तेः। एवं जगतः क्षणिकत्वे नाशत्वावच्छिन्नं प्रति सत्त्वेन हेतुत्वं लाघवमित्यपि वक्तुमशक्यम्। तज्जातीयभेद एव तादृशप्रतीतेर्विषयत्वेन जातेरपि क्षणिकत्वेन ~~पूर्वघटकालीन~~ पूर्वकालीनघटवृत्तिघटत्वस्यैतत्कालीनघटे विरहात्।

एवं स्थिरपदार्थस्वीकारे एकस्मिन् पदार्थे विरुद्धसाम ~~र्थ्यासामर्थ्यतया~~ र्थ्यासामर्थ्यतया तद्भेदोऽपि वक्तुं तवदशक्यम्। एककालावच्छेदेनैव एकस्मिन्नेव पदार्थे सामर्थ्यासामर्थ्ययोः विरुद्धतया कालभेदेनापि तत्स्वीकारे बाधकाभावात्। एवञ्च घटत्वं न घटः इत्याकारकप्रतीतीनामप्रामाण्यापत्त्या धर्मधर्मिणोर्भेदस्य प्रतिपादयितुमशक्यत्वात्।

मान्यास्तु इत्थं प्रतिपादयन्ति यत् कारणसामग्रीसहितादेव बीजात् अङ्कुरोत्पत्तिस्वीकारेण क्रमयौगपद्यानुपयोगस्योपयोगतया यत् सत् तत्क्षणिकमित्यस्याऽसारत्वमेव। यदि तावत् त-

(ब) "आत्मतत्त्व विवेक" "क्षणभंगवाद"

न च कापि सामग्री कमपि विशेषं नादधाति इति वाच्यम्। तत्सामग्र्या स्वसमवहितत्व रूप विशेष सम्पादनेनैव तत्सम्भवात्। तस्मात् अङ्कुरणे धरणि सलिले नितान्तमवश्यमेव वीजमपेक्षते। ~~अत~~ अतएव कृषीवलो ऽ~~ङ्कुरार्थी~~ ~~ङ्कुरो~~ ऽङ्कुरकामो वीजवापाय प्रवर्तते। अन्यथा कुर्वद्रूपत्वे नैव कारणत्वे कदाचिद्धरणि सलिल संयोगमन्तरेणापि वीजमङ्कुरं जनयेत्।

वीजस्याङ्कुरे नितान्तकारणतया कृषीवलानामपि वीजादौ प्रवृत्तिविरोधापत्तेः। यदि तत्र तादृश क्षणोत्पादनाय तत्र प्रवृत्तेरिति चेन्न। तादृश क्षणोत्पादकस्यापि क्षणत्वेन वीजादेस्तत्र कारणत्वाभावात्। ~~तादृश-क्षणोत्पादकस्यापि~~ तत्र क्षणान्तरमनुसरति चेत् अनवस्थापातात्।(१)

वस्तुतस्तु तदेवं व्यापकयोः क्रमयौगपद्ययोः क्षणिकस्थिरवस्तुनि उपलम्भाभावेन सत्त्वव्यापक क्रमकारित्व युगपत्कारित्वे नैव सन्तिष्ठते। अतएवाऽक्षणिकत्वस्य कस्यापि स्थिर~~भावस्य~~ वस्तुनः नैव सत्तालोचन गोचरतां गच्छति। फलतः क्षणिकवस्तुनि सत्त्वं नियमितमेव। तथासति सुलभमेवानुमानं क्षणिकत्वस्य।

एवं यत् सत् तत् क्षणिकम्॥ सन्ति च द्वादशायतनानि। किन्तु तेनानुमानेन सत्त्वादिहेतुना क्षणिकत्वसिद्धिः सम्भवति। पक्षव्यावृत्त्यवगमात्। यत्र नैव क्रमशः कार्योत्पादन क्षमत्वं न च क्रमकारित्वमपि तत्र संगच्छते। यथा वाजि विषाणम्। तस्मादक्षणिकत्वं क्रमयौगपद्यरहितम्। अतएव क्रमयौगपद्य व्यावृत्त्या सत्त्वव्यति~~रे~~रेक प्रतीतिः।

प्रतीयमाने जले वह्निधूमाभावयोः प्रतीतिः सार्वजनीना तद्वत् अक्षणिके दृश्यमाने क्रमयौगपद्याभावात् सत्त्वाभावः प्रत्येतव्यः। नाप्यस्ति क्षणिको नाम कोऽपि भवताम्। यथाऽप्रतीयमानेऽपि पिशाचे तस्मादन्य व्यावृत्तिः प्रतीयते। स्तम्भः पिशाचो भवतीति वदताऽपि विपक्ष व्यावृत्तेः प्रतीतिः स्यादिति वाच्यम्। सत्यमेतत् क्षणिकविज्ञानवादिनः। परन्तु तदपि न शोभते तेषामिति। व्यावृत्तेः वृत्तित्वाभावं निश्चेतुमनुपलब्धेरेव प्रमाणयोग्यत्वात्। अनुपलब्धिस्तु केवलं नोपलब्ध्यभावः किन्तु प्रतीयमानाभावप्रतियोगिनः भेदोपलब्धिः।

अतः विपक्ष व्यावृत्तौ नितान्तमपेक्षितः साध्याभावप्रतियोगिरूपात्मक साध्योपलब्धिमन्तरा नितान्तमसम्भव एव।

न च तथासति स्तम्भः पिशाचो न भवति प्रतीतिः कथं स्यादिति वाच्यम्। आधाराधेयभाव नियामक पिशाच सम्बन्धाभाव प्रतीतेः प्रतिषेधात्। किन्तु तस्य तादात्म्य प्रतिषेध प्रतीतेः। स च स्तम्भतया

॥कन्दली कार:॥ प्रशस्तपादभाष्य श्रीधराह॥

-

(२) ॥आत्मतत्त्व विवेक॥

तया प्रसञ्जित पिशाचस्य दृश्यत्वाभ्युनुज्ञानात्। तादात्म्येन यावान् निषेधः स सर्व उपलब्धि लक्षण प्राप्तत्वाभ्युपगमेन क्रियते।(१)

यच्चात्रोच्यते क्षणिक विज्ञान वादिना यत्प्रतीयमान नीलादि पदार्थ व्यतिरिक्तः क्षणिकोऽक्षणिकोऽपि कश्चन पदार्थः नैवास्ति किन्तु प्राक्तन बुद्धि वेद्य नीलादिक्षणे साम्प्रतिक बुद्धिवेद्य क्षणस्याऽभेद भ्रमो जायते तदनन्तरमेव नीलाद्यारोप्यमाणः नित्यमक्षणिकः। यदा ते भेदेन ज्ञायन्ते तदा नीलादयः क्षणिकत्वेनोच्यन्ते। तत्र नीलादिष्वेव क्रमाक्रम व्याप्त्या सत्त्वाभाव प्रतीतिः। एकस्मिन् वस्तुनि कारकत्वाकारकत्वयोः विरुद्धधर्मयोः समावेशाऽसम्भवात्।

तदपि च नैव साधीयः यत् समस्तान्यपि कार्याणि प्रागेव कुर्यात् तदा सम्प्रत्यर्थ क्रियारहितत्वस्यावर्तमानत्व प्रसङ्गात्। तत्रापि भवत् प्रदर्शित विपक्षस्य (स्थिरत्वेन व्यवहृत नीलादेः) सत्त्वं वास्तवं काल्पनिकं वेति। नास्ति तत्र स्थिरत्वेन व्यवहृत नीलादेः सत्त्वं वास्तविकम्। कल्पन्तु नीलाद्य क्षणिकत्वस्याऽवास्तवात्। तस्मादनुमानेन वास्तवं वस्तुसिद्धिं वाञ्छता ~~भावत~~ भवता पक्षसत्त्व सपक्षसत्त्व एवं विपक्षासत्त्व त्रैरूप्य विनिश्चयार्थं धूमानुमानवत् पक्षसपक्ष विपक्षभावो सर्वत्र प्रमाणसिद्धः दर्शयितव्यः। नहि कल्पना मात्रेण भवन्मनोरथः साफल्यं प्राप्नुयात्। किन्तु क्षणिक विज्ञानवादिनः स्वाभिलषित विचारवाक्येन नचाक्षणिक वस्तुनः वास्तविकी सत्ता लोचन पथे समागच्छति। तेन व्यतिरेक व्याप्तिरपि नैव सिद्ध्येत्। कथं तु विपक्षासिद्धेः। एवं क्रमेण व्यतिरेकव्याप्त्यसिद्धौ अन्वय व्याप्तिरप्यसिद्धिः। तस्मात् क्षणिकत्व सम्पादन तत्परस्य सत्त्व हेतोः केवलं पक्ष एव विद्यमानतया सत्त्वस्याऽसाधारण हेत्वाभासेन ग्रस्तत्वात्।

एवञ्च कार्यकारण भावस्यानुपपत्ति स्वरूप बाधमूलको क्षणिकत्व हेतुना विपक्षे असत्वात्मक साध्याभावं स्वयमेव निचैषीत्।

क्षणिकत्व सत्त्वयोः सामानाधिकरण्य रूपान्वय व्याप्तिः केन हेतुना कुतो वा सिद्ध्येत्। केवलं विपक्षव्यावृत्तिमात्रेणैव हेतुः साध्यं साधयितुमक्षमत्वात्। कथं तु असाधारण हेत्वाभासेनाऽपि यथार्थानुमितेरापद्येत। केवलव्यतिरेक्यनुमानस्य स्वयमेव दूषितत्वात्।(२)

“आत्मतत्व विवेक”

नच स्थिरपदार्थेषु सञ्जाते ऽसत्त्व संसिद्धौ स्वयमेवान्वय व्याप्तिः संसिद्ध्यति। तेन सत्त्वं क्षणिकवस्तुनि विद्यत एवेति वक्तुं युक्तमिति वाच्यम्। इति पदेन सत्त्व हेतोः परामर्शात्। किन्तु असिद्धान्वयतया तस्य हेतुत्वाभावात्।

नच तत्रापि कल्पित कार्यकारण भावात्मक दोषस्य व्यापारद्वयं प्रकल्प्य एकेन हेतुना ऽक्षणिके पदार्थे नितामसत्त्वं संसिद्ध्येत्। एवं तदपरहेतुना क्षणिके सत्त्वं सिद्ध्येत्। आहोस्वित् तदेव बाधकं एवमन्वय साधकं ~~क्रमा~~ प्रमाणान्तरेण व्याप्तिं प्रसाध्य द्वादशायतनेषु सत्त्वं प्रसाधयेत्। नहि विषयमन्तरा व्याप्तेः प्रतीतिर्युक्ता। द्वादशायतनात् भिन्ना काचन वस्तुनः सत्ता नैव तर्कसम्मता। तत्रान्वय प्रतीत्या क्षणिकत्वं प्रतीयेत। यतोहि यत्र सम्बन्धस्य प्रतीतिर्जायते तत्र सम्बन्धिनः प्रतीतिर्नितरां निश्चिता। अतः प्रत्यक्ष पक्षे सत्त्वसिद्धिः नावश्यकी। किन्तु व्याप्तिः सामान्यतया ग्राह्या। एवं सामान्य व्याप्त्या तत्तद् व्यक्तिषु सत्त्वं सेत्स्यतीति वाच्यम्।

निर्विशेषस्य सामान्यस्य प्रतीत्यभावात्।

एवं विशेष व्यक्तिषु क्षणिकत्वसत्त्व सामान्ययोः प्रतीयमानयोः नीलादिगतं क्षणिकत्वं प्रतीतमेव। तेन तस्मै सत्त्वस्य वैयर्थ्यात्। तस्मात् सत्त्व हेतोः निष्प्रयोजनत्वमेव।

नच कार्यकारण भावानुपपत्ति रूप बाधकेन क्षणिकत्व व्यावृत्य सत्त्व व्यावृत्त्योः ज्ञानं सम्पद्येत। एवं सत्त्वेन भावात्मक क्षणिकत्वमपि प्रतीयेत इति वाच्यम्। व्यावर्त्य भेदेन कल्पित भेद व्यावृत्त्योस्तादात्म्य भावात्।

अर्थात् व्यावृत्यभाव प्रतीति प्रयोजक भेदेन सत्त्व व्यावृ~~त्ति~~ त्य क्षणिकत्व व्यावृत्त्योः भेदस्य कल्पनापातात्। किन्तु हेतु साध्य तादात्म्यस्यानुमानाङ्गत्वेन भवता स्वीकारात्।

नच तदात्मकत्वेनाध्यवसित योरपि व्यावृत्त्योस्तादात्म्यमिति वाच्यम्। वस्तुनोस्तादात्म्यस्यान्यतोऽप्रसिद्धेः। तदप्रसिद्धौ वा बाधकस्यापि वैयर्थ्यात्। यदपि धर्मोत्तरेण वचनमिदमभाणि यत् बाधक बलात् घटे व्याप्तिं प्रसाध्य शब्दे सत्त्वादि हेतुना क्षणिकत्वं सेत्स्यतीति सत्यम्। अनेनैव प्रकारेण विषयभेदात् बाधक सत्त्वयोः सार्थकत्वं स्पष्टमेव। परन्तु तदपि न शोभते धर्मोत्तराणाम्। घटे नूनं तद् बाधक बलात् क्षणिकत्वं सेत्स्यति, परन्तु तस्मै सत्त्व हेतो वैयर्थ्यमेव सुतराम्। (व)

(१) तदव्यवहितानन्तरमेव कार्यमुत्पद्यते किन्तु-

वस्तुतस्तु सर्वेषां वस्तूनां क्षणिकत्वाभावतया तस्यार्थक्रियाकारित्वं सम्पादनं दुष्करमेव। यतो हि वस्तूनां स्वभाव एव विद्यते यत् सहकारि साहाय्यमासाद्य कार्यं सम्पादयति। नहि तस्य नैरपेक्ष्यमाकल्प्य प्रवर्तति। तस्मात् वयं कथयितुं शक्नुमः यदन्वयव्यतिरेकाभ्यां कार्योत्पादनक्षमत्वमिति नितरामवाच्छेत्।

सहकारिकारणैः तद्विशिष्टवीजादिप्रधानकारणञ्च कार्यमुत्पादयितुं क्षमते। विभिन्नकारणसमुत्पन्नतया नहि केवलमेकं कारणं कार्यं जनयेत्।

नच पुनस्तत्रापि सहकारिकारणोत्पन्नविलक्षणशक्त्या समुत्पद्यत एव किं प्रयोजनं वीजादिमुख्यकारणस्येति वाच्यम्। कार्ये वीजादिमुख्यकारणानुवृत्तेः। यदि वीजं माङ्कुरं जनयेत्तदा धरणि सलिल सहकारिकारणे सत्यपि सन्निधौ यववीजात् नहि धान्याङ्कुरोत्पत्तेः। यवधान्याङ्कुरयोः तद्वीजस्याज्ञापकत्वात्।

तदपि न शोभते तेषाम्। वीजादिमूलकारणे सहकारिकारणतः कोऽप्यतिशयः शक्तिविशेषः समुत्पद्यते किम्? उत्पद्यते चेत् तदपि सहकारिकारणमेव। पुनः तस्यातिशयः सहकारिसाहित्यम्। तदभाव एवाऽनतिशयः। ~~नच यदानीं~~ नच यदानीं मूलकारणस्य सहकारिणः साहित्यं जायते तदानीं मूलकारणस्य सहकारिणः साहित्यं नैव जायते परन्तु तदव्यवहिताग्रिमक्षणे नैव सम्पद्यते कार्यम्। आभ्यां खलु अन्वयव्यतिरेकाभ्यां साहित्यक्षणानामेव तज्जनकक्षणत्वम् तदभिन्ने तितौ ~~तज्जनकाक्षण~~ तज्जनकाभावक्षणत्वमिति वाच्यम्।

अनेककालसम्बन्धग्राहकोक्त प्रत्यक्षस्यैकस्मिन् वीजे प्रमाणरूपात्। क्षणिकत्वभ्रान्तिर्या तद्गतान्योन्याश्रयस्य प्रत्यक्षसिद्धत्वात्।

यदपि च क्षणिकविज्ञानवादिनोच्यते यत् कृतका ~~यीणि~~ यानि नितरामवश्यमेव विनाशतामुपयान्ति। अतः अवश्यम्भाविना विनाशेन क्षणिकत्वमनुमातुं शक्यत एव। यस्य वस्तुनः ध्रुवभावित्वं विद्यते तत्र नहि किमपि कारणान्तरमपेक्षते। यथा शङ्कुपाषाणादीनां लोहमयत्वम्। कृतकानां विनाशस्य ध्रुवभावित्वम्। अनुमानमिदं विनाशस्य हेत्वन्तराधीनत्वं

(ब) "गौतम सूत्र" "क्षण प्रक्रिया"

प्रतिक्षिपति।

ये च हेत्वन्तरसापेक्षत्वमवलम्बन्ते नास्ति ते ध्रुवभाविनः। यथा वाससि रागादयः तथाभावादयोऽपि स्वविनाशं प्रति हेत्वन्तरमपेक्षन्ते तदा हेत्वन्तरस्य प्रतिबन्धकवैकल्ययोरपि सम्भवे कृतकमपि वस्तु विनाशं न यायात्। अतएव स्वेनैव हेतुना तदुत्पत्त्यनन्तरं विनश्यतीति क्षणिकत्वं सिध्यति वस्तुनः।

परन्तु नेदं वचः शोभते क्षणिकविज्ञानवादिनः। कथन्तु समुत्पन्नभावस्य विभिन्नक्षणावधिकत्वेन तावत् क्षणिकत्वस्यैव व्याघातात्। अनेकक्षणिकावधिकत्वाच्च।(१)

एकक्षणिकावस्थायित्वं स्वीकुरुत इत्यपि वक्तुमशक्यमेव। क्षणान्तरे स्थित्यभावतया कालभेदात् भावाभावयोः नैक्यात्।

यदि भङ्गिभावः स्वभावादभिन्नेति प्रतिपादयामः किन्तु द्वितीयक्षण एव पूर्वक्षणस्याभाव इति ब्रूमः। तदपि निःसारमेव। पूर्वापरक्षणयोर्व्यक्तिभेदेन स्वरूपविरोधात्। यथा घटः भिन्नसन्ततिवर्तिना घटान्तरेण सह सन्तिष्ठते तथावत् क्षणसमूहोऽपि तदपरक्षणेन सह सन्तिष्ठत एव बाधकाभावात्।

द्वितीयक्षणज्ञापकप्रमाणस्य तत्रैव चारितार्थ्यात्। अतएवाभावस्तु भावप्रतिषेध एव। अतएव घटो नास्तीति प्रतीत्यैवाभावस्य नियामकात्। तस्मात् अभावस्योत्पत्तिरपि भावनिवृत्तिनियामिका। एवं तावदभावस्योपलब्धिरेव भावानुपलब्धिः। भावाभावयोः परस्परविरुद्धत्वात्। एवञ्च नैव भावस्य क्षणिकत्वम्। भाविनः पश्चात् हेत्वन्तरसमुत्पन्नाभावस्याऽनियमात्। भावोत्पत्त्यव्यवहित क्षणे तदुत्पन्नस्यैव दर्शनाच्च।

एवञ्च क्षणभङ्गसाधनं कालात्ययापदिष्टेन समाच्छन्नमेव। तस्मात् क्षणभङ्गसाधनस्य हेत्वाभासदोषसमाहिततया बौद्धानां क्षणिकप्रक्रिया नितरां क्षीणोति। एकस्मिन् क्षणे भावः समुत्पद्यते तदनन्तरं तदपरक्षणे विनश्यति तेन क्षणिकविज्ञानवादसिद्धान्तः सर्वदा दोषग्रस्तः तस्मात् प्रतिक्षणं क्षणवादः क्षीणतामाकलयति।

योऽहं घटमद्राक्षं तमेव समवलोकयामि" इति प्रत्यभिज्ञा प्रत्यक्षेण तद्प्रतीतस्य पुनः प्रतीतेश्च।

नन्वन्न कारणस्यानुपपत्त्या प्रत्यभिज्ञायाः प्रत्ययः स्वविषये

(व) न्याय कन्दली (प्रशस्तपादभाष्य)

यदे पूर्वकालवर्तित्वमुत्तरकालवर्तित्वमपि नैव प्रतिपादयितुं शक्नोति। तस्मात् कारणाभावात् नह्येतदेकं विज्ञानं सम्भवति। इन्द्रियं सन्निहितविषयमेवावगाहते न तु पूर्वकालत्वम्। एवं संस्कारोऽपि पूर्वानुभवजन्यो तेन प्रत्यमानुभवविषयान् संस्मरति। न तूत्तरकालिकविषयम्। तस्मात् प्रत्यक्षत्वपरोक्षत्वयोः विरुद्धतया नैकस्मिन् काले एकस्मिन् वस्तुनि परस्परविरुद्धत्वासम्भवादिति चेन्न। पूर्वापरकालावच्छिन्नैकस्य वस्तुतत्त्वस्य प्रतीतेः। एकस्यैव वस्तुनः प्रत्यभिज्ञाऽविषयत्वप्रतिपादनस्य विरुद्धत्वात्। अतएव प्रत्यभिज्ञाप्रतीत्या तं कल्पयितुं शक्नोतीति तस्योभयविषयकत्वात्। दृष्टकार्यं विलोक्य कल्पयन्ति तावत् विद्वांसः सुतरामदृष्टकारणम्। तेन कारणाऽप्रतीत्याऽनुभूतकार्याणि नापलपितुं शक्नुवन्ति केऽपि। अन्यथा जगद्वैचित्र्यस्याऽऽकस्मिकत्वमापद्येत। (१)

यद्यपि इन्द्रियसंस्कारौ प्रत्येकं प्रत्यभिज्ञां सम्पादयितुमसमर्थौ विद्येते तथापि संहतौ तौ प्रत्यभिज्ञां कर्तुं कथं शक्नुतः। तेनोभयकारणसामर्थ्यात् पूर्वोत्तरकालविषयत्वमक्षतमेवेति प्रत्यभिज्ञायाः। यथा पृथिवीजलवीजेषु नहि तावत् प्रत्येकमङ्कुरमुत्पादयितुं क्षमते किन्तु सम्भूयाऽङ्कुरम् जनयति। तथात्रापि सम्भवति। परन्तु प्रत्यभिज्ञायाः तावदिन्द्रियजन्यतया प्राप्तसन्निहितप्रत्यक्षत्वसंस्कारोत्पन्नासन्निहितपरोक्षत्वयोः परस्परविरुद्धतया कथमुभयोः समावेशः संगच्छते। सत्यमेतत्। परन्तु सामग्र्याः वैलक्षण्येन कार्यस्य वैलक्षण्यमित्यनुभवगम्यस्य प्रतीतेः। तस्मात् प्रत्यक्षापरोक्षे नैव सन्निहितासन्निहितविषयलक्षणे विरोत्स्येते। तेन प्रत्यभिज्ञायां पूर्वोत्तरकालवर्तित्वस्य विरुद्धत्वेनापि नैव बाधावसरः।

योऽप्यति प्रौढनाम्ना क्षणभङ्गप्रत्यक्षसिद्धं ब्रूते तं प्रति तस्यानुभवाभाव एवोत्तरं प्रमाणतामित्यवगन्तव्यम्। यतो हि ~~नील~~ नीलमेतदिति प्रतिपत्तिर्यथार्थानुभवेन दृष्टा न तथा क्षणिकमिति प्रतीतिरित्यनुभूयते केनापि।

नच नैव नीलत्वं क्षणिकत्वात् भिन्नम्। नैव क्षणिकत्वस्य कार्यत्वं विद्यते। अतः नीलत्वं गृहीतं चेत्तदा क्षणिकत्वमपि गृहीतमेव। तथा नीलमितिवत् कुतो क्षणिकमित्यध्यवसाय इति वक्तुमशक्यमेव। नीलक्षणक्षणिकत्वप्रतिभासकक्षणयोः नितरां सादृश्यादिति वाच्यम्।

(ब) "आत्मतत्व विवेक"

अहो प्रज्ञाप्रकर्षस्यैव बहुलात्। ~~[illegible]~~ न बुध्यते इत्यपि बुद्धिसाध्यमित्यस्यैव प्रतिपादनात्। तस्मात् मृगतृष्णिकेतिवत् भवत्पक्षस्य प्रतिपादनतया तदभिधानात्। प्रत्यक्षबलोत्पन्नादध्यवसायादन्यस्य प्रत्यक्षदृष्टत्वव्यवस्थानिबन्धनस्य ~~[illegible]~~ नभ्युपगमात्। नीलपीतयोरिव तयोस्तादात्म्याभिधानस्य प्रलापात्।

किञ्च सर्वभावानां क्षणिकत्वाभ्युपगमे किमर्थं कस्य वा संसार इति चेत् ज्ञानस्येत्यपि वक्तुमशक्यमेव। सन्तानिव्यतिरिक्तस्य सन्तानस्याभावात्। नचैकस्य वस्तुनः तदात्मकस्यात्मनः अनेकशरीरादियोग एव संसारः किंवा ज्ञानसन्तानाविच्छेद एव संसारः? स च वस्तूनां क्षणिकत्वेऽपि नानुपपन्न इति वाच्यम्। गर्भादिज्ञानस्य प्राग्भवीयज्ञानकृतत्वे मानाभावात्। एवमपि विजातीयादप्यग्नेर्धूमस्योत्पत्तिसम्भवतया नहि समानजातीयादेवार्थोत्पत्तिः। (१)

नच यस्य यस्मिन् अन्वयव्यतिरेकौस्तः, एवं यस्यातिशयश्चानुविधत्ते तत्तदेव समानजातीयमुपादानम्। अतः गर्भादिज्ञानमपि प्राक् स्वसजातीयज्ञानोत्पन्नमेव। नहि पृथिव्यादिभूतेषु बोधात्मकातिशयं विधत्ते। तस्मात् यस्यातिशयः तदेव समानजातीयमुपादानकारणमित्यनेन सिद्ध्यति यत् गर्भज्ञानमपि प्राग्भवीयगर्भज्ञानोत्पन्नतया कारणव्यभिचारो कार्यस्याऽऽकस्मिकत्वप्रसङ्गः स्यादिति वाच्यम्। अदहनस्वभावेभ्यो दारुनिर्मथनादिभ्यो वह्नेः दाहोपत्तेः जायमानतया तद्वत् इन्द्रियादिषु बोधात्मकत्वशक्तिविरहेऽपि बोधात्मकत्वातिशयोत्पत्तिसम्भवे बोधात्मककारणकल्पनाऽनवकाशात्।

अतएवास्मिन् विचारपक्षे प्राक्तनजन्मवैकल्यमेव। एवं जन्मान्तरस्याऽपि वैकल्यमेव। मरणे शरीरान्त्यज्ञानेन ज्ञानान्तरं प्रतिसन्धातव्यमित्यत्रापि प्रमाणाभावात्।

नच यत्र यस्य वस्तुनः कारणावस्थायां किमपि विघटनं नैव जायते तत्र तेनैव कारणेन तस्य वस्तुनः समुत्पत्तिर्जायते। यथा कारणावस्थायाः विघटनेनैव बीजादङ्कुरोत्पत्तिर्दृष्टा। एवमविकलजननावस्थं चान्त्यं ज्ञानमिति प्रमाणमस्तीति वाच्यम्। ज्वालादीनामन्त्यक्षणेन व्यभिचारात्।

नच स्नेहवर्तिक्षयादीनां ज्वालाक्षणस्य कारणावस्थावैकल्यादविकलत्वं नास्तीति वाच्यम्। अन्त्यज्ञानस्यापि मरण ~~पीव~~ पीडया पीडितस्याविकलकारणावस्थत्वमसिद्धेः। वस्तुमात्रस्यैव क्षणिकत्वपक्षे परलोकाभावादित्यतो त्याग एव पक्षः श्रेया-

नः।

॥आत्मसिद्धौ प्रमाणान्तरमाह॥

प्रवृत्तिनिवृत्तिभ्यां विग्रहस्य शरीरस्य प्रयत्नवान् अधिष्ठातेत्युच्यते। लतादिप्रवृत्तिं व्यवच्छेत्तुं शरीरसमवायिनीभ्यामिति। जलप्रवाहपतितमृतशरीरप्रवृत्तिनिवृत्तिं व्यवच्छेत्तुं हिताहितप्राप्तिपरिहारयोग्याभ्यामिति। ~~हितं सुखं, अ~~ हितं सुखम्, अहितं दुःखम्।

साधनोपादानपरिवर्जनद्वारेण हिताहितप्राप्तिपरिहारसमर्था चेष्टा प्रयत्नपूर्विका। विशिष्टक्रियात्वात्। रथक्रियावत्। प्राणादिनापि प्रयत्नवान् ~~अधिष्ठा~~ अधिष्ठातेत्यनुमीयते। प्राणादिनेत्यत्र प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियविकाराः सुखदुःखेच्छाप्रयत्नश्चात्मनो लिङ्गानीति समस्तलिङ्गपरिग्रहः।

शरीरपरिगृहीते वायौ प्राणापानाख्ये विकृतस्वभावविपरीतं कौर्ध्वगमनमूर्ध्वगमनञ्च दृश्यते तस्मात् प्रयत्नवान् विग्रहस्याधिष्ठातानुमीयते। शरीरं प्रयत्नवत् अधिष्ठितमिच्छापूर्वकविकृतवाय्वाश्रयत्वात् भस्त्रावत्।

अक्ष्णः पक्ष्मणोः संयोगनिमित्तं कर्म निमेषः, विभागार्थं कर्मोन्मेषः। तेन कर्मणा दारुयन्त्रप्रयोक्तेव विग्रहस्य प्रयत्नवान् अधिष्ठातानुमीयते। वायुवशेनापि दारुयन्त्रस्य निमेषोन्मेषौ स्याताम्, तन्निवृत्त्यर्थं नियतेनेति। शरीरं प्रयत्नवदधिष्ठितमिच्छाधीननिमेषोन्मेषवदवयवयोगित्वात्। दारुयन्त्रवत्। क्षतस्य भग्नस्य च संरोहणं पुनः सङ्घटनं तयोर्निमित्तत्वाद् गृहपतिरिव प्रयत्नवानधिष्ठातानुमीयते। शरीरस्य वृद्धिक्षतसंरोहणं प्रयत्नवता कृतं वृद्धिक्षतभग्नसंरोहणत्वात् गृहवृद्धिक्षतभग्नसंरोहणवत्।

नच वृक्षादिगतेन वृद्ध्यादिना व्यभिचारः इति वाच्यम्। तस्यापि ईश्वरकृतत्वात्। न तु वृक्षादयः सात्मकाः, वृक्षाद्याद्युत्पन्नसमर्थस्य विनष्टात्मसम्बन्धस्याभावात्।

गृहे कोणकेषु कोष्ठेषु भूमौ रोपितं पेलकं प्रति ~~हस्तस्थि~~ हस्तस्थितपेलकस्य प्रेरको शाक इव ~~प्रयत्नवानात्म~~: प्रयत्नवान् प्रेरक एवानुमीयते। एतावता एतदेव तात्पर्यं भणितं यत्- कस्यापि फलस्य रूपं समवलोक्य ~~तत्स~~ त

।।न्याय भूषण।। भासर्वज्ञ।।

रसयितस्य पूर्वानुभूतरसस्य स्मरणात् तत्रेच्छा जायते। तदनन्तरमपि प्रयत्नं आत्ममनःसंयोगापेक्षो रसनेन्द्रियविक्रियां सम्पादयति। तस्मादिन्द्रियचैतन्ये दन्तोदकसंप्लवानुमिता रसनेन्द्रियविक्रिया न स्यात्। इन्द्रिय ~~विक्रियाय~~ विषयस्य नियतत्वात्। चक्षुषा रूपप्रत्यक्षमेवोपपद्यते। नातिरिक्तं ~~किमपि~~ किमपि। रसनया रस एव विज्ञायते नान्यदीयः कोऽपि। अतएव रूपरसयोः सामानाधिकरण्यप्रतीत्यन्तरमपि रूपं दृष्ट्वा रसं स्मरतीति न स्यात्। तेनेन्द्रियव्यतिरिक्तः कोऽप्युभयदर्शी विद्यते यः खलु रूपं दृष्ट्वा रसं स्मरति। स एवात्मोच्यते।

नन्वत्र रूपं दृष्ट्वा रसं स्मरति शरीरमेव कल्प्यं नान्यदीयं किमप्यनावश्यकात् इति चेन्न। बालवृद्धशरीरयोः परिणामभेदेनान्यत्वे सिद्धे बाल्यावस्थानुभूतस्य वृद्धावस्थायामस्मरणप्रसङ्गात्। अतएव सुखदुःखेच्छाद्वेषादिभिः गुणैस्तावद् गुण्यनुमीयते। अहं काणोऽहमिति प्रत्ययेन एकवाक्यत्वमेकाधिकरणत्वं सुखादीनाम्। अहं सुखी अहं दुःखी इत्यहंकारप्रत्ययविषयस्य सुखाद्यवच्छेद्यस्य विषयस्य प्रतीतेः। परशरीराभावात् अहंप्रत्ययस्य न शरीरावलम्बनत्वम्।१।

स्वशरीरवत् शरीरावलम्बनोऽहं प्रत्ययस्य परशरीरप्रत्यक्षे चेत्तदा यथा स्थूलादिप्रत्ययस्य स्वशरीरे परशरीरे जायमानतयाऽहमिति प्रत्ययस्य तद्गम्यत्वं स्यादिति उभयत्र तत्स्वरूपस्याविशेषात्।

अतएवेन्द्रियाणामतीन्द्रियत्वात् अयमिति नेन्द्रियावलम्बनः। अस्य लिङ्गशब्दानपेक्षस्य प्रत्यक्षप्रत्ययत्वात् सुखदुःखादयोऽपि न शरीरेन्द्रियविषयाः। योऽनुभविता तस्यैव स्मरणमभिलाषः सुखदुःखानामुत्पत्तिश्च। तेनानुभवस्मरणे न शरीरेन्द्रियाणामिति। दृश्यते प्रदेशवृत्तित्वं सुखादीनां पादे मे सुखं शिरसि मे दुःखमिति प्रत्ययात्। तस्मात् सुखादयः न शरीरेन्द्रियविशेषगुणाः जायन्ते। अव्याप्यवृत्तित्वात्। ये तु शरीरेन्द्रियविशेषगुणास्ते व्याप्यवृत्तयो दृष्टाः यथा रूपादयः। तस्मान्न सुखादयो व्याप्यवृत्तयः। अतएव न शरीरेन्द्रियगुणाः विद्यन्ते।

कर्णशष्कुल्यवच्छिन्ननभोदेशस्य श्रोत्रेन्द्रियभावमापन्नस्य यः शब्दो गुणो भवति स तद्विवव्यापीत्यव्यभिचारः। तस्मात् अयावद्द्रव्यभावित्वे-

"न्याय भूषण" "भासर्वज्ञ" आत्म विचार"

न न शरीरेन्द्रियगुणाः सुखादयो जायन्ते। इन्द्रियगुणप्रतिषेधेनास्य हेतुत्वं विध्यते। श्रोत्रगुणेन शब्देनानैकान्तिकत्वात्। न सुखादयः शरीरेन्द्रियगुणाः ~~व~~ बाह्येन्द्रियाप्रत्यक्षत्वात्। शरीरेन्द्रियगुणानां ~~गुरुत्वादीनां~~ गुरुत्वादीनां तावदप्रत्यक्षत्वम्। रूपादीनां प्रत्यक्षत्वम्। तस्मात् सुखादयो न तद्गुणा इति शरीरेन्द्रियगुणत्वप्रति-प्रतिषेधात्। परिशेषात् तैरात्मानुमीयते।

नन्वत्र केन चिदेत्थमुच्यते यत् सुखदुःखयोः नित्यं विकारित्वेन नहि नित्यात्मनः गुणत्वं सम्भवति। यदि नाम विकारस्वरूप सुखस्यात्मनः गुणत्वं स्वीकुर्यात् तदा चर्मशरीरवत् सुतरामात्मनः अनित्यत्वमापद्येत इति चेन्न। सुखदुःखोत्पत्तिविनाशाभ्यां तद्भिन्नस्यात्मनः स्वरूपप्रच्युतेरभावात्। नहि नित्यस्योत्पत्तिविनाशो भवतीति सम्भवति। गुणनिवृत्तिगुणान्तरोपादश्च सदा तेषामविरुद्ध एव।

नच नित्यस्य सुखदुःखाभ्यां किं क्रियत इति वाच्यम्। सुखदुःखानुभवस्यैव ग्राह्यत्वात्। नचातिशयानतिशयरहितस्यात्मनः सुखदुःखानुभवे क उपकारः स्यादिति वाच्यम्। सुखदुःखभोक्तृत्वस्यैवोपकारात्। यथा सुखादिभिरात्मानुमीयते तथाहं शब्देनाप्यनुमीयते। अतएवाहंशब्दः लोके वेदे प्रयुज्यमानतया नैव पार्थक्यं लभते। एवं स्वात्मनि क्रियाविरोधात् स्वरूपाभिधेयस्य नैव युक्तत्वम्।(१) तथाच —

~~नात्मानमभि धेयः~~

नात्मानमभिधत्ते हि कश्चिच्छब्दः कदाचन।

तस्मात् योऽस्याभिधेयः स आत्मेति। नचाहं शब्दस्य पृथिव्यादिवाचकत्वं स्यादिति वाच्यम्। यस्य यदर्थवाचकत्वं तस्य तच्छब्देनैव सामानाधिकरण्यात्। यथा द्रव्यं पृथिवीत्यस्य लोकव्यवहारसिद्धत्वात्। अहं शब्दस्य पृथिव्यादिवाचकशब्देन सह व्यतिरेकतया सामानाधिकरण्याभाव एव परिलक्ष्यते। ~~अहं पृथिवी~~ अहं पृथिव्यहमुदकमिति प्रयोगाभावात्। तस्मादहं पदस्य पृथिव्यादिविषयत्वाभाव एवेत्यस्यैवौचित्यम्।

नच तथापि स्थूलोऽहमिति प्रत्ययस्य सर्वजनसिद्धतया शरीरविषयत्वमेव तस्येति वाच्यम्। अहं जानामि-

"कणाद सूत्रम्" "वैशेषिक दर्शन"

"कणाद सूत्र"

कलवैऽपि

अहं गौरादि प्रयोगस्य दर्शनात्। स्मृत्यनुभवस्य शरीरधर्मव्यतिरिक्तत्वात्। तस्माच्छरीरस्य ज्ञानस्मृत्यधिकरण प्रतिषेधतया तत्प्रामाण्यानभ्युपगमेन तेनात्मोपकारकत्वेनैव लक्षणया शरीरे तत् प्रयोगात्। यथा महत्त्वेऽहमेवायमिति व्यपदेशाच्च।

(१) अत एव व्यवस्थिते (आत्मान्तरगुणानामात्मान्तरगुणेऽकारणात्)" इति सूत्रमवलम्ब्यात्मान्तरगुणानां सुखादीनामात्मान्तरगुणेषु सुखादिषु कारणत्वाभावात्। धर्माधर्मयोरन्यत्राश्रितयोः - तदन्यत्रात्मिकत्वस्याऽयुक्तत्वात्।

एतावता धर्माधर्मयोरात्मगुणस्यैव प्रतिपादनं सूत्रकृताऽभिगच्छते। अन्यथा तयोः सुखादि साधर्म्यकथनात् तदात्मिकत्व समर्थनस्य वैकल्यात्।

(२) "आत्ममनसोः संयोगात् संस्काराच्चेति" स्मृति सूत्रमाकलय्य पूर्वानुभूतोऽर्थः सदा स्मर्यत एव। किन्तु नैव स्मरणे पूर्वानुभवः कारणम्। चिरविनष्टत्वात्। नाप्यनुभवाभावोऽपि कारणं वक्तुम् शक्यत्वात्। अभावस्य निरतिशयत्वेन पटुमन्दादिभेदानुपपत्तेरभ्यासस्य वैयर्थ्यात्। तस्मात्स्मरणाय संस्कारकल्पना नितरामावश्यकी।

~~येतु विनष्टानुभवमेव~~

येतु विनष्टानुभवमेव स्मरणं प्रति कारणं कल्पयन्ति तेषां विचारे विनष्टज्योतिष्टोमादि यागस्यैव स्वर्गादिफलस्य साधनत्वेन धर्माधर्मात्मकादृष्टस्योच्छेदप्रसङ्गः।

"नानात्मानो व्यवस्थातः" इति सूत्रेणात्मनः नानात्वं सिद्ध्यति। नन्वत्रात्मनः नानात्वे कथं खलु व्यवस्था प्रतिपाद्यत इतिचेन्न। नानाभेदभाविनां ज्ञानादि सुखानामप्रतिसन्धानात्। ऐकात्म्ये बाल्यावस्थायां कृतानुभूतं वृद्धावस्थायां सदानुसन्धीयते। एवं ममदुःखं ममसुखमासीत्" इत्यादि देहान्तरानुभूतमपि समेषु शरीरेषु सदा भवेदेवानुभवितुरेकत्वात्। परन्तु नैवं भवति। तस्मात् शरीरभेदमुपकल्प्यात्मनः नानात्वं युक्तियुक्तमेव।

यथाकाशस्यै कर्णशष्कुल्याद्युपाधिविशिष्टाकाशात् शब्दोपलब्धिर्जायते तद्वत् आत्मैकत्वेऽपि देहाद्युपाधि~~विशिष्टाकाशात्~~ विशिष्टः खलु आत्मा। तमेव सुखं स्मारयति नान्यद्। अतो हि एकत्वमात्मनः सिद्ध्यति वक्तुमशक्यमेवेति।

प्रतिपुरुषादि व्यवस्थितादृष्टेन कर्णशष्कुलीनां शब्दोपलब्धेः कारणत्वं कल्पते। अस्मादेव हेतोः ~~कर्णेषु~~ कर्णशष्कुल्याद्युपाधिविशिष्टाकाशेनैव शब्दप्रत्यक्षं जायत एव नान्यदी-

''न्यायकन्दली'' (१)

ख्या —

''न्यायसार'' (२)

येन। ~~किन्तु~~ किन्त्वैकत्वे तदात्मनः धर्माधर्मयोरव्यवस्थानात्। शरीरव्यवस्थाभावे सुखदुःखव्यवस्थापि निर्मूलैव। मनःसम्बन्धस्य साधारणत्वात्। सुखदुःखादिनियमस्य निर्मूलत्वं सुस्पष्टमेव।

आत्मनः नानात्वे सर्वेषामात्मनां सर्वगतत्वेन सर्वमूर्तद्रव्येण सह सम्बद्धतया वापि सुखदुःखादिभोगस्य सर्वसाधारणत्वं नापद्यते। यत्कर्मणा यच्छरीरमारब्धं तच्छरीरमेव तस्यात्मनः भोगायतनं नतु सर्वस्य। एवं यस्यात्मनः शरीरेण यददृष्टं जायते ~~तदेवात्मनः~~ तदेवादृष्टं तस्यात्मनः स्यात्। नतु सर्वेषामात्मनामिति। एवं शरीरान्तरकर्मान्तरनियमात् जीवानामनादित्वं नितरां युक्त्या संगतमेव। (१)

अत्र केचिदित्थं व्याचक्षते यत् एकत्वेऽपि परमात्मनः जीवात्मनां परस्परभेदात् तद्व्यवस्थेति सम्यक् संगच्छत इति तदसत्। परमात्मनो भेदेऽद्वैतसिद्धान्तव्याघातात्। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति जीवपरमात्मनोस्तादात्म्यश्रुतिविरोधाच्च।

यद्यपि जीवपरमात्मनोर्भिन्नत्वं निश्चितमेव तथाप्यवि- ~~द्यया~~ तयोर्भिन्नत्वमुपकल्पयन्तीति चेत् सत्यम्। परन्तु प्रश्नः तावत् तं प्रति प्रष्टव्यः खलु कस्येयमविद्या किं ब्रह्मणः? किंतु ते जीवानाम्। नैव तावत् अविद्याया ब्रह्मणोऽस्तीति वक्तुं पार्यते। शुद्धबुद्धस्वभावात् तस्य। यदि नाम अविद्याश्रयत्वं जीवस्येति तात्पर्यं तर्ह्यन्योन्याश्रयदोषपराहतत्वमेव समापतेत्। कथंतु अविद्ययैव जीवस्य कल्पना। एवं सा खल्वविद्या जीवाश्रिता। अविद्ययैव तावज्जीवः। जीवेनैव तावदविद्यायाः सत्तावगम्यते। अनयोः कस्तावत् अग्रे गच्छेत् एवं कस्तावत् पश्चादिति निश्चयस्य दुर्ज्ञेयत्वात्। तेन प्रस्तुतनिर्णयमाकलय्य कमपि निश्चेतुं दुष्करमिति।

नच बीजाङ्कुरवत् अविद्याजीवसम्बन्धोऽप्यनादिरेवेति वाच्यम्। बीजाङ्कुरस्थले द्वे वस्तुनी नैसर्गिकतया विद्येते। अतएवाङ्कुरकारणत्वं बीजस्य एवं बीजं प्रति अङ्कुरस्य कारणत्वं घटते। तस्मादन्योन्याश्रयदोषदुष्टत्वेन बीजाङ्कुरयोः सामान्यकार्यकारणभावस्यौचित्यात्। (२)

तेन बीजाङ्कुरव्यक्तिभेदवत् अविद्याजीवयोः पारमार्थिकत्वाभावात् तदपि चानुपपन्नमेव। व्यक्तिभेदमुपकल्प्य बीजाङ्कुरयोरन्योन्यकारणत्वं संसिद्धमेव। परन्तु जीवस्य सर्वासु भवकोटिषु एकत्वमेव। नानेकत्वम्।

॥ वैशेषिक दर्शन ॥

(ब) ॥ प्रशस्त पादभाष्य कन्दली ॥

मनुष्य पशु पक्ष्यादि प्रकृति योनिषु जीवाः समुत्पद्यन्ते। तत्तज्जातेः विशेषप्रकारक भोजनाभिलाषया तत्तज्जीवे स्तनपानात् प्राक् जन्मनि ~~एक~~ एतद् प्रकारकोऽहमस्यानुमानं भवति। इयमेवानुपपत्त्या जीवे शरीरादि सम्बन्धं प्रमाणयति।

परन्त्वभेद पक्षेऽपि अविद्यया जीवानां भेदः एवं जीव भेद कारणेनापि अविद्येत्यसंगतिरेव। नच ब्रह्मवत् जीवस्यात्यन्त एकत्वेन फलतः जीवस्य ब्रह्म प्रतिबिम्बत्वं जायते तस्मात् "तमेव भान्तमनुभाति, सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुति प्रामाण्यात् अनादि निधनं ब्रह्मतत्त्वमेवेदं सर्वदेहेषु प्रतिभाति इति वाच्यम्। तथासति अस्मिन्नपि पक्षे व्यवस्थायाः निराकानुत्पत्तौ ध्रौव्यात्। अतः "नानात्मानो व्यवस्थातः" इति सूत्रं संगच्छते। (७)

एवं च जीव ब्रह्मणोर्भेद प्रतिपादक श्रुतीनां गौणार्थत्वात्। जीवानां नानात्वपक्षे अस्यापि समाधानं सम्भवति। सर्वेषां जीवानां क्रमेण मुक्तौ अन्ते संसारोच्छेदापत्तिः द्रष्टव्या। अपरिमितानानुमानपरम्परा जीवे शरीरादि सम्बन्धं प्रमाणयति। यथाह वार्तिककारमिश्राः:—

अतएव च विद्वत्सु मुच्यमानेषु सन्ततम्।
~~अन्यन्यूनातिरिक्तत्वे~~
ब्रह्माण लोको जीवानामनन्तत्वादशून्यता ॥
अन्त्यन्यूनातिरिक्तत्वे युज्यते परिणामवत्।
वस्तुन्य परिमेयेतु नूनं तेषामसम्भवः।

"नानात्मानो व्यवस्थातः" इति वचनादेवात्मनि पृथक्त्वं सिद्धयति। "विभववान् महानाकाशस्तथा चात्मा" इति सूत्रकारवचनात् विभुत्वेनाकाशवत् आत्मनः परममहत्परिमाणं सिद्धयति। ~~तथा चात्मेति वचनात्~~ विभुत्वमात्मनः वह्नेरूर्ध्वज्वलनात् वायोस्तिर्यग्गमनादवगतम्।

नच तदाश्रयेणासम्बद्धं ~~तावद्~~ तावददृष्टं कारणं तयो भवितुमर्हतीति वाच्यम्। अतिप्रसंगात्। नचात्मसमवेतस्यादृष्टस्य द्रव्यान्तरसम्बन्धो साक्षात् भवत इति वाच्यम्। स्वाश्रयसम्बन्ध द्वारेण तस्य सम्बन्धात्। तस्मात् समस्त मूर्त द्रव्य सम्बन्ध लक्षणत्वेनात्मनः विभुत्वं सर्ववादिमतसिद्धमेवेति न्यायाः पन्थाः। (८)

"समीक्षणम्"

भारतीय दर्शन साहित्येतिहासे ग्रन्थसम्पत्त्यनुरोधेन न्याय-

(१)"गौतमसूत्र"

-दर्शनस्य सर्वस्मादपेक्षया महत्त्वं सर्वश्रेष्ठम्। न्यायदर्शनस्य विवेचनात्मक पद्धतिः नितरां श्रेयसी विद्यते। प्रमाण तत्त्वं व्याख्याय एवं तात्त्विक रहस्या नितरां विविच्य यत् तत्त्वं न्यायदर्शने नितान्त मन्विमेष तेषां दर्शनान्तरेष्वुपयोगं किमपि परिवर्तनं विधाय एव विवरणात्मक प्रबन्धेषु सन्निश्चय मब्रवीत्।

हेत्वाभासस्य सूक्ष्म विवरणं समुपस्थाप्य न्याय शास्त्रं तावदनुमानस्य दोषान् दूरीकर्तुं विलक्षणमार्गं प्रास्तौत्। किन्तु कलिकाल सर्वज्ञः हेमचन्द्राचार्यः नितरां वचनमिदमाचिक्षेप यदक्षपादः स्वदर्शन शास्त्रे अपवर्ग साधक तत्त्वज्ञानं सदौचित्येन नितरामवर्णयत् परन्तु तद्विपरीतं छल वितण्डादीन् समुपवर्ण्य तन्मार्गिक तत्त्वं विच्छिद्य व्यर्थमेवेति तेन समयोऽतिवाहितः। परन्तु तेषामाक्षेपस्तु सर्वथा निराधारएव। यतोहि नैतादृशी वस्तुस्थितिः वरीवर्तीति।

अक्षपादस्तु स्वयं तावत् तत्त्वाध्यवसाय तथा तद्परिपालनाय च जल्प वितण्डादीनां तत्प्रयोगं स्वीचक्रे यथा कण्टकशाखावरणं वीजाङ्कुर परिरक्षणाय व्यवहारे लोकाः स्वीकुर्वते।(१) तस्मात् छलोपयोगं विनाशात्मकतया नैव स्वीकृत्य रचनात्मकत्वं स्वीचकार। अन्यथा तदभावे कोमलधियां नास्तिकानामापातत रमणीयवाक्य कदम्बेन प्रतारितः सन् साधारणो जनः तावदुन्मार्गपथ पथिकत्वं नितान्तमाकलय्य परलोक लीला प्रलापस्य वैयर्थ्यं नाङ्गीचक्रे। अतएव भावतः तथाक्षपादस्य ~~निर्स~~ निसर्ग निर्मल करुणा वृत्तिः लोचनगोचरा भवति।

परन्तु समालोचकानां विचारे न्याय दर्शनस्य तार्किक पद्धतिः ~~सा~~ यथा सन्तोषप्रदा न तथा सन्तोषप्रदः तत्त्वज्ञान साधक पन्थाः। न्याय शास्त्रं तावत् एतस्माज्जगतः भिन्नं ज्ञानस्य स्वतन्त्रात्मक सत्तां कल्पयामास।

न्याय दर्शन शास्त्रे ऽऽ ~~[illegible]~~ त्मनः नित्यत्वं प्रसाध्य परमाणूनां तथाकाशादीनाञ्च नित्यत्वेनैव प्रतिपादनं चक्रे। ~~समालोच~~ समालोचकानां विचारानुसारं तावदाचक्षते यत्- अनया पद्धत्या जगतः व्याख्याने महती त्रुटिः लोचनगोचरायते। अतएव न्याय सम्मत व्याख्यायां कियतः नित्यपदार्थस्यास्तित्वं स्वीकर्तुं नास्ति किमप्यौचित्यं प्रतिभाति। तदेव दर्शनं वास्तविकं यस्मिन् एकस्यैव पदार्थस्य नित्यत्वं स्वीकृत्य समस्त पदार्थस्य सम्बन्धः नितरामावश्यकः प्रतिभाति। अनयैव प्रणाल्या न्याय दर्शने ते समालोचकाः

॥श्री हर्ष॥ (७)

॥रामानुज दर्शन॥

॥गौतम सूत्रम्॥

तान् दोषान् प्रत्यपीपदत्।

संसारमहीरुहस्य निमित्तकारणत्वमीश्वरे स्वीकृत्य संसारतत्त्वं व्याख्याय लौकिकदृष्टान्तमुपदर्शितवान्। यथा कुम्भकारः घटं मृत्तिकादण्डचक्रादिभिः निर्माति तद्वत् ईश्वरः परमाणुना संसारं निर्माति। सृष्टिकार्यायोपादानकारणानि नितरामवलम्बन्ते। उपादानसत्तां स्वीकृत्य सर्वशक्तिमतः परमेश्वरस्य परस्वातन्त्र्यमुपपादयामास।

वेदान्तदर्शनं तु ~~सर्वशक्ति~~ सर्वशक्तिमतः परमेश्वरस्य जगतामुपादाननिमित्तकारणत्वमभ्युपगम्य नितरामिमामापत्तिं निराचकार। न्यायदर्शनं तावदात्मनः स्वतन्त्रसत्तां प्रदर्श्य तस्य तथा शरीरेन्द्रियाभ्यां पार्थक्यं नित्यत्वञ्चाभ्युपगम्य चार्वाकबौद्धानां सिद्धान्तानि युक्तियुक्तपथेन चिच्छेद। एवं नितरामात्मनः स्वातन्त्र्यं प्रादर्शयत्। किन्तु मुक्तात्मनः कल्पना नैयायिकानां, विभिन्नदार्शनिकानां प्रबलतमाक्षेपस्य महान् विषयोऽस्ति।

मुक्तावस्थायां समस्ताज्ञानावरणेभ्यः विमुक्तात्मनि नित्यानन्दतां स्वीकुर्वन् श्रीहर्षः नैषधीयचरिते न्यायसम्मता मुक्तिः सदोपहास्पदेति कर्कशभाषया समालोचितवान्। तद्यथा—

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः॥

नैषधीयचरितम् ॥१७-७५॥

वृत्तमिदं विदुषां समाजे सदा मोदमावहति। यथा सूत्रकारः सचेतसां मुक्तये शिलात्वायोपदिदेश, तेन तं गोतमं वेत्सीति वास्तविकम्। अन्यच्च वैष्णवदार्शनिकास्तु उच्चैर्ब्रुवते यत् नित्ये वृन्दावने रासविहारव्यवस्थां प्रतिपादयन्तो हि वैष्णवाः नीरसमुक्तिकल्पनया चकितमभिदधते। वृन्दावनस्य रासनिकुञ्जे शृगालत्वं वरं परन्तु सुखलेशविवर्जितं वैशेषिकोक्तमोक्षं नैव वाञ्छामः। तथा च—

वरं वृन्दावने रम्ये शृगालत्वं वृणोम्यहम्।
वैशेषिकोक्तमोक्षात्तु सुखलेशविवर्जितात्॥

॥ सर्वसिद्धान्तसङ्ग्रहः ॥

परन्त्वयमाक्षेपः नितरामश्रद्धेय एव। निर्युक्तिकात्। "तदत्यन्तविमोक्षोऽपवर्गः" (१) एतावता सूत्रेण दुःखादत्यन्तविमोक्षोऽयं नितरामपवर्ग इत्येवावगम्यते। तत्रात्यन्तपदेनापि विज्ञायते यत् खलु जन्मग्रहणानन्तरं तन्मा-

"न्यायमञ्जरी" जयन्तभट्ट"

"तात्पर्य" "न्यायभाष्यवार्तिक" पृ०-८१,

शोऽपि स्यादेवेति निश्चितम्। ततः भविष्येऽपि नैव जन्म गृह्णाति। तस्यामेवावस्थायां दुःखात्यन्ताभावोऽप्युच्यते। अतएव गृहीत जन्मनाशानन्तरं भविष्येऽपि तन्नाशस्यौचित्यं प्रतिभाति। तदनन्तरमेवात्मनः दुःखानामात्यन्तकी निवृत्तिः सम्पद्यते।

अतएव यावत् कालपर्यन्तं वासनाक्षयो हि नितामात्मगुणाः नैव विनश्येयुः न तावत् कालपर्यन्तं दुःखानामात्यन्तकी निवृत्तिः सम्भवति। अनेनैव हेतुनाऽऽत्मनः विशेषगुणानां ~~बुद्धिसुख दुःखेच्छाद्वय~~ः बुद्धिसुख दुःखेच्छाद्वेष प्रयत्न धर्माधर्म संस्काराणां नाशः नैसर्गिकः। प्रयत्न धर्माधर्म कारणतयैव सुखदुःखादय, सदोत्पद्यन्ते। तेन संसारात्मकप्रासादस्य स्तम्भरूपता सदा प्रत्यक्षैव। एतेषां गुणानां वैलक्षण्येन वैचित्र्येण चात्मनः भोगायतनं शरीरमुपकल्पयामः। आत्मनः भोगायतन शरीराभावेनैवात्मनि सदेच्छादयः जायन्ते। तस्मात् द्वेषेच्छा गुणादिभिः सह ~~आत्मना~~ आत्मनः नैव सम्बन्धो दृश्यते। अतः न्यायपद्धत्या मुक्तावस्थायां नितामात्मनः विशेषगुणानामत्यन्ताभावं स्वीकुरुते। (१)

वास्तविकं वस्तुगत्या मुक्तात्मनः स्वरूपस्य परिचयः जयन्तभट्टस्य न्यायमञ्जर्यां दृश्यते। मुक्तावस्थायां तु आत्मा स्व विशुद्धस्वरूपे प्रतिष्ठितः सन् स्वनिविगुणैः परित्यक्तो भवति। अतएवात्मा दुःखक्लेशादिना विनिर्मुक्तः।

उद्योतकाराणां विचारानुसारं द्वाभ्यां प्रकाराभ्यां निःश्रेयसे समुपपादिते। परापरभेदात्। अनयोः निश्रेयसोः तत्त्वज्ञानस्यैव मूलत्वमिति तेषां तात्पर्यमित्यवगच्छामः। तत्र जीवन्मुक्तिस्तु सदापरनिश्रेयस वाच्या। परनिश्रेयसं विदेह ~~मुक्ति~~ मुक्तिरेव। वाचस्पतिमिश्रास्तु परापरभेदादनयोः पार्थक्यं प्रत्यपीपदन्। (२)

आत्मनः सन्दर्भे चतस्रः विप्रतिपत्तयः सञ्जायन्ते तद् यथा श्रवणमनन ध्यान साक्षात्कारभेदात्। तत्रान्वीक्षिक्यादीनामुपयोगः ~~संश~~ संशयादितत्त्व प्रमाणादि तत्त्वबोधने सञ्जायते। परन्तु नैव मननेन झटिति साक्षात्कारोदयः। कथन्तु विपर्यय ज्ञान नाशानन्तरं नैव वासना क्षीयते। अतएव ध्यानमेव तावदात्मसाक्षात्काराय सफलसोपानम्। एवं योगज ध्यानमन्तरा नैवात्मतत्त्वस्याऽपो-

॥ न्याय भूषण ॥

॥ न्यायदर्शन सूत्रम् ॥ १।१।२ ॥ अक्षपाद।

क्षानुभूतिः समुत्पद्यते। यावत् प्रारब्ध कर्माणि नैवोपभोक्तुः-क्षीयन्ते तावत् प्रान्तिः श्रेयसामभ्युदयः नैव सम्भवति।

“मुक्तात्मनः स्वरूपम्”

रागादेव सुखाय प्रवर्तते। तेन रागादेव सुखमुत्पद्यते। यावत् सुखं सन्तिष्ठते तावदेव रागोऽपि जायत एव। तस्मात् राग एवात्मानं प्रतिबध्नाति। परिस्थित्यामस्यां सुखानुभवे सत्यपि नैवात्मा बन्धनं मोक्तुं समुद्यतो भवति।

तत्र न्यायदर्शनस्य तात्पर्यमिदमेवाऽऽभाति यत् “आनन्दं ब्रह्म” इति श्रुतिवाक्यमिदं विज्ञातुं शक्नुयात् यत् ब्रह्मणि सदानन्दस्य सत्ता विद्यत एव। तस्य तात्पर्यं केवलमिदमेव वीक्षतीति यत् ब्रह्मणि दुःखाभाव एवावगन्तव्यः। न त्वानन्दरूपत्वं तत्र संगच्छते। लोकव्यवहारोऽपि तमेव पक्षं कक्षीकरोति। यथा सञ्जाते ज्वरे दुःखान्यनुभवति (व) ज्वरविनाशे तु सुखमेव। अतएवात्र सुखभावना केवलं ज्वरविनाशमूलक एव। अर्थात् नात्र कस्यापि वस्तुनः सत्ता समुत्पद्यते। किन्तु निषेधभावना सत्तात्मकतया गृह्यते। फलतः मोक्षदशायां नैव सुखं नैव दुःखमपि। तस्मात् तस्यां वेलायां विशुद्धावस्थायामात्मा सन्तिष्ठते। चैतन्यमपि नोदेति। ज्ञानेच्छाप्रयत्नादयस्तु आत्मनि तदेव सञ्जायन्ते यदात्मा भोगाय भोगायतनं धत्ते। मुक्तावस्थायां नैव भोगायतनं तेन नैव चैतन्यमुपजायते। अतएव चैतन्यं नितरामात्मनः सदाऽऽकस्मिकगुण एव बोभवीति। सति शरीरे चैतन्यमुपजायते। यदा शरीरेण सहात्मनः सम्बन्धोऽस्ति तदनन्तरमेव तत्र चैतन्यं जायते। ज्ञानेच्छाकृतयस्तु शरीरविशिष्टात्मनि जायन्ते। न तु विशुद्धस्वरूपे। अतएव सञ्जाते शरीरविहीने इमाः ज्ञानेच्छाकृतयः सर्वथा लुप्यन्ते। अतएवेयं मुक्तादशा न्यायवैशेषिकयोः सम्मता। नात्र कश्चन शंकावसरः समुपसर्पति।

मुक्तिसाधन सम्बन्धे भगवान् अक्षपादस्तु स्वसूत्रे प्रस्तुतपद्धतिं सदा वैशद्येन विवेचयामास। (व) रागद्वेषादयः सदा मिथ्याज्ञानेनैव जायन्ते। तयैव भावनया शुभाशुभादयोऽपि प्रवर्तन्ते। येन शरीराणि धार्यन्ते। जन्मना समुत्पद्यन्ते क्लेशजालानि। मिथ्याज्ञानस्य प्रवर्तमानत-

''ন্যায়মঞ্জরী'' প্রমেয়প্রকরণ ''৫।
'' ন্যায় দর্শন গৌতম সূত্র'' -৪- ২-৪৬,

(২) ''দ্বয়োর্না নির্মাতুঃ ত্রিভুবন বিধাতুশ্চ কলহঃ''

या संसरति सदा संसारः। मिथ्याज्ञानानि सदा तत्त्वज्ञानेन-क्षीयन्ते। अतः प्रतिपल मात्मस्वरूप विषयक तत्त्वज्ञानेनोपपद्यते मोक्षः। जयन्तभट्टास्तु ज्ञानमेव सर्वस्मादपेक्षया साधीय इत्यत्र परं व्याहार्षुः। परन्तु आत्मानं साक्षात्कर्तुं तत्त्वज्ञानापेक्षया योगदर्शन सम्मत ध्यान धारणादि साधनानि सदैवापेक्ष्यन्ते।([illegible])

(१) अक्षपादस्तु सूत्रे प्राणायामादि तदुपयुक्त साधनं निरवोचत् तत्त्वज्ञान साधनतया।(२) एतावता वचन सन्दर्भ सौन्दर्येण स्पष्टमेव ध्वनितं यत् मुक्तिः तत्त्वज्ञानेन साध्या, किन्तु योगाभ्यासोऽपि तत्साहाय्येनापेक्षते। अतएव मुक्तये योगाभ्यासस्य सहकारिकारणतया साधनत्वमुट्टङ्कितम्।

न्यायदर्शन शास्त्रे तु निमित्त कारणतयैव जगतः कर्तृत्वं व्याख्याय परमेश्वरस्य मानवीयभावानां समुपस्थाय लघुत्वमेव तस्य वभाण। अतएव समालोचकानां विचारे जगत् स्रष्टा परमेश्वरः लौकिक कर्त्रनुरूपतया कल्पित न्यायतत्त्वविदा। यथा च कर्मकारोऽपि प्रदीप्त दावानल कराल ज्वालायां तावदयोगोलकं सन्तप्य स्वेच्छानुसारं विभिन्नानि वस्तूनि निर्माति तथा परमेश्वरोऽपि समस्तं जगत् परमाणुना निर्माति। अतएव जगत् सृष्ट्यै उपादान कारणोऽस्पारि परमेश्वरः सदावलम्बते। अनेनैव हेतुना समालोचकाः सदा वचनमिदं व्याचक्षते खलु उपादानावलम्बनतया कथं तार्किकाणां परमेश्वरः सर्वशक्तिमान् एवं परमस्वतन्त्रः स्वीकार्यः।(२)

वेदान्त दर्शनं तु प्रत्यजस्रमापत्तिं परिहर्तुं युगपदेव निमित्तोपादानमभ्युपगम्य न्यायदर्शन दौर्बल्यं चिच्छेद। परन्तु-न्यायदर्शन शास्त्रे तं दूरीकर्तुं क्षमते इति समालोचकानां सरणिः।

न्यायदर्शन शास्त्रे सदात्मनः स्वातन्त्र्यं समुपपाद्य शरीरेन्द्रियेभ्यः भिन्नत्वं प्रादर्शयत्। एवं तयैव युक्त्या चार्वाक बौद्ध सिद्धान्तानि स्व प्रबलोहापोहेन पिपेष। तथा चात्मनः स्वातन्त्र्यं प्रदर्शयामास। परन्तु मुक्तात्मनः सन्दर्भे या कल्पना विहिता, सा विभिन्न दार्शनिकानां विचारसरण्या नितान्तं कौतुकावहकराक्ष विषयत्वं धत्ते। मुक्तावस्थायां समस्ताज्ञानावरणेभ्यः विमुक्तात्मनि नित्यानन्दमवगच्छन् न्याय गहनान्धिल समुच्छेदन प्रवीण पारीणाः खलु दार्शनिक चक्रचूडामणिः वेदान्त दर्शन कानन विहरणपरायण पञ्चाननः साहित्य कुसुम सम्पदेषु कुसुमाकर इव श्रीमान् श्रीहर्षः नैषधीयचरिते न्यायदर्शन शास्त्र सम्मत मुक्तिमाचि-

॥ नैषधीयचरित ॥

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः॥
॥१८-६२॥

॥ "वैशेषिक सूत्रोपस्कार" शङ्करमिश्र ॥ (२) "मोक्ष विचारः" ॥

॥ गौतम सूत्र ॥ (३)

॥ "असुखम्" इति श्रुतिः।

क्षेप। अयमाक्षेपः दार्शनिकसमाजे विदुषां चेतांसि नितरामनुरञ्जयति। अनेनैव हेतुना तावदियमुक्तिः तेषां प्रसिद्धिमावहति। तेनोच्यते यत् सूत्रकारेणाक्षपादेन सचेतसां तावद्ज्ञानसुखादिरहितशिलात्वाय मुक्तये जीवनस्य लक्ष्यं प्रतिपाद्य स्वशास्त्रमुपदिष्टम्। तेन तेषामभियानं शब्दतः नैव यथार्थं किन्तु वस्तुगत्याऽपि। अतएव न केवलं गौतमः किन्तु गोतमः। (१)

परन्तु- दार्शनिकचक्रचूडामणेः काव्यकुसुमाकरस्य साहित्यकुसुमामोदितस्य श्रीमतः श्रीहर्षस्याक्षेपः किमसत्यं सत्यं वेति सदानुसन्धेयः। नहि दुःखात्यन्ताभावमन्तरा कदाचिदपि समुपलभ्येत नित्यानन्दः। लोकव्यवहारमर्यादायां समुपलभ्यते चेत् आनन्दः तदा दुःखात्यन्ताभावावस्थायामेव। आनन्दोपलब्धेः पूर्वं पृष्ठे दुःखमेव तावदनुभूयते। अतएव नित्यसुखाभिव्यक्तौ मानाभावात्। (२)

तस्मात् दुःखानामात्यन्तिकी निवृत्तिः मोक्ष इति संगच्छते। नैव सुखावस्थायां दुःखं क्वचिदपि दृष्टम्। तेन दुःखात्यन्ताभावस्य परमपुरुषार्थत्वात्। (३) यदि दुःखात्यन्ताभावस्य परमपुरुषार्थत्वे किं कस्यापि गोत्वं कथमपि समुपपद्येत। किं तावत् केनापि रूपेण पुरुषार्थत्वं मन्यतां परन्तु नैव तावता कस्मिन्नपि पुरुषे गोत्वं सम्पद्येत। सास्नादिमत्त्वाभावात्। यदि क्वचिदपि गोत्वं तदा तस्मिन्नपि गोत्वं भवत्येव। तद् प्रतिपादयितुमेव तत्त्वं घटते। नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन विज्ञानाश्रय एवोक्तः। न तु विज्ञानस्वरूपत्वम्। "मत्वर्थी योऽच् प्रत्ययानुरोधेनानन्दस्याश्रयत्वमेव तात्पर्यम्। आनन्दोऽपि दुःखाभावे उपचर्यते। भाराद्यपगमे सुखी संवृत्तोऽस्मीतिवत् विज्ञातव्यः। अस्तु तस्मिन्नानन्दो न खसावानन्दः। (४) न विद्य सुखं यस्येति कुतो नार्थ इति वाच्यम्। क्लिष्टकल्पनापत्तेः।

नच बहुव्रीहावन्यपदार्थस्य प्रधानतया तल्लाभाय तत्र लक्षणापत्तेः। नच नञ्तत्पुरुषेऽपि नञो लक्षणा नितरामावश्यकीति अन्यथा नञर्थस्य नामार्थतया भेदेनान्वयसम्भवादिति वाच्यम्। तस्य नामत्वेऽपि निपातत्वादिति। परन्तु नञ्तत्पुरुषेऽपि ~~तत्रासुखपदयो~~ तत्रासुखब्रह्मपदयोः एकधर्मिकबोधकत्वेन सामानाधिकरण्यानुभवात्। अन्यथा तयोः समानवचनत्वानुपपत्तेः। अतः असुखमिति पदस्य बहुव्रीहि-

॥न्यायभूषण॥ ॥आत्मवद्ल॥

(१) यत्र हि द्वैतमिव भवति तदित इतरं प्रश्यति। यत्रत्वस्य सर्वात्मैवाभूत् तत्केन कं पश्येत्। श्रुतिः॥

निष्पन्नत्वे प्रकरणविरोधादिति नैवं ज्यायानिति प्रतिभाति।(१)

पार्थसारथिमिश्रास्तु इत्थं व्याचक्षते यत् विचित्रविलक्षणवासनापारतन्त्र्यतया विचित्रनीलपीतादिरूपेण ज्ञानसन्तानप्रवाहस्य वासनोच्छेदात् नीलादिवैचित्र्यं परित्यज्य संविन्मात्रेणावस्थानं मोक्ष इति केचित्। तदपरे प्रपञ्चविलयमेवापवर्गं प्रत्यपीपदन्। प्रपञ्चस्याविद्यानिर्मितत्वात्। स्वप्नप्रपञ्चवत्। तत्प्रबोधेनैव सम्प्राप्तायामविद्यायां ब्रह्मविद्यया स्वयमेव विलीयते।(२)

अत्रापि वचनमिदं प्रपञ्चस्याविद्यानिर्मितत्वनिराकरणतयाः पारमार्थ्यत्वप्रतिपादनात् तदपि निरस्तमेव। यदपि च यत्र हि द्वैतमिव जायते इति द्वैताभावस्य भ्रान्तित्ववचनं तदौपचारिकम्।

यथा खलु स्वप्नप्रपञ्चेन्द्रजालमृगतोयादेः कियत् कालं यावत् दृष्टिपथसमागततयाऽपि पश्चात् विलीनतां प्रयाति तद्वत् शरीरेन्द्रियविषयरूपप्रपञ्चस्यापि कञ्चित् कालं यावत् तदुपभोग्यतयापि पश्चात् तद्विनाशात् तद्विरुद्ध एव जायते। अनेन वाक्येन पुरुषाणां विषयभोगेषु उपचारेण भ्रान्तिरित्युच्यते। तावदिदमपि मुक्तौ अभिरुचिं जनयितुं नालम्।

यत्र त्वस्य सर्वात्मैवाभूदित्यपि मुक्तौ तदात्मनः नितान्तमद्वितीयवचनं तदपि न साधीयः। सर्वप्रपञ्चस्यात्मसम्बन्ध ~~निषेधतया~~ प्रतिषेधार्थतया प्रपञ्चस्वरूपानिषेधात्। तस्मात् नैव प्रपञ्चविलयो मोक्षः। अपि तु प्रपञ्चसम्बन्धस्य विलय एव।

त्रेधा हि प्रपञ्चः पुरुषं बध्नाति भोगायतनं शरीरं, भोगसाधनानि तावदिन्द्रियाणि, भोग्याः शब्दादयो विषयाः। सुखदुःखविषयो परोक्षानुभव उच्यते। तस्मादस्य त्रिविधस्यान्तिको विलयो मोक्षः। ~~आत्यन्तिकत्वञ्च~~

आत्यन्तिकत्वं हि पूर्वोत्पन्नानां शरीरेन्द्रियविषयाणां विनाश एव। अनुत्पन्नानां चात्यन्तिकोऽनुत्पादः धर्माधर्मयोः तदुत्पादकयोश्च परिक्षयात् अत्यन्तानुत्पत्तिः। सोऽयं प्रपञ्चसम्बन्धो बन्धः तद्विमोक्षश्च मोक्ष इति।

तथागतास्तु सवासनसमुच्छेदो ज्ञानोपरम इति व्याचक्षते तथा च न प्रेत्य संज्ञास्तीति। तदपि च निःसारमेव। सर्वतः प्रियतमस्यात्मनः समुच्छेदाय प्रेक्षावतां प्रवृत्त्यनुपपत्तेः।

॥ शास्त्रदीपिका ॥ पार्थसारथिमिश्र ॥

बन्ध विच्छेदस्यैव तदर्थत्वात्। अन्येतु - अखिल वासनोच्छेदे विगत विषयाकार मालिन्य रहित विशुद्ध ज्ञानोदयो मोक्ष इति। तदपि नैव समीचीनम्। कारणाभावेन तदनुपपत्तेः। तत्पक्षे भावना प्रचयस्यैव कारणत्वात्।

प्रस्तुत विचार पक्षेऽस्मिन् वास्तविकी सत्ता खलु-ज्ञानस्यैव विद्यते। तदन्ये घटादि विषयाः सदाज्ञान परिकल्पिताः। वेदान्तिनस्तु अस्यैव व्यावहारिक सत्त्वं चाङ्गीकृत्य वास्तविक सत्ता विशिष्ट ज्ञानं निर्विकल्पमेव स्वीकुर्वते। तत्र घटादि विषय सम्बन्धस्य सुखदुःख कारणतया बन्धः। तस्मात् प्रतिपादित विशुद्ध ज्ञाने घटादिविषय सम्बन्धोच्छेद एव मुक्तिः। (१)

तदन्ये दार्शनिकाः वचनमिदं ब्रुवते यत् प्रकृति पुरुष विवेक दर्शनात् प्रकृतिः एव सृष्ट्यादि कार्य निवृत्ता जायते। सञ्जातायां प्रकृतौ एव स्वरूपेणावस्थानं मोक्षः। तन्न। प्रवृत्तिस्वभावायाः प्रकृतेः औदासीन्यायोगात्। पुरुषार्थ निबन्धना प्रवृत्तिः प्रकृतेः विद्यमानेति। विवेकख्यातिश्च पुरुषार्थ इति। सञ्जातायां तस्यां सा प्रकृतिः निवर्तते, कृत कार्यत्वात्। तदपिच नैव साधीयः। अचेतनायाः प्रकृतेः विमृश्य कारित्वाभावात्।

यथा सञ्जात शब्द विज्ञाने पुनस्तदर्थं प्रवर्तते। ततः विवेक ख्यातौ प्रकृति पुरुषयोः विवेक ज्ञाने सञ्जाते पुनस्तदर्थं प्रवर्तिष्यते। स्वभावस्याऽनपायित्वात्।

नित्य निरतिशय सुखाभिव्यक्ति मुक्तिः" इत्यपि केचित्। तदप्यसारमेव। सुखाभिव्यक्तौ मानाभावात्। आत्मनः विशुद्ध स्वभावात्। तस्मादहित निवृत्तिरात्यन्तिकी मुक्तिः स्वीकार्येति।

नच तस्याः सद्भावे किं प्रमाणमिति वाच्यम्। दुःख सन्तति धर्मिणी अत्यन्तमुच्छिद्यते सन्ततित्वात् दीप सन्ततिवत् अस्यैव प्रामाण्यात्। तदप्ययुक्तमेव। पार्थिव परमाणु रूपादि सन्तानेन व्यभिचारात्। अत एवाशरीरं वाव सन्तं प्रियाप्रिये न स्पृशतः" इति वेदान्तस्यैव प्रामाण्यात्। भूतार्थानामेषामप्रामाण्य प्रसङ्ग इत्यपि वक्तुमशक्यमेव। प्रत्यक्षेणानैकान्तिकत्वात्।

यद्यपि न भूतार्थ प्रतिपादक वचनस्यानुवादक-

।।न्याय भूषण।। भासर्वज्ञ।। (१)

(२) -४-२-४६, गौतम सूत्र।।

(३) ।।अनलभयामिति।।
गीता।।

त्वम्। अतः प्रमाणान्तर सापेक्षतया तस्याप्यप्रामाण्यमेव। प्रमायां साधकतमत्वाभावात्।

नैयायिकानां मते मिथ्याज्ञानेनैव रागद्वेषादयः जायन्ते। ताभ्यां रागद्वेषाभ्यां शुभाशुभप्रवृत्तिः समुत्पद्यते। यां शुभाशुभप्रवृत्तिमाकलय्य शरीरमाकलयति। जन्मना दुःखानि जायन्ते। मिथ्याज्ञानानां सदा प्रवर्तमानतयाऽयं संसारः संसरति। एवं सति तत्त्वज्ञानेन मिथ्याज्ञानं क्षीयते। तस्मादात्मस्वरूपविषयकतत्त्वज्ञानेनैव मोक्षः।(१)

जयन्तभट्टास्तु तत्त्वज्ञानस्यैव वैलक्षण्यं स्वीकुर्वते। आत्मतत्त्वसाक्षात्काराय ध्यानधारणादियोगानामवलम्बनं श्रेयः। अक्षपादस्तु प्राणायामस्य तत्साधनतया व्याख्यानमकार्षीत्। (२)

तेन तात्पर्यमिदमाकलितं यत् मुक्तिस्तु आत्मतत्त्वज्ञानेन संसाध्या। आत्मतत्त्वबोधाभावे नैव मुक्तिः कदापि संसाध्या। अतएवात्मतत्त्वसाक्षात्काराय ध्यानचिन्तनानि सदाऽपेक्षन्ते। एवमपि योगाभ्यासोऽपि तत्साक्षात्कारायाऽभ्यर्हितः।

॥"आत्मनः व्यापकत्वम्"॥

अयमात्मा तावत् व्यापकः। ननु तस्याणुपरिमाणत्वम्। तत्राणुपरिमाणत्वे युगपत् शिरःपादयोः वेदनानुपपत्तिः। अयौगपद्येऽपि अतिशैघ्र्याद्यौगपद्यावगतिरिति चेत् सत्यम्। स्यादेवं यद्यणुत्वं कुतश्चित्सिद्धं स्यात्, तदसिद्धौ दृष्टानुसारात् तस्यानणुत्वमेव युक्तम्।

शरीरपरिमाणत्वे सावयवत्वापत्तिः। अतः नित्यमणुत्वमेव विभुत्वं वेति। तदसौ ~~शरीरसंमि~~ शरीरसंमितः सन् सावयवः। तत्रावयवकल्पना तावतां अन्यूनाधिकानां तावदवयवानां प्रवृत्तिका इति देहयोरति सङ्कोचविस्तारकल्पनं नैव हृदयमनुरञ्जयति। तस्मादात्मनः विभुत्वं युक्तं विद्यते इति निश्चिनुमः।

तत्राचोक्तम् —— (३)

नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥

येच खलु - उपनिषत्स्वणुत्ववादाः पुराणेषु चाङ्गुष्ठमात्रं पुरुषम्॥ उत्पादयन्ते सूक्ष्मग्रहणगोचरत्वा-

((शास्त्रदीपिका//

भिप्रायाः।

यदि विभुत्वे सर्वशरीरेष्वेक एवात्माऽस्तु किं नानेति। तथा सति एकत्वे सति करणभेदेऽपि कर्तुरेकत्वात् चक्षुषा दृष्टमर्थं मनसा संस्मरति त्वचा प्रत्यभिजानाति। "यमहमदृशं तमहं स्पृशामि" वत् यज्ञदत्तशरीरस्थेनात्मना दृष्टमर्थं देवदत्तः प्रत्यभिजानीयात्। शरीरभेदेऽपि आत्मनः प्रत्यभिज्ञातुरेकत्वात्। तस्मात् सुखदुःखादिवैचित्र्येणात्मनः विभुत्वेऽपि नानात्वमेव। अन्यथैकत्वे सुखदुःखादिव्यवस्थोच्छेदापत्तेः।

कर्तुरेकत्वेऽपि मनोभेदात् ~~व्यव~~ व्यवस्थेति चेत् सत्यम्। करणत्वान्मनसः करणभेदस्य चक्षुरादेर्भेदव्यवस्थापकत्वायोगादिति। चक्षुरादीनामव्यवस्थापकत्वेऽपि मनः करणं व्यवस्थापकं ~~चेत्~~मिति चेन्न। करणत्वाविशेषात्। स्यादप्येषा कल्पना यद्येकात्मत्वे दृढं प्रमाणं स्यात्।

ये त्वात्मैकत्ववादाः श्रुतिषु पुराणेषु स्मृतिषु वा ते ~~निरञ्जनं~~ "निरञ्जनः परमं साम्यमुपैति" "मम साधर्म्यमागताः" "उत्तमः पुरुषस्त्वन्यः" इत्यादिभिरात्मभेदवचनैः प्र~~सद्वादिभिश्च~~त्यक्षादिभिश्च विरोधान्नैकान्ततः शक्नुवन्त्यात्मैकत्वं निश्चाययितुम्।

नहि वायुद्रव्यं सर्वत्रैकं व्यक्तिभेदस्य स्पष्टत्वात्। अविलक्षण~~स्व~~स्वभावस्य तु वायोर्वेणुरन्ध्रकृतं षड्जादिवैलक्षण्यं एवमात्मनोऽपि पशुमनुष्यादिवैलक्षण्यं देहसम्बन्धकृतं नैव स्वाभाविकम्। तस्मात् प्रतिशरीरं भिन्ना एवात्मानः सर्वगता नित्याः। एवं सति बद्धमुक्तादिव्यवस्थापि ~~सुकरा~~ ~~सुकरा~~ युक्ततरैवावभाति।(७) अतः चैतन्याधिकरणात्मा। स व्यापकः, शरीरभेदादित्यतो नानात्वं संगच्छत एव।

अशेषधर्मक्षयात् मुक्तस्य सुखाभावेऽपुरुषार्थस्यैव मोक्षत्वं जायेत। नहि धर्मजन्यो मुक्तस्यानन्दः। तथा सति उत्पत्तिमत्त्वात् विनाशी, तदा पुनरावृत्तिश्रुते विरोधः। संसारेणाभिभूतः स्वाभाविकस्त्वात्मानन्दः सन् निर्मुक्तसंसारस्याभिव्यक्तो भोग्यो भवति। स्वाभाविकत्वे चानन्द

॥श्रुतिः॥

"न्यायसार" का सर्वज्ञ" "ज्ञानप्रकरण"

~~आनन्द~~स्य "आनन्दं ब्रह्मेति" श्रुति सद्भावं प्रमाणम्।

नन्वत्र सुखाभावेऽपि श्रुतिरस्ति प्रमाणम्। तथा च- अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः॥

सत्यमेतत्। परन्तु विषय सुखाभिप्रायस्य त्वेवं जातीयकत्वात्। अन्यथानन्दश्रुति विरोधात्।

अत्र सुखाभाव वचनबलेनानन्दवचनमेव दुःखाभावाभिप्रायं किमिति न व्याख्यायते। सुखाभाव वचनानामल्पत्वेन तथा तेषामेवान्यथाकरणं तर्कयुक्तं न तु भूयसामानन्दवचनानाम्। किंचानन्दशब्दस्य दुःखाभावपरत्वेऽत्यन्तं स्वार्थहानिः समापद्येत। सामान्य वचनस्य सुखशब्दस्य विशेषेऽपि वैशद्येन वा व्याख्याने नैव स्वार्थहानिरिति तस्यैव तर्कयुक्तत्वम्।

ननु विद्यमानस्याप्यानन्दस्याऽननुभूयमानतयाऽकिंचित्करत्वं विद्यते। ~~न च~~ स्वप्रकाशोऽयमानन्द इति चेन्न। संसारावस्थायामप्रकाशात्।

आनन्दस्वभावः पुरुषः प्रकाशत एव आत्मनि प्रेमोत्पत्तिः। न ह्यसुखे प्रेमोत्पत्तिः सम्भवति। नाप्यविज्ञाते सुखेऽपि सम्भवति। किमधुनाऽस्माभिरात्मा सुखरूपतयाऽनुभूयते। सत्यमिति ब्रुवाण ~~[illegible]~~ स्यातिसाहसिकस्य मौनं वाच्यम्। (१)

यदि संसारिणो जीवाः संसारावस्थायां परानन्दमनुभवेयुस्तर्हि मुक्तस्य नैव कोऽपि विशेष इति तदेवापुरुषार्थत्वं मोक्षस्यापद्येत। तस्मात् बलादेवाऽसुखरूपस्यात्मनः ~~प्रेमविषयत्वमङ्गी~~ प्रेमविषयत्वमङ्गीकर्तव्यं दृष्टत्वात्।

अत्र संसारावस्थायामभिभूतः स्वप्रकाशोऽप्यानन्दः नैव प्रकाशते। कस्तावत् प्रकाशमानस्याभिभवो नाम, किं प्रकाशनिराकरणमभिभवः। नैवाप्रकाशनं प्रकाशमानस्य सम्भवति। यदि नाम संसारावस्थायां तस्यामवस्थायामापाततः नैव प्रकाशतेऽसतः प्रकाशस्य मुक्तावस्थायामुत्पद्यमानस्य कारणं वक्तव्यम्। प्रकाशाख्य फलस्य तस्य विज्ञानमेव कारणं तच्चेन्द्रियाधीनम्। न च मुक्तस्येन्द्रियाणां विरहतया कथमानन्दानुभवः स्यादिति वाच्यम्।

मुक्तस्य बाह्येन्द्रिय विरहत्वेऽपि तस्यामवस्थायामपि नित्यमनुवर्तनतया मनसः इत्यानन्द श्रुतिबलादेवाध्यवसायात्। नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते॥

इतिश्रुतेश्च। एवं विज्ञानघनश्रुतेश्च। तेन मुक्तावस्थायां मानस प्रत्यक्षेण परमानन्दमनुभवन्नात्माऽवतिष्ठते। तथोक्तम्—

॥निजं यच्चात्म चैतन्य मानन्दश्चेष्यते च यः॥
यच्च नित्य विभुत्वादि तैरात्मा नैव मुच्यते॥

अस्माद्धेतोः कर्मक्षयादेव हेत्वभावतया मुच्यते। नह्य-भावात्मकं मुक्त्वा मोक्ष नित्यत्वकारणम्॥ इति वार्त्तिकमपि तदेव संगच्छते। नहि मुक्तस्यानन्दानुभवः संभवति कारणाभावात्। मनः स्यादिति चेत्सत्यम्। परन्तु अमनस्कत्वश्रुतेः विरोधात् नैव युक्तियुक्तमिति।

तस्मात् सुखदुःखादि समस्त वैशेषिकात्मगुणोच्छेदो मोक्षः। सुखदुःखोच्छेदश्च धर्माधर्मयोरुच्छेदात्। धर्माधर्मयोरुच्छेदश्च तदुत्पन्नानां धर्माधर्माणामुपभोगेन नित्य नैमित्तिक कर्मानुष्ठानेनात्मज्ञानेन च विरोधात्। काम्यानुष्ठान निमित्तानां धर्माणां तदनुष्ठानेनानुत्पादात्। सञ्जाताकारण निषिद्धानुष्ठान निमित्तानां चाधर्माणां विहितानुष्ठानेन प्रतिषिद्धाकरणेन च तत्परिहारः। असति शरीरारम्भे पूर्व शरीरविनिपाते चाशरीरोऽवस्थितो मुक्तिः।

अतएव नित्योऽप्यानन्दः संसारव्यवहारदशायां तदभिभूतत्वात् एवमननुभूतोऽपि मुक्तावभिभवे विनिवृत्ते मनसानुभूयत इत्यपि निरस्तम्।

विज्ञातारमरे केन विजानीयात्॥ इति कण्ठेनैव श्रुत्या प्रतिषिद्धतया सुखविशिष्टात्मानुभवः नैव पुरुषार्थः। अलं वाअरे इदं विज्ञानाय॥ इतिश्रुतिवचसा विज्ञानशब्दस्य शक्तिपरत्वं व्याचक्षाणया शक्तिमात्रमवतिष्ठते नैव ज्ञानमिति प्रत्यक्षमेवोक्तम्। अतएव विज्ञानमभ्युपगन्तुं मुक्तस्य श्रुतिविरुद्धमेव। प्रियाप्रियास्पर्शश्रुतेश्च तत्त्वकथनं मुक्त्वा कस्यचिदन्यपरत्वं नैवास्याः श्रुतेः सम्भवति।

एवमानन्दश्रुतयोऽपि पुरुषार्थत्व सामान्यात् सुखत्वोपचारेण प्ररोचनार्थतया प्रवृत्ताः। ये चागमापायिनो धर्मा बुद्धि सुखदुःखेच्छा द्वेष प्रयत्न धर्माधर्म संस्कारास्तान् परित्यज्य यदस्य स्वीयं रूपं ज्ञान शक्ति सत्ता द्रव्यत्वादि तस्मिन्नवतिष्ठते। यदि नाम तावत् संसारदशायामविद्यमानोऽप्यानन्दो जन्यते मुक्तावस्थायामित्युच्यते तदा मोक्षेऽनित्यत्वं दुर्निवारमेव समभ्युपगन्तव्यमिति।

“শাস্ত্র দীপিকা” পার্থসারথি মিশ্র।

अन्यच “विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीति ब्राह्मण वाक्यं चेतसा मत्वा मा भगवन् मोहान्तं प्रापितवान्पूर्वमजानत्तत्त्वमभिधाय साम्प्रतं विनाशीत्यभिधानात्” इति पूर्वपक्षं व्याख्याय सिद्धान्तं व्याचक्षते। यदविनाशी वा अरेऽयमात्मेत्यादि व्युच्चार्य कथं तर्हि विनाशवचनमाशङ्क्य मात्रासंसर्गस्त्वस्य भवतीत्युक्तम्। भूतेन्द्रियाणि धर्माधर्मौ च विकाश शब्दवाच्या उच्यन्ते। तेन विज्ञानघन शब्देन ज्ञानशक्ति स्वभावस्यात्मनोऽभिधानम्। एतेभ्यो भूतेभ्यः सह समुत्थाय मुक्तो भूत्वा तान्येवानु विनश्यति। भूतविनाशात् सोऽपि विनष्ट इव भवतीति।

भूते विद्यमानतयाऽसौ। स्वयं प्रत्यक्षेण दृश्यते परैश्च शरीरचेष्टा लिङ्गकानुमानेन। प्रमाण पद्धातिवर्तनाद् विनष्ट इव भवतीत्यतो विनश्यतीत्युच्यते। एवं तदनेन प्रकारेण विनाशः खलु मात्राणां भवति नात्मनः तेन नात्र कोऽपि विरोधावसरः समुपसर्पति। तदुक्तञ्च श्रुतिः —

अविनाशी स्वरूपेण पुरुषो यातु नाशिता।
मात्राणां साधिकाराणां भूतादिनामसंज्ञिता॥

न प्रेत्यसंज्ञास्तीति वाक्येन भूतादीनामसंज्ञित्वं नैवोच्यते। किन्तु आत्मन एव मुक्तस्य संज्ञाभावोऽनेनोच्यते। अतएव विज्ञातारं केन विजानीयात् इत्यादिना न्यायेन नैव भूतचैतन्यं सम्भवति। तस्मात् भूतेन्द्रियाणामसंज्ञित्वमचैतन्यं सिद्ध्यति।

सर्वत्रा ज्ञानेषु तावद् वेत्ता वभासते। अन्यथा स्वपरवेद्ययोरेति प्रसङ्गः। शरीरस्य करचरणाद्यवयव सन्निवेश विशिष्टस्य तथावभासः कथमपि संभवति। अतएवान्यः शरीरादात्मेति सिद्ध्यति।

संनिवेशाप्रतिभासेऽपि शरीरप्रतिभास संभवात्। नैव तावत् संनिवेशः शरीरम्। किन्तु शरीरधर्मो हि संनिवेशः। संभवति च धर्माप्रतिभासेऽपि धर्मिणः प्रतिभासः कदापि। अन्यथात्मनः प्रतिभासो न स्यात्। तद्धर्मस्य सर्वगतत्वादीनामर्न्य वित्तिस्व प्रतिभानात्। तस्मादर्थ एव हि भासते नैव वेत्ता। तस्मात् ज्ञातृप्रतिभासेन नैव शरीरविवेक सिद्धिः। तेन ज्ञानसुखादीनां शरीरगुणत्वासंभवात् ततोऽन्यः ~~एतेषामाश्रयो~~ तेषामाश्रयः स एवात्मा। नित्यः व्यापकश्चेति समुपपद्यत इति निश्चयं वेविद्मः।(१)

“समाप्तः षष्ठपरिच्छेदः”

॥ तैत्तीय संहिता ॥ - ७-५-७१,,
॥ ताण्ड्य ब्राह्मण ॥ ६-५-९-२३-४-२,
कौषीतकि ब्राह्मण ॥ - २-९,

छान्दोग्योप० - ५-११-१,

(४) ~~मीमांसायां~~ मीमांसापादुकायां वेदान्तदेशिकैः :—

"सएष यज्ञायुधी यजमानोऽन्जसा स्वर्गं लोकं याति" इत्यात्मक शब्देन यज्ञायुध संयुक्तं प्रत्यक्षं शरीरं तावदुपदिशति। अर्थवादत्वादस्य नैव प्रमाणान्तरविरोधः। यदि नाम तावदत्र न नैव शरीरस्य स्वर्गगमनमुच्यते किन्तर्हि आत्मविशिष्ट शरीरस्य। किन्तु शरीर शरीरिणोर्भेदोपचारेण शरीरस्थेन यज्ञायुधित्वेन प्रत्यक्षतया सोऽपि व्यपदिश्यते। आत्मनो वा स्वर्गगमनं शरीरे उपचर्यते इति नास्ति विरोधः। इति मीमांसकाः व्याचक्षते।

मीमांसा शब्दः "पूजार्थक मान धातुना जिज्ञासायां तावदर्थे सदा निष्पद्यते। मीमांसा शब्दोत्पत्तिः सुदूर प्राचीन काले सञ्जाता। संहिता ब्राह्मणोपनिषद ग्रन्थेषु मीमांसा शब्दः सदा समुपलभ्यते। तद् यथाहि — "उत्सृज्यां नोत्सृज्यामिति मीमांसन्ते ब्रह्मवादिनः। (१) अन्यच्च ब्राह्मणा पात्रे न मीमांसेत, यस्तल्पे वा उदके वा विवाहे वा मीमांसेरन् न स्ता उपेयुः।

उदिते होतव्य मनुदिते होतव्य मिति मीमांसन्ते। (२) सन्देहेऽस्मिन् मीमांसा दर्शने विचार्यमाणा विषयक प्रश्न मवलम्ब्य तेनेव विषयं विवेचितवान्। तस्मादुदिते होतव्यमनुदिते होतव्यम्।

औपमन्यवः महाशालियाः समेत्य मीमासाञ्चक्रुः को नु आत्मा किं ब्रह्मेति। (३) तैत्तीयोपनिषद् महाप्रबन्धे मीमांसा शब्दः दृश्यते। श्रुतिकाले श्रौत विषयक कर्मणि समुपलभ्यमान विरोधं परिहर्तुं मीमांसा सिद्धान्त वाक्य जालानि सदाऽन्विनेष।

प्राचीन काले न्याय शब्देन मीमांसा व्यवहृतः। न्यायकणिका न्याय माला प्रभृति मीमांसा ग्रन्थेषु न्याय शब्दं प्रायुङ्क्त।

तथाचोक्तम् —

न्यायार्थं धर्मविद्यास्विति पदमुदितं तत्र तत्राप्त शास्त्रे-
तेनैवार्थं तदन्यद भवतिकृतकां नीतिमात्र प्रवृत्तेः।
इत्येतन्नानुयोज्यं नय पथ विषयो मान तर्कादि मात्रम्-
मीमांसायां तु तत्तच्छ्रुति गति विषया नीति भेदा निरूप्याः। ४

वैदिक कर्मकाण्ड विषयक श्रुतौ पारस्परिक विरोधं परिहर्तुं मीमांसा शास्त्रं प्रयतते।

कर्मकाण्ड ज्ञान काण्ड भेदेन मीमांसायाः द्वौ भेदौ विद्येते। तत्र कर्मकाण्ड शब्देन मीमासायाः [illegible]: [illegible] [illegible]। [illegible] व्यवहाराः लोचन गोचरतां प्रयाति। एवं ज्ञानकाण्डेन वेदान्तस्य। तस्मात् पूर्वमीमांसा कर्मकाण्डाय प्रयुङ्क्ते। तथोक्तञ्च —

“শ্লোক বার্তিক” কুমারিল ভট্ট।

प्रायेणैव हि मीमांसा लोके लोकायती कृता ।
तमास्तिकपथे कर्तुमयं यत्नः कृतो मया ॥ (१)

तत्र भाट्टानां मते चैतन्याश्रयः खल्वात्मा । स च मानसप्रत्यक्षगम्यः । कस्मान्न पुनरयं स्वात्मनि क्रियाविरोधो नाम । यस्यां क्रियायां यः कर्ता न सा तस्मिन्नेव स्वफलं जनयति । किं पुनः संवित्तिक्रियायाः फलं, भासनं, किमिदं कर्तरि न भवति । यदि स्वीकुरुते चेत्तदा कर्तैव तर्ह्यसौ भासते । तस्मादेवं वित्तिस्वरूपात्मनो भासनाभ्युपगमेऽपि स्वात्मनि क्रियाविरोधः ।

यदि प्रामाण्यविरोधं समुद्भाव्य सत्यप्यात्मनः क्रियाजन्यफलभागित्वे कर्मसंज्ञा नैव जायते । परसमवायिक्रियाफलभागित्वं कर्मत्वमित्यभिधानात् । प्रयोगतो खल्ववगन्तव्यं शब्दसाधुत्वम् । क्रियायां कर्मव्यवहारो लोके वेदे च तदेव प्रसिद्धिमावहति । अतएव श्रुतिस्मृतिपुराणेषु तावदात्मानमुपासीत, आत्मानं वेद, आत्मा खलु ज्ञातव्यः" इत्यादयो व्यवहाराः दृश्यन्ते । तस्मान्मानसाहंप्रत्ययगम्य आत्मा । तथा श्रुतिवाक्यम् —— "स मानसीन आत्मा जनानाम्"

शरीरवत् आत्मन्यपि तथाऽहमभिमानो भ्रान्तिरेव । बाधकाभावात् । ~~योगिनामाभास~~ योगिनामस्ति चेत् न । प्रमाणाभावात् ।

तथाह च — येऽपि योगस्य परां काष्ठामुपागताः ।
योगेश्वरेश्वरास्तेऽपि कुर्वन्त्यात्मन्यहं मतिम् ।
~~अहं कृत्स्न~~ अहं कृत्स्नस्य जगतः प्रलयः प्रभवस्तथा ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः,
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥
मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।

तथाचोपनिषत्वाक्यम् —

ब्रह्म वा इदमग्र आसीत्" तदात्मानमेवावेद अहं ब्रह्मास्मि । तस्मादहंप्रत्ययगम्यत्वमात्मनोऽनिच्छन्तः श्रुतिविरोधादेवोपेक्षणीयाः ।

अयमात्मा न कस्यचिदपि पुत्रादिरूपेण सम्बन्धी, किन्तु जन्यजनकभावस्य शरीरविषयत्वात् । शरीरमिदं तावत् शरीराज्जायते । न त्वात्मात्मनात् । तस्मादन्यसम्बन्धितयाऽऽत्मन्यहं मतिः कृशादिमतिवच्छरीराद विवेकमकुर्वमाणानां भ्रान्तिरेव । तस्मादहंप्रत्ययगम्यो ज्ञाता शरीरातिरिक्त इन्द्रियव्यतिरिक्तश्चेति ।

(९) मानमेयोदयः।।

("चित्सुखी" — ९-३,

अत्र प्राभाकरास्तु इत्थं व्याचक्षते यत्- तावदिदमहं जानामीत्याकारक व्यवहारः नैव जायेत। आत्मज्ञानयोः प्रकाशं प्रतिज्ञाने नैव स्वीकुर्यात्। अतः समस्तेषु ज्ञानेषु स्वात्मनः कर्तृत्वेन तथा च ज्ञानत्वेन ज्ञानस्य भानं सम्भवति। तस्मादहं प्रत्ययगम्यत्वेनात्मनः प्रत्यक्षत्वं ज्ञानस्य स्वयं प्रकाशत्वेनेति च प्रत्यक्षव्यवस्था प्रतिपादिता। तत्र प्राभाकराणां सिद्धान्तः नैव तर्कसम्मतः। ज्ञानस्य स्वयं प्रकाशत्व प्रतिषेधात्। आत्मा तु नाहं प्रत्ययगम्यः, सर्वत्र ज्ञानेषु अहं जानामीति व्यवहारादर्शनात्।

यत् पुनः शालिकनाथेन भणितं ज्ञातृस्वभासो ज्ञेयावभासेषु अनुवर्तत इत्यास्थेयम्। अन्यथा स्वपरवेद्यस्याऽनतिशयात्। तन्न। ज्ञानस्य स्वात्मसमवेतत्त्वमात्रेणैवाऽसिद्धेः। न च स्वात्मसमवेतस्यापि व्यवहाराङ्गत्वमस्तीति वाच्यम्। ऐन्द्रियकज्ञानेषु इन्द्रियज्ञानस्य व्यवहाराङ्गत्वप्रसंगात्। तथा च—

अक्षसम्बन्धहीनात्म स्वात्मप्रत्यक्षतावादिनः।
प्रत्यक्षशब्दव्युत्पत्तिः कथङ्कारं न वेद्गोः।(१)

तस्मात् यथा दिगादीनां पूर्वापरप्रतीत्याऽनुमेयत्वं भवद्भिरवगम्यते तद्वत् आत्मनोऽप्यहंप्रत्ययानुमेयत्वमेव साधीयः। अक्षसन्निकर्षहीनस्याऽप्रत्यक्षत्वात्।

अपि चात्मनः स्वप्रकाशज्ञानाश्रयत्वे स्वप्रकाशत्वाऽस्वीकारे घटप्रकाशवत् ज्ञानजन्यतत्प्रकाशस्य कारणान्तरसापेक्षत्वमापद्येत।

यच्चात्मनः स्वप्रकाशत्वाभ्युपगमे दृष्टान्तविरोधः। प्रकाशरूपदहनाश्रयेषु काष्ठादिषु दह्यमानांशानां रूपतया प्रकाशस्वरूपदहनदाहकत्वं जायते। तादृशांशस्य ~~क~~ घटादिवत् परितः विस्तृतप्रकाशेन प्रकाश्यत्वमेवातः न कस्यापि प्रकाशाश्रयत्वे कस्यापि वस्तुनः प्रकाश इत्यवगन्तव्यम्।

शाङ्करास्तु ज्ञानज्ञात्रोरेकत्वं स्वीकुर्वन्तः तावदात्मनः स्वप्रकाशत्वं स्वीकुर्वते। अयं पुरुषः स्वयंज्योतिः" "आत्मैवास्य ज्योतिर्भवति" इति वेदान्तवाक्यमेवात्मनः स्वयंप्रकाशत्वे प्रमाणमुपदर्शयन्ति। तथोक्तञ्च —

चिद्रूपत्वादकर्मत्वात् स्वयंज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः।(२)

(ब) ''मानमेयोदय'' प्रमेय प्रकरणम्''

॥"समान सीन आत्मा जनानाम्॥ इत्यादि मानस ज्ञान विषयत्व प्रतिपादक श्रुतिवाक्य विरोधप्र भयात् समुदाहृत वेदान्त वाक्यस्यात्मनः स्वप्रकाशकत्वे नैव कदापि तात्पर्यमित्यवगन्तुं शक्नुमः। स्वजन्य ज्ञानान्तराधीन प्रकाशः, व्यवहार्यत्वात्, घटवदित्यनुमान विरोधाच्चेत्यवगन्तव्यम्।

नचात्मनः व्यवहार्यत्वमसिद्धमिति वाच्यम्, आत्मा व्यवहार्यो न भवतीत्यस्यैव व्यवहारस्यात्म गोचरत्वेन स्ववचन विरोधात्।

नन्वात्मनः मानस प्रत्यक्ष गम्यत्वे एकस्यैवात्मनः कर्तृत्वं कर्मत्वं विरुद्धमेवेति सर्वत्र कर्तृकत्व कर्मत्वयो र्विरुद्धत्वात्। नैवमिति। यथा भवन्मते आत्मा स्वयं ज्योतिषा आत्मानं प्रकाशयति इत्याद्यात्मवलम्ब्यात्मनि कर्तृत्व कर्मत्व कारणत्वादयो विरुद्ध धर्माः यथा प्रतिभान्ति तथाऽस्मन्मते कर्तृत्व कर्मत्वयोरप्येकस्यैवोपपत्तेः। एवं लौकिक वैदिक प्रयोग साक्ष्यतयाऽऽत्मनः कर्तृत्व कर्मत्वयो प्रतीतेः सर्वजनसिद्धत्वात्।

आत्मानं जानीहीति लौकिकाः प्रयुञ्जते। आत्मा द्रष्टव्य इत्यपि श्रूयते। देवदत्त गमन क्रिया जनित प्राप्ति रूप फलाश्रयत्व रूपकर्मत्वं ग्रामे यथा स्वीकुरुते तथा स्वयं प्रकाशवादी तावत् ज्ञानजन्य फलभागित्व लक्षणं कर्मत्वं पुनरात्मनः स्वीकुरुते। अन्यथाऽऽत्मन एवा प्रकाशमानत्व प्रसङ्गात्। तस्मात् मानस प्रत्यक्ष एवात्मा तावत् सर्वैः स्वीकार्यः। तथाचोक्तम् —

(७) सच देहेन्द्रिय ज्ञान सुखेभ्यो व्यतिरिच्यते।
नाना रतो विभुर्नित्यो भोगस्वर्गापवर्गभाक्।

अत्र केचित् —

स्थूलोहं कृशोहं तावदित्यादि प्रत्ययस्य शरीरगत स्थौल्य कार्श्यादि विषयत्वात् स्थौल्य कार्श्याधिकरणं शरीरमेवात्मा सदोद्गिरन्ते। तदपि निःसारमेव। आत्मविशेषगुणानां सुखदुःखादीनां शरीरगुणत्वानुपपत्तेः।

यदि सुखदुःखादयः शरीर विशेषगुणाः विद्यन्ते तदा ते गुणाः यावच्छरीरमवतिष्ठेयुः। किन्तु नहि ते गुणाः मृत शरीरेषु सदोपलभ्यन्ते। तस्मात् सुखदुःखादीनामन्योन्याश्रयत्वमेव स्वीकार्यम्। तेन सुखदुःखा-

भयतया देहात् भिन्नः कोऽपि सिद्ध्यत्यात्मा। स्थूलोऽहं कृशोऽहमिति प्रतीतिस्तु शरीरात्मनोरत्यन्तं संसृष्टतया तयोरध्यय प्रत्ययवत् प्रतीतिः सार्वजनीना। मम शरीरमिति शरीरात्मनोः भेद ~~[illegible]~~वत् व्यपदेशः लोचनगोचरायते।

एवमपि बाह्येन्द्रियाणां भौतिकत्वेन नैचेन्द्रियाणामात्मत्वं स्वीकर्तुं शक्नुमः। भूतेषु चैतन्यादीनामात्मगुणानामुपलम्भाभावात्। कार्यगुणस्य कारणपूर्वकत्वनियमात्। अचेतनात्मक भूतकार्य ~~भूत~~ बाह्येन्द्रिये ~~कथ~~ कथमपि नैवात्मत्वं सिद्ध्येत्।

अपरोक्षरूपतयाऽऽत्मनि विद्यमानसुखदुःखाद्यपरोक्षसाधनेन्द्रियतया साध्यरूपस्यान्तःकरणस्य नैसर्गिकभेदावगमः पुनरात्मा स साध्य एव।

एवं विज्ञानस्य क्षणिकत्वेन नहि ज्ञानस्वरूपात्मेति वक्तुं शक्नुवन्ति। योऽहं प्राक् दुःखमन्वभूवं सएवाधुना सुखमनुभवामि" इत्यादौ पूर्वापरकालयोरेकत्वावगमतयाऽऽत्मनः नितरामक्षणिकत्वसिद्धेः। यस्य मे पूर्वं सुखमासीत् तस्याधुना दुःखमनुवर्तते। पूर्वापरकालयोरात्मन एकत्वावगमेऽपि सुखनिवृत्त्यनुसन्धानतया सुखरूपत्वमात्मनः स्वीकर्तुं न शक्यमेव।

विज्ञानमानन्दं ब्रह्म" इत्याद्युपनिषद्वेदान्तवाक्यजातात् आत्मनः विज्ञानानन्दरूपत्वमाकलयन्ति वेदान्तिनः। नच विज्ञानस्य क्षणिकत्वेनात्मनः नित्यत्वेन कथं विज्ञानात्मकत्वं तस्येति वाच्यम्। विज्ञानस्य नित्यत्वाभ्युपगमात्। नीलपीतादि विषयभेदात् विज्ञाने भेदमाकलयन्ति ये तेऽपि नितरामौपाधिकभेदमाचक्षते। स्वरूपतः ज्ञानमेकमेव नित्यञ्च।

नच विज्ञानमानन्दं ब्रह्म" इत्यत्र त्रयाणां पदानां एकार्थप्रतिपादनपरत्वात् एकेनैव पदेन चरितार्थत्वात् तदितरपदस्य वैयर्थ्यं स्यादिति वाच्यम्। व्यवच्छेद्यभेदात् एकार्थत्वेऽपि वैयर्थ्यानुपपत्तेः। प्रकृष्टप्रकाशचन्द्र इतिवत्। विज्ञानपदेनाचेतनत्वस्यानन्दपदेन दुःखस्य च व्यावृत्तेः। अन्यथाऽऽत्मनि जडत्वप्रसक्तेः।

प्रकृष्टप्रकाशश्चन्द्र" इत्यत्र प्रकृष्टपदेन खद्योतादि निकृष्टप्रकाशः व्योत्यते। एवं प्रकाशपदेन प्रकृष्टध्वान्तव्यावृत्तिर्विवक्ष्यते। तस्मात् प्रकृष्टप्रकाशपदेनैक एवाखण्डचन्द्रः व्यज्यते। यतोहि अस्मिन् चन्द्रमण्डले कतमश्चन्द्रः?

॥ मानमेयोदय ॥

॥ श्लोक वार्तिक ॥ कुमारिल भट्ट ॥

अत्र प्रश्न वाक्ये कियन्ति पदानि विद्यन्ते तथापि समस्त पदस्य प्रश्नस्यैक चन्द्ररूप प्रातिपदिकार्थ एव तात्पर्यतया प्रकृष्टः प्रकाशश्चन्द्र एवमुक्त वाक्यस्य तात्पर्यमपि तादृश चन्द्ररूप प्रातिपदिकार्थ एव स्वीकार्यम्। अन्यथा प्रश्नोत्तरयोः वैयधिकरण्यमापद्येत।

अतएव पञ्चपादिकाचार्य इत्यवोचत् यत् व्यक्ति विशेषः कश्चित् चन्द्र प्रातिपदिकाभिधेय इति कोऽपि नितामप्राक्षीत —

यदस्मिन् ज्योतिर्मण्डले कश्चन्द्रो नाम इति। तस्य प्रतिवचनम् — प्रकृष्ट प्रकाशश्चन्द्र इति। तदेवं प्रतिवचनं जायते यदि नाम चन्द्र पदेनोक्तमिति। (क)

पद

अपिच "प्रकृष्ट प्रकाशश्चन्द्र" इत्यत्र प्रकृष्ट प्रकाशयोः परस्परं चन्द्र पदेनाभिन्नार्थत्वमङ्गीकरणीयम्। अन्यथा चन्द्रप्रातिपदिकार्थस्य पृष्ठत्वात्। तस्मात् विज्ञानानन्द पदयोः परस्परं ब्रह्म पदेनाभिन्नार्थत्वस्यावश्यकत्वात्।

अतएवाखण्डमेव वाक्यार्थं स्वीकुर्महे। तथाच विज्ञानादिपदमखण्डनिष्ठम् लक्षण वाक्यार्थत्वात् प्रकृष्टप्रकाशश्चन्द्र इतिवत्। अतः विज्ञानानन्दपदयोरेकार्थत्वमपर्यायत्वमवैयर्थ्यं सिद्ध्यति। अतएव चित्सुखाचार्य इत्यब्रवीत् यत् व्यावृत्त्यापदानां स्वरूपमात्र पर्यवसायित्वाङ्गीकारात्। व्यावर्त्यभेदेनावैयर्थ्याच्च।

"सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादौ सत्यज्ञानानन्त-शब्दा अनृत जड दुःखान्तवत्त्वानामात्मत्व भ्रान्ति निवृत्तिपरा लक्ष्ये ब्रह्मणि पर्यवस्यन्ति। तथाचोक्तम् —

वाक्यार्थं हि गुरुः कार्यमखण्डं शङ्करोऽब्रवीत्।
संसर्गापि पर्यायं विशिष्टं ब्रूमहे वयम्॥(क)

एतावता वचनेन स्पष्टमवगच्छामः खलु गुरुवस्तु वाक्यार्थस्य कार्यरूपत्वम्। शङ्करस्तु अखण्डस्य वाक्यार्थत्वम्। भाट्टानुयायिनस्तु संसर्गापि पर्याय विशिष्टार्थस्य वाक्यार्थत्वं प्रतिपादयन्ति।

अनेन भाट्टानां तात्पर्यमिदमेव प्रतिभाति यत् नाखण्डं वाक्यार्थः। कथं तु वाक्य घटक समेषां पदानामभिन्ने वाऽखण्ड-वाक्यार्थे तात्पर्यं स्वीकुर्वते चेत् तदैकेन पदेन तात्पर्यस्य प्रतिपादनतया तदितरपदोच्चारणे वैयर्थ्यस्य दुष्परिहरत्वात्।

यदि नाम तावदुच्यते तथासति सर्वपद व्यावर्त्यार्थस्य निखिलत्वेन नास्ति वैयर्थ्यापत्तिः। परन्तु एकार्थत्वे पर्याययो

रिव व्यवच्छेद्य भेदानुपपत्ते:। नहि हस्त: कर इत्यादिषु कोपि व्यवच्छेद्य भेद: सार्वजनीन:।

"प्रकृष्टप्रकाशश्चन्द्र" इति वाक्यस्य संज्ञासंज्ञिसम्बन्ध प्रतिपादन मात्र परत्वात्। प्रश्नस्यापि ~~कस्यापि~~ कस्याम चन्द्र संज्ञेति संज्ञासंज्ञि सम्बन्ध विषयत्वात्। दृश्यमान चन्द्र स्वरूप प्रातिपदिकार्थ विषये प्रश्नोप्यनुपपन्न एव। तस्मात् संज्ञा संज्ञि सम्बन्धाज्ञात वस्तु विषय एव प्रश्नावकाश:। प्रकर्ष विशिष्ट चन्द्रोपलक्षितश्चन्द्र पदार्थ एवोत्तरे सुस्थिरो भवति। तेन "विज्ञानमानन्दं ब्रह्म" इत्यादिवाक्यस्य विज्ञानादि विशिष्टात्म स्वरूप विषयकत्वमेव न त्वखण्डार्थ विषयकत्वम्।

विज्ञानमानन्दं ब्रह्मेति पदस्य सामानाधिकरण्यं मयूरो मुड इति वत् भेदसहिष्णो भेदादित्यवगन्तव्यम्। किञ्च स एको ब्रह्मण आनन्द:" एवमानन्दं ब्रह्मणो विद्वान् इत्यादिश्रुतयोऽपि आनन्दात्मनो: परस्पर भेद माकलयन्ति। अस्मादेव कारणात् विज्ञानानन्दात्मन: परस्परं भिन्ना:।

"अवेदयन्नेवा हमियन्तं काल मस्वाप्सम्" इत्यनुस्मृति सुषुप्तौ हम् विज्ञानाभावानुसन्धानादेव विज्ञानस्यानित्यत्वं ज्ञापयति। "सुषमस्वाप्सम्" इति सुखानुभवानुसन्धानस्य निखिल दु:ख निवृत्ति मात्र गमकत्वमेवाऽऽभाति। अन्यथा कामिनी सम्भोगादि रूप स्वल्प सुख विलोपेन प्रबुद्धस्य दु:खोत्पत्त्यभाव प्रसङ्गात्। कथंतु ब्रह्म स्वरूप निरतिशयानन्द सम्पादन तत्पराणां क्षुद्रतम सुख परिक्षयात् दु:खोद्भव: नैव सम्भवेत्। यदि चानुभूत सुख विस्मृत मुच्यते तदा सुखमहमस्वाप्समिति सुखानुभवानुसन्धानात् विज्ञानस्य नित्यत्वे काप्युक्ति: प्राप्येत। अत: देहेन्द्रिय विज्ञान सुखादिव्यतिरिक्तत्वं सिद्धमेवात्मन:। एवं सकल शरीरेषु एक एवात्मा इत्यपि वेदान्त विदां नैव शोभते। तथात्वे चेत् सुखानि दु:खानि वै कस्मिन् सर्वेषां सुखदु:खानुसन्धान प्रसंगात्।

नचैकस्य सुखदु:खानुसन्धानतया सर्वेषां तदनुसन्धानमिति वाच्यम्। देवदत्त पाद संलग्नकण्टकमुद्धर्तुं तत्करव्यापारवत् अन्येषामपि युगपदेव करव्यापार प्रसंगात्। नचेन्द्रिय भेदात् तदनुसन्धान वैधुर्यमिति वाच्यम्। तथासति इन्द्रिय भेदे योऽहमश्रौषम्, स एव पश्यामि" इत्याद्यनुसन्धान

प्रमाणमिति चेन्न वाच्यम्।

(५) तत्त्वार्थसूत्रम्॥ जैनदर्शनं॥

दर्शनात्। नच जीवभेदात् अनुसन्धानाभाव इतिवाच्यम्। आत्मव्यतिरिक्त जीव सद्भावे प्रमाणाभावात्। नच तयोरन्य: ~~[illegible]~~ पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो ऽभिचकाशीति" इत्यादि मुण्डकोपनिषद् इति श्रुतिरात्म द्वय सद्भावे विकल्पासहत्वात्।

किंच श्रुति:जीव परयो र्भेदं प्रतिपादयति नवेति सत्यम्। परन्तु तत्राद्ये तावदद्वैत भङ्ग प्रसङ्गात्। नैव द्वितीय: आत्म द्वय सद्भावे प्रमाणाभाव प्रसङ्गात्।

नच कल्पना निर्मित एव भेद: स्वीक्रियतामिति वाच्यम्। कल्पना निर्मित भेदस्य प्रामाणिक व्यवस्था हेतुत्वानुपपत्ते:। अन्यथा काल्पनिक पदार्थस्य प्रामाणिक कार्य सम्पादनत्वे कल्पनानिर्मित रजत भावेन शुक्ति शकलेनापि कटक मुकुटादि निर्माण प्रसङ्गात्। तस्मात् एको देव: सर्वभूतेषु गूढ" एक एव च भूतात्मा भूते भूते व्यवस्थित:" इत्यादि तावदद्वैत प्रतिपादक ~~श्रौतस्मा~~ श्रौतस्मार्त वाक्यानां प्रमाणान्तर विरुद्धत्वात्। एव यथाश्रुतेर्थे नैव तत्र प्रामाण्यं स्वीकर्तुं शक्यमिति।

सहस्र सम्वत्सरे सम्पद्यमान सत्र सम्पादकानुष्ठानवत् नैव प्रामाण्यमभ्युपेयम्। अतएवाचार्यस्तु सहस्रसम्वत्सरपदस्य सहस्रदिवस पाकत्वेन व्याख्यानं कृतवान्। तस्मात् प्रतिक्षेत्रं भिन्न इत्यात्मा सिद्धमिति।

अथ युगपदेव चरणशिरसो: कण्टक व्याप्तस्य समकालमेव वेदना द्वयानुसन्धान दर्शनात् तावदात्मन: विभुत्वं स्पष्टमेव। न त्वणुत्वं सिध्यति। अणुत्वे सति तावदनुपपन्नमेव। आत्मन: मध्यम परिमाणत्वे शरीर तुल्य परिमाणत्वमेवाङ्गी कर्तव्यम्। शरीराधिक परिमाणत्वे आत्मन: शरीरान्त: प्रवेशाभाव प्रसङ्गात्। शरीरात् न्यून परिमाणत्वे शिरपादवेदनयो र्युगत् अनुसन्धानाभाव प्रसङ्गस्य तादवस्थ्यात्।

नन्वत्रात्मन: शरीरपरिमाणत्वमेव किल स्वीक्रियत इति चेन्न। गजादिगतस्यात्मन: पिपीलिका देहानुप्रवेशाभाव प्रसङ्गात्। तदस्वीकारे बहुविध श्रुतिस्मृति विरोधात्। धर्मशास्त्र व्यवस्थानुसारं कस्यापि शरीरस्यात्मा लघुदीर्घ शरीर प्रवेष्टुं शक्नोतीत्यत: जैन दार्शनिका: आत्मन: मध्यम परिमाणत्वं स्वीकुर्वन्त: प्रदीपवत् सङ्कोचविकास शीलत्वमेव स्वीचक्रिरे। अतएवोक्तं तत्त्वार्थसूत्रे प्रदेश संहार विसर्गाभ्यां प्रदीपवत्" (७)

।।शा० दी०।।

(२) शं०उ०,

।।न्याय वार्तिक।।

पार्थसारथिमिश्रास्तु मध्यमाचक्षिरे यत् पुत्तिकाहस्तिदेहयोरतिसङ्कोचविस्तारकल्पनं नैव हृदयमनुरञ्जयति। चिदानन्दपण्डितस्तु सामान्यतया मध्यमपरिमाणत्वे च कार्यत्वेनानित्यत्वं प्रसङ्गात्। अतएवात्मनि विभुत्वं संसिद्धम्। तेनेदं पूर्णं पुरुषेण सर्वम्। (व) अविनाशी वा अरे आत्मा अनुच्छित्तिधर्मा॥ इत्यादिश्रुतिवाक्येन निरवयवद्रव्यत्वविभुत्वाभ्यां तावदात्मनि नित्यत्वं सिद्धम्।

अत्र केचिदित्थं प्रलपन्ति यत्- लौकिकसुखदुःखेषु स्वर्गनरकादिव्यपदेशं कुर्वन्ति। एवं शरीरपात एव मोक्षं कथयन्ति। इति स्थूलधियो पामराः। परन्तु देहव्यतिरिक्तात्मसद्भावप्रतिपादनेन तन्निरस्तमेव वेदितव्यम्।

सौगतास्तु नीलपीतादिविषयोपाधिविलये सति निरुपधानस्य बोधसन्तानस्य स्वरूपेणावस्थानं मोक्षमाचक्षते। तन्न समीचीनम्। निर्विषयस्य विज्ञानसन्तानस्य स्वयमवस्थानानुपपत्तेः। एवं प्रतिक्षणं भिन्नेषुपजायमानेषु विनश्यत्सु विज्ञानसन्तानेषु कस्यापि विज्ञानक्षणस्य मोक्षफलानुभवानुपपत्तेः। अनुभूतवस्तूनि पुरुषेच्छाविरहात् मुक्तेरपुरुषार्थत्वप्रसङ्गात्।

तार्किकास्तु एकविंशतिप्रभेददुःखोच्छेदो मोक्षः। तद्यथाहि देहः षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखं चेत्येकविंशतिप्रभेदं च दुःखमाचक्षते।
(३) तत् सुखस्यापि विनाशेन मुक्तेरपुरुषार्थत्वप्रसङ्गात्।

नचात्र मोक्षे पुरुषार्थत्वमुपपादयितुं नहि सुखस्वरूपस्यावश्यकत्वम्। सुषुप्तेरिव मुक्तेरपि दुःखाभावमात्रेण समीहितत्वमिति वाच्यम्। दुःखाभावसमीहितस्याल्पविषयत्वात्। अन्यथा सुषुप्तेरुत्थितस्यानुसन्धीयमाने दुःखानुभावे कामिनीसम्भोगजनितसुखलवलोपनिमित्तदुःखानुषङ्गाभावप्रसङ्गात्। तस्मात् ~~सु~~ स्वर्गसुखमुन्मुच्य मोक्षाकांक्षा दुःखाभावस्वरूपात् नैव जायते। अतएव मोक्षे सुखस्वरूपत्वस्य परमावश्यकत्वात्।

ज्ञानादिसकलविशेषगुणविलये सत्यात्मनः स्वरूपावस्थानं मोक्ष इति प्राभाकराः। शालिकनाथमिश्रास्तु - आत्यन्तिकदेहोच्छेदो निःशेषधर्माधर्मप

प्र० पं०-पृ० - ३-४१

“तत्वार्थ सूत्रम्”

“सांख्यसूत्रम्” - १-३”

“श्लोक वार्तिक”

रिक्षय निबन्धनो मोक्षः।(७)

प्राभाकरसम्मते मोक्षे सुखविलोपात् अपुरुषार्थत्वस्य तुल्यत्वात्।

~~दिगम्~~ दिगम्बरास्तु सततोर्ध्वगमनमेव मोक्ष इति व्याजह्रुः। तथाच— "तदनन्तरमूर्ध्वं गच्छन्त्यालोकात्।"(२) तदपि न समीचीनम्। तेषामपि पुरुषार्थत्वस्य स्पष्टत्वात्।

प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपावस्थानं मोक्ष इति कापिलाः। तथाच – "तदा द्रष्टुः स्वरूपेऽवस्थानम्।" एतस्यापि आनन्दव्यतिरेकसत्वेनापुरुषार्थत्वमेव। प्रपञ्चविलयो मोक्ष इति शाङ्कराः। प्रपञ्चविलयस्यात्मस्वरूपतया एवं आत्मनः सदानन्दत्वस्वरूपतया तदभ्युपगमात्। तदपि न सङ्गच्छते। प्रपञ्चविलयस्याभावात्।

प्रपञ्चस्य मायामयत्वमुपपाद्य एवं विज्ञानेन प्रपञ्चविलयोपादानं नैव संगच्छते। प्रपञ्चस्य मायामयत्वाभावात्। अपितु वास्तविकत्वात्। आत्मानन्दयोः परस्परं भेदस्य समर्थितत्वात्। एवं आनन्दानुभवस्य पुरुषार्थत्वेन तदभावप्राप्ते पुरुषार्थत्वात्।

कस्तावत् मोक्षः? किं च तस्य साधनम्? अनया जिज्ञासया प्रत्यपादि कुमारिलेन यत्—

दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः।
सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः।(४)

ननु मोक्षावस्थायां तावदनुभूयमानानन्दः प्रागेवात्मनि विद्यत एव तदा ~~संसारावस्~~ संसारावस्थायां ~~मानन्द~~ ~~मानन्दानुभव~~ तस्यानुभूतिः कथन्न जायते इति चेन्न। संसारावस्थायामानन्दानुभवसाधनविरहात्।

देहेन्द्रियाणामात्यन्तिकपरिध्वंसानुगृहीतं मनस्तदनुभवसाधनम्। संसारावस्थायामानन्दानुभवसाधनविरहात्। देहाद्यावरणसमावृततया सुखान्याकलयितुं मनस्तावत् नैव क्षमते। किं तर्हि तादृशानन्दसद्भावे प्रमाणमिति वक्तुं न शक्यत्वात्। आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते। इति श्रुतेरेव प्रमाणत्वात्। नच "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इत्युपनिषदमालम्ब्य शरीराभावे नैव सु-

।। श्लोक वार्तिक ।।

स्वानुभवः। अतः मोक्षावस्थायां नित्यानन्दानुभूतिः कथं स्यादिति वाच्यम्। तस्याः वैषयिक प्रियाप्रियस्पर्श निवृत्ति मात्र परत्वात्। अन्यथा मुक्तेरपुरुषार्थत्व प्रसङ्गात्।

एतावता संसारावस्थायां वैषयिक सुखानुभूतिर्भवति। यस्मात् शरीरविरहे वैषयिक सुखान्याकलयितुं नैव शक्नोति। यदि च मोक्षावस्थायां स्वरूप सुखं नाङ्गीकुरुते तदा मुक्तौ पुरुषार्थत्वं नैव सम्पत्स्येत।

नित्यसुखाभिव्यक्तिर्मुक्तिरस्यामवस्थायां मनसः सत्तापि स्वीकृता। तथा च—

बाह्येन्द्रियाण्येव मुक्तस्य निवर्तन्ते। मनस्तु तस्यामवस्थायां सदानुवर्तते। अतएव निषिद्ध काम्य कर्मणां परित्यागेन नित्य नैमित्तिक प्रायश्चित्तानुष्ठानेन कलुषविध्वंसतया प्रारब्धकर्म फलोपभोग जन्य प्रारब्ध कर्म परिसमाप्ततया ब्रह्मचर्य शमदमाद्यङ्ग समाहिततया वेदान्त पद्धत्या नित्यानन्द प्रकाशिनी मुक्तिः भातीति स्वीकुरुते। तथा च वार्तिककारः—

नृत्याद् नास्तिक्य निराकरिष्णुरास्तिक्यतां भाष्यकदन युक्त्या,
~~दृढ~~ दृढत्वमेतद् विषय प्रबोधः प्रयाति वेदान्त निषेवणेन॥

अन्यच्च—

निषिद्ध काम्य कर्मभ्यः सम्यक् व्यावृत्त चेतसः।
नित्य नैमित्तिक प्रायश्चित्त प्रध्वस्त दुष्कृतेः॥
सुख दुःखानुभूतिभ्यां क्षीण प्रारब्ध कर्मणः।
युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः॥
कुर्वाणस्याथ मीमांसां वेदान्तेनोक्त वर्त्मना।
मुक्तिः सम्पद्यते साध्यो नित्यानन्द प्रकाशिनी॥

एवं च सुखाद्यापरोक्षसाधनेन्द्रियत्वेन कल्प्यमानमतीन्द्रियं विभुपरिमाणमस्पन्दं च मनः। अणुपरिमाणं चञ्चलं च मन इति केचिदूचिरे। तदसङ्गतम्। मनो विभु स्पर्शरहित द्रव्यत्वात्। अनारम्भात्मकद्रव्यत्वात्। ज्ञानासमवायिकारण संयोगाधारत्वाद्वा, ~~आत्मवत्~~ आत्मवत्। इत्यादिभिरनुमानैर्विभुत्वसिद्धेः। सिद्धे विभुत्वे चाकाशादिवदस्पन्दात्मकत्वमपि न पृथक् साध्यमिति-

॥শ্বেতাশ্বতোপনিষত্॥

॥মহাভাতে॥

विज्ञातव्यम्।

प्रकृतिपुरुषयोः पारस्परिक भेदस्य नावगमनात् जगदिदं नितान्तं दुःखमयं प्रवर्तते। परन्तु पुष्करपलाश वन्निर्लिप्तस्य पुरुषस्य विशुद्धज्ञानेन दुःखानामात्यन्तिकी निवृत्तिः सम्पद्यते। अयमेव तावत् प्रकृतिपुरुष विवेकः। आत्मभेदं प्रकृतिपरिणामं च जगत् सांख्याः मन्यन्ते। द्विविधं च सांख्यं निरीश्वरं सेश्वरं च।

निरीश्वर वादिनस्तु - प्रकृतिरचेतना त्रिगुणात्मिका प्रधान शब्दाभिधेया, महदादि विशेष पर्यन्तेन प्रपञ्च रूपेण चेतनानामुपभोगाय परिणमति। सेश्वर वादिनस्तु पुरुषशब्दाभिधेयमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टमाश्रित्य प्रकृतिः जगत् सृजति।

यथा संस्कृतं क्षेत्रमधिष्ठाय तत्संपर्कवशात् बीजमङ्कुरादिक्रमेण महान्तं वृक्षमारभते। तथा सर्वव्यापिनमीश्वरं तावदधिष्ठाय सर्वव्यापिनी प्रकृतिः तत् सम्पर्कवशात् महदहङ्कार तन्मात्रादि क्रमेण परिणमन्ती विशेषान्तं प्रपञ्चमारभते। सेयं प्रकृतिः तावदुपादानं सृष्टेः। ईश्वरस्तु निमित्तमात्रम्। क्षेत्रज्ञास्तु भोक्तारः। प्रकृतिरेव तावत् सर्वकार्याणां कर्त्री भोग्या च। सा च सर्वैका भोक्तृणां च भेदाद् बद्ध मुक्त व्यवस्थोपपत्तिः। तथा च——

(१) अजामेकां लोहित शुक्ल कृष्णां-
बह्वीः प्रजा जनयन्तीं स्वरूपाः।
अजो ह्येको जुषमाणोऽनुशेते-
जहात्येनां भुक्तभोगामजोऽन्यः॥ इति वक्तव्यमेव भोग्यायाः प्रकृतेः रजः सत्त्व तमो रूपाया एकत्वं भोक्तृणां भेदाद्बद्ध मुक्त व्यवस्थानं दर्शितम्।

अत्र सांख्य दर्शने संख्यायाः नितान्त मूलभूत-सिद्धान्त तया दर्शनमिदं सांख्यमिति व्यनक्ति। महाभारते-सांख्य शब्दस्य व्याख्या प्रामाणिकी नितामुपलभ्यते।-
तथा च ——

संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।
(२) तत्त्वानि च चतुर्विंशत् तेन सांख्याः प्रकीर्तिताः।

किन्त्वनेके विद्वांसस्तु वचनमिदं प्रतिपादयन्ति - यत् तत्त्वनिर्णय कारणेनैव परिगणनार्थं व्यवहृततया

((মহাভারত))

(২) শাঙ্কর ((বিষ্ণুসহস্রনাম ভাষ্যম্))

((শ্বেতাশ্বতরোপনিষৎ)) - ৬-১৩,

((ছান্দোগ্য)) - ৬-৪১,

(৫) কঠো০ - আ০- প্র০ব০,
১০-১১।

सांख्य शब्देन सह सम्बन्धं बध्नाति। परन्तु तन्न प्रामाणिकम्। तद्यथाहि —

दोषाणां च गुणानां च प्रमाणं प्रविभागतः।
कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्॥ (१)

कस्यापि वस्तुनः तद्गत गुण दोषान् आकलनम्। तदेव सांख्यमिति व्यनक्ति। आत्मनः विशुद्धरूपस्यावगमनमेव सांख्यार्थ इत्यभिधीयते। तद्यथाहि —

शुद्धात्मक तत्त्वज्ञानं सांख्यमित्यभिधीयते। (२)

सांख्यदर्शनं नितान्तं प्राचीनमेवेति तावदैतिहासिकानां विचारसरणिः। तावदुपनिषदि साहित्ये सांख्य सिद्धान्तं प्राप्नुमः। यद्यपि योग शब्देन मिलामाश्लिष्टः सांख्य शब्दः श्वेताश्वतोपनिषदि प्रथमतः नितरां दृष्टिगोचरोभवति। तथापि एतेषां मान्य सिद्धान्तस्तु प्राचीनोपनिषत्सु बीजरूपतया समुपलभ्यते। सत्त्वरजस्तमसां सिद्धान्तः प्रथमतः छान्दोग्ये लोचनगोचरायते। (४)

एतत्सिद्धान्तानुसारं प्रकृतिः खल्वैका। अजा लोहित शुक्ल कृष्णा स्वरूपानुसारं सर्वान् समुत्पादयति। कठोपनिषद् विचारानुसारं तावदिन्द्रियेभ्यः नितरामर्थो ज्यायान्। अर्थेभ्यः मनः साधीयः, मनसः बुद्धिः परा, बुद्धेरात्मा। तस्मात् सूक्ष्मा ऽव्यक्ता प्रकृतिः, अव्यक्तात् परः पुरुषः। नातः परं किञ्चित् —

तथाच —

इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धि बुद्धेरात्मा महान् परः॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
(५) पुरुषान्न परं किञ्चित्सा काष्ठा सा परागतिः।

प्रस्तुत क्रम पद्धतिः सांख्य दर्शने स्पष्टमवलोक्यते। एतावता स्पष्टं जायते यदिमां व्याख्यान पद्धतिं नितरां स्वीचक्रे। एवं प्रश्नोपनिषदि पुरुषाणां षोडश कलायाः वर्णनं समागच्छति। यद्वर्णनं सांख्य दर्शनस्य सूक्ष्म शरीर कल्पनायाः मूलाधारमेव। तद्यथा —

इहैवान्तः शरीरे सौम्य स पुरुषो यस्मिन्नेता षोडश कलाः भवन्ति। स ईक्षांचक्रे। कस्मिन्नहं उत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते ~~प्रतिष्ठास्यामि~~

(१) "प्रश्नोपनिषद्" - ६-५,,

(२) "साँख्य सूत्रम्" भगवान् कापिलः॥

(३) "साँख्यकारिका" ४०,

(४) "साँख्य प्रवचन भाष्य" विज्ञानभिक्षुः॥

प्रतिष्ठास्यामि। स प्राणमसृजत। प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम्। एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति। भिद्यते तासां नाम रूपे पुरुष इत्येवं प्रोच्यते। स एषोऽकलोऽमृतो भवति। ~~तदेषश्लो~~ तदेष श्लोकः। (१)

वाचस्पति मिश्रास्तु तद्भिन्नं व्याख्यातवान्; यत् द्वे प्रकारके शरीरे भवतः। तत्रैकं स्थूल शरीरं तदपरं सूक्ष्म शरीरम्। स्थूल शरीरं पञ्चमहाभूतेन निर्मितम्। परन्तु कतिपयाचार्यानुसारं चतुर्भ्यः महाभूतेभ्यः स्थूल शरीरं जायते। किन्तु आकाशस्य वस्तु नानुत्पादकत्वात्। तथोक्तं च — भगवता कापिलेनेति। "पाञ्चभौतिको देहः" (२) पञ्चभूतानां परिणामो देह इत्यर्थः। "चातुर्भौतिकमित्येके" आकाशस्याऽनारम्भकत्वात्। एकभौतिकमित्यपरे॥ सूक्ष्मशरीरं तु — बुद्धिः तथाहंकारः, एवमेकादशेन्द्रिय पञ्चतन्मात्राणां समूह एव। अस्यैवापरं नाम लिङ्गशरीरमित्युच्यते। तथाच —

पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्म पर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्॥ (३)

तस्मादहङ्कारैकादशेन्द्रिय पञ्च तन्मात्र पर्यन्तम्। एषां समुदायः सूक्ष्मं शरीरम्। अतएव स्थूल शरीरवत् सूक्ष्म शरीरमास्त्यवयवीत्वम्। अष्टादशावयवात्मकं सूक्ष्म शरीरं तदेव लिङ्ग शरीरमुच्यते। तथाच कापिल सूत्रम् —
"सप्तदशैकं लिङ्गम्" सप्तदश च एकं चेति सप्तदशैकम्। तैः रलिङ्ग सूक्ष्म शरीरमुत्पद्यते।

विज्ञान भिक्षुमहोदयस्तु — एतस्माच्छरीरादतिरिक्तं किमपि तृतीयं शरीरं जायते। यदधिष्ठान शरीरमित्युच्यते। यदा सूक्ष्म शरीरं स्थूल शरीरमपास्य स्थूल शरीरान्तरं प्रविशति-तदाऽस्मै यदाधारं जायते तदेवाधिष्ठान शरीरमुच्यते। तथाच सांख्य सूत्रम् — "न स्वातन्त्र्यात् तदृते छायावच्चित्रवच्च" (४) एतद् सूत्रभाष्ये विज्ञान भिक्षुः प्रोवाच यत् तल्लिङ्गशरीरं तदृतेऽधिष्ठानं विना स्वातन्त्र्यान्न विना तिष्ठति। यथा छाया निराधारा नैव सन्तिष्ठते यथा वा चित्रम्। तथाच स्थूल देहं परित्यज्य लोकान्तरगमनाय लिङ्गदेहस्याऽऽधारभूतं शरीरान्तरं सिद्ध्यति। तथाच —

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया,

“सांख्य कारिका” (१)

“सांख्य तत्त्व कौमुदी” (२)

(३) “सांख्य कारिका” १८,

तद्वद् विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्॥(१)

मिश्रमहोदयास्तु —

जन्ममरणयोः मध्ये बुद्धितत्त्वाद्यां स्वीकुर्वच्छरीरं सूक्ष्मशरीरमिति निरवोचन्। ते अधिष्ठानशरीरं नाङ्गीचक्रुः।

(२)। सांख्यदर्शनविचारपद्धत्या प्रकृतिरियं तावत् नितान्तं सूक्ष्मा वर्ततीति। अतएवेयं प्रकृतिः नितान्तमव्यक्ता। प्रकृतिरियं सत्त्वरजस्तमसां साम्यावस्था। तदवस्थायाः भङ्गेनैव सृष्टिरियं प्रवर्तते। तस्मिन् विकासक्रमसन्दर्भे समुत्पन्नतत्त्वानि व्यक्तान्येव विद्यन्ते। प्रकृतेः प्रथमविकारात्मिका बुद्धिः नितान्तं सूक्ष्मा। तदनन्तरं क्रमशः स्थूलतत्त्वानि जायन्ते। एतस्मात् भिन्नः चेतनस्वरूपः खल्वात्मा पुरुष इत्युच्यते। तस्मात् प्रकृतिः चेतनरहिता। किन्तु कर्त्री। एवं त्रिगुणात्मिका च। पुरुषस्तु चेतनः किन्तु निर्गुणश्च। अतएव पुष्करपलाशवन्निर्लिप्तः। वास्तविकं तु समस्तानि कार्याणि प्रकृतिरेव सम्पादयति न पुरुषः। केवलं पुरुषः द्रष्टामात्रम्।

बुद्धौ समुत्पन्न सुखदुःखानुभवः स्वाविवेकतया पुरुषे प्रतिभाति। इदमेव तावत् बन्धनम्। अविवेकादुन्मूलनं मुक्तिः। वस्तुगत्या नैव पुरुषस्य बन्धनं जायते। नैव मोक्षः। नैव पुरुषाणां पुनर्जन्म। किन्तु पुनर्जन्म वा देहान्तरप्राप्तिः लिङ्गशरीरस्यैव जायते। लिङ्गशरीरमिदं तावदष्टादशतत्त्वेन निर्मितं जायते।

यद्यपि प्रकृतेः व्यतिरिक्तः पुरुष इति। नैव तावत् प्रकृतेः संसर्गः पुरुषस्य विद्यते। अतएव प्रकृतेः संसर्गस्य प्रतीतिस्तु स्वाविवेकमूला। तस्मात्—

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्॥(३)

संघातपरार्थत्वात् त्रिगुणादिविपर्ययात् अधिष्ठानात् भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च पुरुषः। सिद्ध्यति। अव्यक्तमहदहङ्कारादयः परार्थाः संघातत्वात्। शयनासनाभ्यङ्गादिवत्। सुखदुःखमोहात्मकतया सर्वेऽव्यक्तादयः संघाताः। अत्र शयनासनादिवत् संघातस्य शरीरसङ्घातार्थत्वं न त्वात्मना। तस्मात् संघातान्तरमेव सूचयति न त्वसंहतात्मनाम्। अतएव त्रिगुणादिविपर्ययादित्युवाच। संघातान्तरार्थत्वस्य संघा-

तत्त्वेन संघातान्तार्थेन तेन भवितव्यमिति तस्मादनवस्थापातः। नच सत्यां व्यवस्थायां कल्पनमनवस्था युक्तेति वाच्यम्। कल्पनागौरव प्रसङ्गात्। अतः संघातपारार्थ्य कल्पनायाः प्रामाण्यात्।

~~यद् यत् संहत~~

यद् यत् संहतं तत् तत् परार्थम्॥ शयनासनादिवत्। अर्थात् संहतत्त्वं परोपकारत्वव्याप्यम्। नैव संहत परोपकारत्वेन व्याप्यम्। अन्यथा संहतत्त्व विशेषणस्य वैयर्थ्यात्। एवंच दृष्टान्ते संहतत्त्वार्थ~~स्था~~स्य प्रत्यक्षत्वेऽपि दार्ष्टान्ते ऽसंहतत्वार्थस्य सिद्ध्या न किमप्यभद्रकम् अर्थात् पुरुषे संहतत्वाभावेऽपि संहतार्थत्वस्य सिद्धिः नैव सम्भवा।

नच संघातान्तराय संघातान्तरोऽस्तीति नाङ्गीकृत्य केवलपक्षे तदा दृष्टान्ते दृष्ट संघातान्तरार्थत्व रूपधर्माभावतया दृष्टान्ते साध्यवैकल्येन नैव पूर्वोक्तानुमानं सम्भवतीति वाच्यम्। दृष्टान्ते दृष्टसमस्त धर्मस्य पक्षेऽसम्भवात्। अन्यथा पर्वतो वह्निमान् धूमवत्त्वात् महानसम्॥ अत्र महानसे धूमहेतुना वह्नौ साध्ये दृष्टान्तेन दृष्ट महानसत्वमप्यापद्येत। एवं तथासति अनुमानस्यैवोच्छेदापत्तिः अतएव परार्थाः चक्षुरादयः संघातत्वात्। शयनासनादिवत्। अतएव दृष्टान्त दृष्ट सर्व धर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेद प्रसङ्गः। उपपादितं चैव न्याय वार्तिक तात्पर्य टीकायां वाचस्पति मिश्र महाभागैः।

तस्मादनवस्थाभियाऽस्य संघातत्वमिच्छता त्रिगुणत्वमविवेकित्वमविषयत्व सामान्यत्वं चेतनमप्रसव धर्मित्वञ्चाभ्युपेयम्। तस्मादाचार्येण त्रिगुणादिविपर्ययात्॥ इति वदताऽसंहतः परो विवक्षितः सचात्मेति।

यद्यत् सुखदुःख मोहात्मकं तत् सर्वं परेणाधिष्ठीयमानं दृष्टम्। सुखदुःख मोहात्मकं चेदं बुद्ध्यादि तस्मादपि परेणाधिष्ठातव्यम्। सच परस्त्रैगुण्यात् अन्यः स्वत्वात्मा। तथाच पुरुषाणामात्मत्वं प्रतिपाद्य सर्वशरीरेषु एकः किमनेको वेति प्रतिक्षेत्रं तदिति संशये तस्य प्रतिक्षेत्रमनेकत्वमुपपादयति। तथाच—

जन्ममरण करणानां प्रतिनियमात् तथायुगपत् प्रवृत्तेश्च त्रैगुण्य विपर्ययाच्च पुरुषाणां बहुत्वं सिद्धमेव। पुरे शरीरे तस्मिन् शेते सएव पुरुषः। पुरूणि फलानि सनोतीति वा पुरुषः। आत्मा। तस्य बहुत्वम्। त्रैगुण्य विपर्यासात् पुरुषस्य ~~ख~~—

(१) श्रीमद्भागवत॥ ११।१३।२६,

(२) सांख्य प्रवचन भाष्यम्॥ (विज्ञानभिक्षुः॥
अ०- १- सू-०-१४,

(३) ''व्यास सूत्र''

(४) सांख्य प्रवचन भाष्य॥

प्रतिशरीरं भिन्नत्वं सिद्ध्यति।

अपूर्व देहेन्द्रियमनोऽहङ्कार बुद्धि वेदनादिभिः पुरुषस्याभिसम्बन्धो जन्म। पुरुषाणामपरिणामित्वात् नैव पुरुषस्य परिणामो जन्म। देहादीनामुपात्तानां परित्यागो मरणम्। न त्वात्मनो विनाशः तस्य कूटस्थ नित्यत्वात्।

जन्ममरणकरणानां प्रतिनियमात् सर्वशरीरेषु एकस्मिन् पुरुषे नैवोपपद्यते। यदि समस्त शरीरेषु एकस्मिन् पुरुषे जायमाने सर्वे जायेरन् एवं एकस्मिन् पुरुषे म्रियमाणे सर्वे म्रियेरन्। एकस्मिन् खल्वन्धे सर्वे अन्धाः जायेरन्। तस्मात् नियमस्य वस्थापत्या शरीरभेदात् पुरुषाणां बहुत्वं सिद्धम्।

त्रैगुण्य विपर्यासात् पुरुषस्य साक्षित्वं द्रष्टृत्वं तथाऽकर्तृत्वञ्च सिद्धमेव। अतएव सांख्यप्रवचन भाष्ये तावदित्थं प्रत्यपीपदत् यत् —

जाग्रत् स्वप्नः सुषुप्तञ्च गुणतो बुद्धिवृत्तयः।
तासां विलक्षणो जीवः साक्षित्वेन व्यवस्थितः ॥(१)

आत्यन्तिकत्वञ्च स्व समानाधिकरण दुःख प्रागभावाऽसमानकालीनत्वम्। एतच्च दुःखत्रयाभावः। दुःखत्रयतिरोभावात्मिका निवृत्तिः। (२) "सुषुप्त्याद्यसाक्षित्वम्। सुषुप्त्याद्यस्यावस्थात्रयस्य बुद्धिनिष्ठस्य साक्षित्वम्। तासां बुद्धिवृत्तीनां साक्षित्वेन तद्विलक्षणो जाग्रदाद्यवस्थारहितः।

जाग्रन्नाम तावत् अवस्थाविशेषम्। यत्तावत् — इन्द्रियद्वारा बुद्धे विषयाकारः परिणामः। स्वप्नावस्था च संस्कारमात्रजन्यतादृशपरिणामः। सुषुप्त्याख्यावस्था च द्विविधा, अर्द्धसमग्रलय भेदात्। तत्रार्द्धलये ~~विषय~~ विषयाकारा वृत्तिः नैव जायते। किन्तु स्वगत सुख दुःख मोहाकारैव बुद्धिवृत्तिर्भवति। अन्यथोत्थितस्य सुखमहमस्वाप्सम्" इत्याकारक सुषुप्तिकालीन सुखादिस्मरणानुपपत्तेः। तदुक्तञ्च — (३)"मुग्धेऽर्द्धसम्पत्तिः परिशेषात्" तस्मादात्मनः निर्गुणत्वं सिद्धम्। तथा च —

ज्ञानं नैवात्मनो धर्मो न गुणो वा कथञ्चन,
ज्ञानस्वरूप एवात्मा नित्यः पूर्णः सदाशिवः।(४)

नन्वत्र निर्गुणत्वे का युक्तिः इति चेन्नैवम्। पुरुषस्येच्छाद्यास्तावन्नित्या न सम्भवन्ति जन्यता प्रत्यक्षात्। जन्यगुणाङ्गी परिणामित्वापत्तिः। तथा चोभयथैव

''योगवासिष्ठ'' ३।४।५२।५६,५७।

(२) ''श्वेताश्वतोपनिषत्'' ६-११,

निषेय

''बृहदा०'' - ३- ९,

प्रकृतिपुरुषयोः परिणामः हेतुत्व कल्पने गौरवात्। अन्यथा परिणामेन कदाचिदज्ञस्यापत्त्या ज्ञानेच्छादि गोचर संशयापत्तेश्च। तथा जड प्रकाशायोगस्योक्तत्वादपि नैव नित्यस्यानित्य ज्ञान सम्भवः। इच्छादिकमन्वय व्यतिरेकाभ्यां मनस्येव लाघवात् सिद्ध्यति। मनः संयोगस्यात्मनश्चोभयस्तद्धेतुत्वे गौरवात्। गुणशब्दस्य विशेषगुण वाचकत्वमेव। तस्मादात्मा निर्गुणः।

ये केचन तार्किकास्तु आत्मनः कर्तृत्वमिच्छन्ति। तन्न समीचीनम्। मोक्षानुपपत्तेः। अहं कर्तेति बुद्धेरेव गीतादिषु अदृष्टोत्पत्ति हेतुतयोक्तत्वात्। तस्याश्च तन्मते मिथ्या ज्ञानाभावतया तत्त्वज्ञान निवर्त्यत्वाभावात्। अतः श्रुत्युक्त मोक्षानुपपत्त्या ऽऽत्मनो ऽकर्तृत्वमेवेति स्मृतिः। अकर्तृत्वात् अदृष्ट सत्वाभावः। अतएवात्मा निर्गुणः। यथोक्तस्य परम सूक्ष्मस्यात्मनः स्वरूपं करामलकवत् विविच्य प्रोवाच – तथा च —

असम्भवति सर्वत्र दिग्भूम्याकाशरूपिणी,
प्रकाशे यादृशं रूपं प्रकाशस्यामलं भवेत्।
त्रिजगत्त्वमहं चेति दृश्ये सत्तामुपागते,
द्रष्टुः स्यात् केवलीभावस्तादृशो विमलात्मनः। (१)

नन्वहं जानामीति धर्मधर्मि भावानुभवात् पुरुषस्य चिद्धर्मकत्वं सिद्ध्यति। तदप्रामाणिकत्वेन गुरुत्वस्योदोषत्वादिति नैवम्। श्रुत्या सिद्धस्य नापलापस्तत् प्रत्यक्ष बाधात्। अतः श्रुत्या सिद्धस्य निर्गुणत्वादेर्नापलापः सम्भवति। तत्प्रत्यक्षस्य गुणादि प्रत्यक्षस्य च श्रुत्यैव बाधात्। अन्यथा हि गौरोऽहमिति प्रत्यक्षबलेन देहातिरिक्तात्म साधिकाऽपि युक्त्या बाधिता भवेयुः।

निर्गुणत्वे श्रुतयः साक्षी चेता केवलो निर्गुणश्च। (२) चिन्मात्रत्वे तु श्रुतयः अकर्ता, चैतन्यं चिन्मात्रम्, सच्चिदेकः सोऽयमात्मेत्याद्याः। सर्वज्ञत्वादिश्रुतयस्तु राहोशिर इतिवत् लौकिक विकल्पानुवाद मात्राः। विधि श्रुति मध्ये निषेधश्रुतेरेव बलवत्त्वात्। तस्मात् श्रुति वाक्यम् — अथात आदेशो नेति नेति। न ह्येतस्मात् इति नेत्यन्यत् परमस्तीति। एवमन्यच्च — "अहंकार विमूढात्मा कर्ताहमिति मन्यते" इति भगवद्वाक्याच्च। एतावता बुद्धेः त्रिगुणात्मकतया परिणामित्वेन वा तस्य कर्तृत्वं सिद्धमेव। न त्वात्मनः। अत्रिगुणात्मकत्व-

REGISTERED TRADE MARK
HBL
No. 247534

LUCKNOW
RHONE
44739